श्रीमद्बल्लालसेनदेवविरचितः

दानसागरः

DĀNASĀGARA

OF

BALLĀLA SENA

EDITED

BY

BHABATOSH BHATTACHARYA, M.A., B

Kā

Sir William Jones Research Fellow,

The Asiatic Society.

Work Number

274

Fasciculus 3

Issu

CALCUTTA :

Printed at the Calcutta Oriental Press Ltd.

Published by the Asiatic Society,

1, Park Street

1955

अथ प्रतिश्रयदानावर्तः । (३८)

यमः :—

> दत्त्वा प्रतिश्रयं लोके तथा दत्त्वैव चाभयम् ।
> तथा दत्त्वा क्षितिं विप्रे ब्रह्मलोके महीयते ॥१॥

अत्र यजमानो ब्राह्मणादेर्विश्रामार्थं[1] गृहं मनोहरं निर्माय्योत्सृज्य दद्यात् । ॐ उत्कर्षब्रह्मलोकप्राप्तिकामोऽहं विश्रामार्थं[2] प्रतिश्रयमुत्सृजे । ततआरभ्य यथायथमागतान् ब्राह्मणादीन् विश्रामयेत् ।

महाभारते (अनु—६६।३०ख—३१क) :—

> तथा गवार्थे शरणं शीतवर्षसहं शुभम् ।
> आसप्तमं तारयति कुलं भरतसत्तम ॥२॥

शरणं गृहम् । उपकल्प्येति विशेषः । शुभं सुदृढं[3] यथोक्तगृहमुत्पाद्य गवां निवासार्थमुत्सृज्य दद्यात् । ॐ महाभारतोक्त-गोदान-फलप्राप्तिकामोऽहं गवार्थमुत्सृजे इत्युत्सृज्य गास्तत्रावारितं विश्रामयेत् ।

> विहारावसथोद्यान-कूपाराम-सभाप्रदाः ।
> विप्राणाञ्चोपकर्त्तारस्ते नराः स्वर्गगामिनः ॥३॥ (अनु—२३।६६)

विहारावसथोऽग्निहोत्रगृहं सभा[4] सभा[5]-जनगृहं यत्र बहवो जनाः सुखेनोपविश्य कथादि कुर्वन्ति । अग्निहोत्रिणे अग्निहोत्रकरणोचितं गृहमर्चितं दद्यात् । ॐ अद्य महाभारतोक्त-विहारावसथदानफलप्राप्तिकामोऽहमग्निहोत्रिणे तुभ्यं विहारावसथं ददानि । नानासत्त्वविश्रामार्थं सभामुत्सृज्य दद्यात् । ॐ ब्राह्मणमुखनानासत्त्वेभ्यः स्वर्गप्राप्तिकामोऽहमेतां विश्रामार्थं सभामुत्सृजे । तदादि यथायथं तत्र श्रान्तान् विश्रामयेत्[6] ।

तथा (वन—१६६।२४) :—

> पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम् ।
> प्रयच्छन्ति तु ये राजन्नोपसर्पन्ति ते यमम् ॥४॥

1 & 2 I. O. विश्रमार्थं
3 I. O. सुदृढं शुभं
4 I. O. सता
5 I. O. सभा०
6 I. O. विश्रमयेत्

प्रतिश्रयं निर्माय श्रान्तविश्रामार्थमुत्सृज्य दद्यात्। ॐ ब्राह्मणप्रमुखनानाश्रान्तेभ्यो विश्रामार्थं [1]यमानुपसर्पणरूपफलप्राप्तिकामोऽहमेतं प्रतिश्रयमुत्सृजे। इत्युत्सृज्य [2]यथाकालमागतान् श्रान्तान् [3]विश्रामयेत्।

तथा (अनु—५७।३७ख) :—

प्रतिश्रयाच्छादनसंप्रदाता प्राप्नोति [4]तान्येव न संशयोऽत्र ॥५॥

तान्येवेति प्रतिश्रयाच्छादनान्येव इत्यर्थः। श्रान्तविश्रामार्थं प्रतिश्रयमुत्सृज्य दद्यात्। ॐ ब्राह्मणप्रमुखनानाश्रान्तेभ्यो विश्रामार्थं बहुप्रतिश्रयप्राप्तिकामोऽहमेतं प्रतिश्रयमुत्सृजे। तदादि यथायथमुपस्थितान् श्रान्तान् तत्र [5]विश्रामयेत।

स्कन्दपुराणे :—

योगिभ्यो ब्रह्मचारिभ्यो ब्राह्मणेभ्यो यतात्मवान्।
यः प्रयच्छेदावसथं सोऽश्वमेधफलं लभेत् ॥६॥

आवसथं विश्रामगृहम्।

आप्तावासे[6] पुण्डरीकं गोसहस्रञ्च विन्दति।
स्मृतिं च परमां[7] लब्ध्वा योगमाप्नोति सुव्रतः ॥७॥

शीतवर्षाद्युपद्रवरहितं दृढं गृहमुत्पाद्य त्रिदण्ड्येकदण्डिभ्योऽवस्थानार्थं सङ्कल्प्य दद्यात्। ॐ स्कन्दपुराणोक्तावसथदानफलप्राप्तिकामोऽहं योगि-ब्रह्मचारि-ब्राह्मणविश्रामार्थमेतमावसथमुत्सृजे। ततआरभ्य यथायथं त्रिदण्डिन एकदण्डिनश्च विश्रामयेत्[8]।

आग्नेयपुराणे :—]

कारयित्वा दृढस्तम्भं [शुभं पक्वे][9]-ष्टकामयम्।
प्रतिश्रयं [सुविस्तीर्णं सुभूमिं][10] लक्षणान्वितम् ॥८॥

शुभं शोभनं सुभूमिं[11] [12]परिकल्पितभूमिं लक्षणान्वितं मठलक्षणान्वितम्।

---

1 I. O. यानानुसर्पण
2 I. O. यथकाल०
3 I. O. विश्रमयेत्
4 I. O. चान्येव
5 I. O. विश्रमयेत
6 I. O. आप्तापाठं
7 I. O. परमं
8 I. O. विश्रमयेत्
9 A यत्रं for the bracketed portion
10 I. O. सुविस्तीर्णांभूमि for the bracketed portion
11 I. O. भूमिं
12 I. O. परिकल्मितभूमिं

मठं कमठ(?)-[पृष्ठाभं भ्रभ्र(?)सितदिगम्बरम् ।][1]

सुधानुलिप्तं गुप्तञ्च सुखशाला[2]-विराजितम् ॥९॥

गुप्तं रक्षितं [3]प्राकारादिवेष्टितमित्यर्थः ।

दद्यादनन्तफलदं शैववैष्णवयोगिनाम् ॥१०॥

यथोक्तं मठं निर्माय शिवध्यानरतेभ्यो ब्राह्मणेभ्योऽथर्ववेदविहितपाशुपतव्रतधारिभ्यो वा विष्णुध्यानरतेभ्यो द्विजेभ्यो[4] भगवद्भ्यो वा उत्सृज्य दद्यात् । ॐ आग्नेयपुराणोक्त-मठ[5]-प्रतिश्रयदानफलप्राप्तिकामो शैवयोगिभ्यो वैष्णवयोगिभ्यो[6] विश्रामार्थमेतं सुखशालान्वितं [मठं प्रतिश्रययुतं ददानि इत्युत्सृजेत्][7] । ततःप्रभृति यथासम्भवमुपस्थिता-[न् शैवयोगिनो वैष्णवयोगिनो वा यथेच्छं][8] मठे विश्रामयेत्[9] ।

[10]वायुपुराणे (२।१८।५६) :—

[प्रतिश्रयन्तु यो][11] दद्यादतिथिभ्यः[12] कृताञ्जलिः ।

[13]देवास्तमुपतिष्ठन्ते दिव्यातिथ्यैः सहस्रशः ॥११॥

वातवर्षादिसहं[14] [15]गृहमुत्पाद्यातिथिभ्यो विश्रामार्थमुत्सृज्य दद्यात् । ॐ [16]वायुपुराणोक्तप्रतिश्रयदानफलप्राप्तिकामोऽहमतिथिभ्यो विश्रामार्थमेतं प्रतिश्रयमुत्सृजे । ततःप्रभृति यथाकालमुपस्थितानतिथीन् कृताञ्जलिरादरेण विश्रामयेत् ।

ब्रह्मपुराणे :—

गृहावसथदातारो गृहैः काञ्चनमण्डितैः ।

व्रजन्ति बालार्कनिभैर्धर्मराजगृहं नराः ॥१२॥

---

1 A omits the bracketed portion

2 A स्वगाखान्

3 I. O. and A प्रकारादि॰

4 I. O. omits द्विजेभ्यो

5 I. O. मत्

6 I. O. omits this

7 I. O. मठप्रतिश्रयमुत्सृजे इत्युत्सृज्य for the b. p.

8 A 'सं व योगिनो वा यथे' for the b. p.

9 I. O. विश्रमयेत्

10 A पद्मपुराणे

11 Vāyu P. प्रतिश्रयं सदा for the b. p.

12 A दद्यादतिथिभ्यश्च

13 Vāyu P. देवास्ते सं प्रतीच्छन्ते

14 A निमित्ताय for सहं

15 I. O. omits गृहम्

16 A पद्मपुराणोक्त॰

आवसथो विश्रामार्थं गृहम्[1]। श्रान्तविश्रामोचितं दृढं गृहमुत्पाद्य श्रान्तेभ्य उत्सृज्य दद्यात्। [ॐ ब्रह्मपुराणोक्तावसथदानफलप्राप्तिकामोऽहं श्रान्तविश्राणार्थमेतमावसथमुत्सृजे। ततःप्रभृति तस्मिन् वेश्मनि यथाकालमागतान् श्रान्तान् विश्रामयेत्।][2]

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे प्रतिश्रयदानावर्तः।

1 I. O. गृहं twice

2 A [illegible] only for the bracketed portion

अथ प्रजापतिदैवतशय्यादानावर्तः । (३९)

[1]विष्णु :—

शय्यादानेन भार्य्याम् ॥१॥

प्राप्नोतीति शेषः[2]। अत्र यजमानो ब्राह्मणायार्चितायार्चितां शय्यां दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं भार्य्याप्राप्तिकामोऽहमेतां शय्यां ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा शय्येयं प्रजापतिदैवतेत्युक्त्वा[3] यथाशास्त्रं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा शय्यां स्पृशेत्।

याज्ञवल्क्यः (१।२११ख) :—

यानं वृक्षं प्रियौ[4] शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥२॥

ब्राह्मणायार्चितायार्चितां शय्याम् ॐ अद्यादि[5] तुभ्यमन्तमुक्त्वा दद्यात्। अत्यन्तसुखप्राप्तिकामोऽहमेतां शय्यां ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

महाभारते (अनु-५७।४०) :—

सुगन्धिचित्रास्तरणोपधानं दद्यान्नरो यः[6] शयनं द्विजाय।

रूपार्थितां[7] रूपवतीं[8] मनोज्ञां भार्य्यामपत्योपचितां लभेत् सः ॥३॥

उपधानं गेण्डुकम्। ब्राह्मणायार्चिताय शय्यां सुगन्धिचित्रास्तरणां सोपधानां [9]खट्वारूपामर्चियाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तशय्यादानफलप्राप्तिकामोऽहमेतत् [10]सास्तरणोपधानं शयनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

1 A reads विष्णुः before the heading of this topic, just above.

2 A प्राप्नोतीत्यर्थः

3 I. O. प्रजापतिदैवतेति पठित्वा

4 A and I. O. प्रिय

5 A प्रतिग्रहीता for ॐ अद्यादि

6 A सुयत्न for नरो यः

7 A रूपान्वितां

8 A दक्षवतीं

9 I. O. adds पट्टरूपाम् after खट्वारूपाम्

10 A [illegible]धानम्

स्कन्दपुराणे :—

यस्तु शय्यां प्रयच्छेत स्वास्तीर्णां नरसत्तम ।
स हि भार्य्याः प्रिया दिव्या बह्वीर्भर्त्ता[1] समश्नुते[2] ॥४॥

स्वास्तीर्णां खट्वोपरिविस्तृतशोभनरूपाम् । अर्चितां स्वास्तीर्णां शय्यामर्च्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्कन्दपुराणोक्त-शय्यादानफलप्राप्तिकामोऽहमेतां स्वास्तीर्णां शय्यां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

शिवपुराणे :—

शय्याप्रदानं यो दद्याद् ब्राह्मणेभ्यो[3] विशेषतः ।
षष्टिं वर्षसहस्राणि स्वर्गलोके महीयते ।
यदि कालक्षयं गत्वा[4] जायते विपुले कुले ॥५॥

[5]यथेष्टसंख्यब्राह्मणेभ्योऽर्च्चितेभ्यो[6] यथाशक्ति शय्यामर्च्चितां[7] दद्यात् । ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं शिवपुराणोक्तशय्यादानफलप्राप्तिकामोऽहमेताः शय्या ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् । अत्र फलोत्कर्षादुत्कृष्टशय्यादानम् ।

आदित्यपुराणे :—

ये च शय्यां प्रयच्छन्ति देवेषु च गुरुष्विह ।
ज्ञानवृद्धेषु विप्रेषु दत्त्वा नश्यन्ति कण्टकम् ॥६॥

सम्प्रदानबहुत्वं दातृबहुत्वापेक्षम् । गुरवे ब्राह्मणाय [8]बहुश्रुतायार्च्चितायार्च्चितां शय्याम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । कण्टकनाशकामोऽहमेतां शय्यां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

[9]ब्रह्मपुराणे :—

[10]उपानद्युगलं छत्रं [11]शय्यासनमथापि च ।
ये प्रयच्छन्ति वस्त्राणि तथैवाभरणानि च ॥७॥

1 A बह्वीभर्त्ता, I. O. बह्वीभक्ता:
2 A समाप्नुते
3 I. O. ब्राह्मणेषु
4 A दत्वा
5 A यथेष्ट॰
6 A omits अर्च्चितेभ्यो
7 I. O. शय्या अर्च्चिता
8 A omits बहुश्रुतायार्च्चिताय
9 A omits ब्रह्मपुराणे
10 A पादुका for उपानद्
11 A शय्यां दत्त्वा for शय्यासनम्

ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाभ्यलङ्कृताः ।
धर्मराजपुरं रम्यं छत्रैः सौवर्णराजतैः ॥८॥

अत्र फलोत्कर्षश्रवणादुत्कृष्टशय्यादानम् । ब्राह्मणायार्चिताया[1]-र्चितां शय्याम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । ब्रह्मपुराणोक्त-शय्यादानफलप्राप्तिकामोऽहमेतां शय्यां ददानि । स्वस्त्यादिस्त्रीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३११।२-३) :—

दत्त्वा द्विजाय शयनं स्वास्तीर्णं सोत्तरच्छदम् ।
कुले महति [सम्भूतां रूपद्रविणसंयुताम्][2] ॥९॥
तथा पत्त्रवतीं[3] भार्य्यां प्राप्नोति वशगां[4] तथा ।
अनेनैव तु दानेन भार्य्या पतिमवाप्नुयात् ॥१०॥

[5]पत्त्रवतीं कुटुम्बिनीम् । भार्या पतिमिति[6] महाकुलत्वादियुक्तं पतिमित्युन्नेयम् । शय्यां सुपरिष्कृतामुपरि[7]-वस्त्राच्छादितामर्चिता[8] मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-स्वास्तीर्णशय्यादानफलप्राप्तिकामोऽह-[मेतत् सोत्तरच्छदं शयनं ददानि । स्वस्त्यादिस्त्रीकारान्तं पूर्ववत् ।

तथा (३।३११।२५ख) :—

शय्याप्रदानं लोकेषु तथा स्थानकरं परम् ॥११॥

ब्राह्मणायार्चिताय यथाशक्त्युपकल्पितां शय्यामर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तानुपकरणशय्यादानफलप्राप्तिकामोऽह][9]-मेतां शय्यां ददानि । स्वस्त्यादिस्त्रीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे शय्यादानावर्त्तः ।

---

1 I. O. omits अर्चिताय
2 Corrected from V. D. I. O. रूपभूतो रूपद्रविणसंयुतम् and A सम्भूतां रूपद्रविणसम्पदा for the b. p.
3 A दत्तवतीं
4 Corrected from V. D. A ग्रवगां and I. O. च समां
5 A दत्तवतीं
6 I. O. पति for पतिमिति
7 I. O. सुपरिस्कृतां परि, A उप-स्कृतामुपरि
8 A omits अर्चिताम्
9 A omits the bracketed portion

अथ विष्णुदैवतेन्धनदानावर्त्तः[1] । (४०)

विष्णुः :—

इन्धनप्रदानेन दीप्ताग्निर्भवति संग्रामे च जयमाप्नोति ॥१॥

अत्र यजमानोऽर्च्चिताय ब्राह्मणायार्च्चितमिन्धनं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्म्मणे तुभ्यं विष्णूक्तेन्धनदानफलप्राप्तिकामोऽहमेतदिन्धनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा इदमिन्धनं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । [2]प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा[3] इन्धनं स्पृशेत् ।

महाभारते ब्राह्मणायेन्धनदानानुवृत्तौ (अनु—६५।१४ख-१६क) :—

प्रतापनार्थं राजेन्द्र व्रतवद्भ्यः[4] सदा नरः ।

सिध्यन्त्यर्थाः सदा तस्य कार्य्याणि विविधानि च ॥२॥

उपर्युपरि शत्रूणां वपुषा दीप्यते च सः ।

भगवांश्चास्य सुप्रीतो[5] वह्निर्भवति नित्यशः ॥३॥

[6]शीतार्त्तानां [7]व्रतकृच्छ्रब्राह्मणानां प्रतापनार्थं काष्ठान्युत्सृज्य दद्यात् । ॐ महाभारतोक्तप्रतापनार्थकाष्ठदानफलप्राप्तिकामोऽहं [8]व्रतपरब्राह्मणेभ्यः प्रतापनार्थं काष्ठमुत्सृजे । [9][ततः काष्ठानि दद्यात् । तत्कार्य्याण्यावृत्त्या[10] सदेतिपददर्शनात् ।

आग्नेयपुराणे :—

य इन्धनानि काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।

सर्व्वार्थास्तस्य सिध्यन्ति तेजस्वी चाभिजायते ॥ ॥

इन्धनानि[11] काष्ठविशेषणं वह्निप्रज्वालनोपयोगीनि काष्ठानीत्यर्थः । अर्च्चितेभ्यो ब्राह्मणेभ्योऽर्च्चितानि काष्ठानि दद्यात् । ॐ] अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्यो

1 A omits this heading, I. O. ...दैवत इन्धन···

2 A प्रतिग्रहीता स्वस्तीत्युक्त्वा । इन्धनं ददानि before this

3 A omits सावित्रीं पठित्वा

4 I. O. व्रतवद्भ्यः

5 I. O. सुप्रीतो

6 I, O. शीतार्त्तानां

7 A व्रतकृच्छ्र०, I. O. कृच्छ्र०

8 I. O. व्रतवद्ब्राह्मणेभ्यः

9 A reads the following only for the bracketed portion viz. ततः काष्ठान्यावृत्त्या दद्यात्

10 I. O. ०वृत्त्यात्

11 I. O. इन्धनादीनि

[ऽमुकामुकदेवशर्मभ्यो][1] युष्मभ्यममार्कण्डेयपुराणोक्तकाष्ठदानफलप्राप्तिकामोऽहमेतानि काष्ठानि ददानि। स्वस्त्यादिस्त्रीकारान्तं पूर्ववत्। उत्सृज्य वा क्रमशो दद्यात्।

मार्कण्डेयपुराणे (१०।५७क) यममार्गगमनानुवृत्तौ :—

शीतं [2]जयन्तीन्धनदाः ॥५॥

अर्चिताय ब्राह्मणायार्चितमिन्धनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। मार्कण्डेय-पुराणोक्तेन्धनदानफलप्राप्तिकामोऽहमेतदिन्धनं ददानि। [3]स्वस्त्यादिस्त्रीकारान्तं पूर्ववत्। सङ्कल्प्य वा क्रमशो दद्यात्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे इन्धनदानावर्तः।

1 A omits the bracketed portion

2 Mārkaṇḍeya P. [illegible]

3 A reads this sentence before शीतं जयन्तीन्धनदाः (V. 5)

[1]अथ विष्णुदैवतदीपदानावर्त्तः । (४१)

तत्र दीपदानस्तुतिः ।

महाभारते (cf. अनु—१३०।२६ख) :—

प्रदीपस्य प्रदानेन श्रूयतां गुणविस्तरः ।
तमोऽन्धकारे नियतं[2] दीपदो न प्रणश्यति[3] ॥१॥
प्रभाञ्चास्य[4] प्रयच्छन्ति सोमभास्करपावकाः[5] ।
देवताश्चानुमन्यन्ते विमलाः सर्वतो दिशः ॥२॥
द्योतते च यथादित्यः स्वर्गलोकगतो[6] नरः ।
तस्माद्दीपः प्रदातव्यः पानीयश्च विशेषतः ॥३॥
यस्मादूर्द्ध्वंगमेतत्तु तमसश्चैव भेषजम् ।
तस्मादूर्द्ध्वंगतिर्दाता[7] भवत्यत्रेति निश्चयः ॥४॥
देवास्तेजस्विनो यस्मात् प्रभावन्तः प्रकाशकाः ।
तामसा राक्षसाश्चैव तस्माद्दीपः प्रदीयते ॥५॥
आलोकदानाच्चक्षुष्मान्[8] प्रभायुक्तो भवेन्नरः ।
तान् दत्त्वा नोपहिंसेत न हरेन्नोपनाशयेत्[9] ॥६॥
दीपहर्त्ता भवेदन्धस्तमोगतिरसुप्रभः ।
दीपप्रदः स्वर्गलोके दीपमालेव[10] राजते ॥७॥

ब्रह्मपुराणे :—

दीपदा [11]यान्ति यानैस्तु दीपयन्तो दिशो दश ।
आदित्यसदृशैर्यानैर्दीप्यमाना[12] यथाग्नयः ॥८॥

1 A omits this heading
2 A तमोन्धकारनियतां
3 A दीपदा न प्रणश्यति
4 A प्रभावत्स्मै
5 A ०पावगाः
6 I. O. स्वर्गलोकगतो, A प्रेत्यचैव-गतो
7 A ०गतिलाभ
8 I. O. ०दानाच्चक्षुष्मान्
9 A ०नोपनाशयेत्, I. O. ०नोपवासयेत्
10 A दीपदानैव
11 I. O. यान्तु पारेण
12 A ०दीप्यमाना

वराहपुराणे (almost the same as २०७।५२ख-५३क) :—

[1]दीपप्रदानेन द्युतिं लभन्ते द्युतेन तेजः सुकुमारताञ्च[2] ।

प्राणद्युतिं[3] स्निग्धताञ्चापि तैलै-[4]र्यैर्नामारसतृप्तताञ्च ॥९॥

नन्दिपुराणे :—

याम्यं तमोमयं घोरं [5]वनं दुर्गं महाभयम् ।

[6]व्रजन्ति ते च सुखिनो ये केचिद्दीपदायिनः ॥१०॥

अथ दीपदानपरिभाषा ।

महाभारते :—

हविषा प्रथमः कल्पो द्वितीयश्चौषधी × ।

वसामेदोऽस्थि-[7]निर्यासैर्न कार्य्यः पुष्टिमिच्छता[8] ॥११॥

विष्णुधर्मोत्तरे :—

घृतेन दीपा दातव्या तैलेर्वा यदुनन्दन ।

वसामज्जादिभिर्देया न तु दीपाः कथञ्चन ॥१२॥

[9]दत्त्वा दीपं न कर्तव्यं तेन कर्म विजानता ।

निर्वापणञ्च दीपस्य हिंसनञ्च विगर्हितम् ॥१३॥

यः कुर्यात्तानि[10] कर्माणि स्यादसौ पुष्पितेक्षणः ।

दीपहर्त्ता भवेदन्धः काणो निर्वापको[11] भवेत् ।

दीपस्य दानात् परं दानं न भूतं न भविष्यति ॥१४॥

अथ दानम् ।

याज्ञवल्क्यः (१।२१०) :—

भूदीपाश्वान्न[12]-वस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।

नैवेशिकस्वर्ण-[धुर्यान् दत्त्वा स्वर्गे][13] महीयते ॥१५॥

1 I. O. दीपप्रदाने दुर्गतिं लभते
2 I. O. स्वर्गभावभाञ्च
3 I. O. स्निग्धताञ्च
4 I. O. ०र्यरेण०
5 A वनदुर्गं for वनं दुर्गं
6 I. O. व्रजन्ति तेन
7 A मज्जाद्यै for निर्यासै
8 I. O. ०मिच्छतः
9 I. O. नत्वा
10 I. O. कुर्यात्तेन, A कुर्यात्तान
11 I. O. निर्दीपको
12 I. O. ०वान्न०
13 I. O. धूर्यान् [illegible] for the bracketed portion

[1]इदं ब्राह्मणमात्रदेयभूम्यादिसमभिव्याहारात् ब्राह्मणाय [2]दीपदानम्। अत्र यजमानोऽर्च्चिताय ब्राह्मणायार्च्चितं दीपं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्ष-[3]स्वर्गप्राप्तिकामोऽहमेतं दीपं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [दीपोऽयं विष्णुदैवत इत्युक्त्वा][4] यथाशाखं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा दीपं स्पृशेत्।

शिवपुराणे :—

दीपप्रदानं[5] यो दद्याद् दैवते ब्राह्मणेषु च[6]।
तेन दीपप्रदानेन [7]अक्षय्यां गतिमाप्नुयात् ॥१६॥

ब्राह्मणेष्विति बहुवचनं प्रयोगबहुत्वापेक्षया। अर्च्चिताय [8]ब्राह्मणायार्च्चितं दीपम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [9]अक्षय्यगतिप्राप्तिकामोऽहमेतं दीपं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

दीपं ददाति यो मर्त्यः सुरब्राह्मणवेश्मनि[10]।
स [11]दिव्येन तु [12]यानेन महाद्युति[13]-प्रभासिना[14]।
[15]गच्छति स्वर्गमण्डलं वसेत्तत्र समाः शतम् ॥१७॥

[16]गृहीतोदपूर्णताम्रपात्र उदङ्मुखो दीपदानं सङ्कल्प्य ब्राह्मणवेश्मसु [17]यथेच्छकालावधि दद्यात्। ॐ नन्दिपुराणोक्त-[18]ब्राह्मणवेश्म-दीपदानफलप्राप्तिकामोऽहं ब्राह्मणवेश्मसु दीपं दास्ये[19]। [20][अथ फलभूयस्त्वाद् यथेष्ट]-चिरकालदीपदानम्।

1 A ततः
2 A omits दीप
3 A फल०
4 A omits the bracketed portion
5 A दीपं प्रासाद
6 A वा
7 I. O. अक्षयां
8 A omits ब्राह्मणाय
9 I. O. अक्षय०
10 A देवब्राह्मणवेश्मनि, I. O. सुर-
11 I. O. दिव्येव
12 I. O. पानेन, A जालेन
13 I. O. महाप्राभ
14 A प्रभाषिणा
15 I. O. गच्छति
16 A reads ता before गृहीतो०
17 A यथेच्छया
18 A adds इष्ट before ब्राह्मण०
19 A ददानि
20 A [illegible] for the bracketed portion

शाम्बपुराणे :—

दीपं ददाति[1] यो नित्यं देवतायतनेषु च ।
चतुष्पथेषु रथ्यासु रूपवान् [2]सुभगो भवेत् ॥१८॥

चतुष्पथेषु दीपदानं पूर्ववत् सङ्कल्पयेत् । ॐ शाम्बपुराणोक्तदीपदानफलप्राप्तिकामोऽहं चतुष्पथेषु दीपं दास्ये । ततो यथेष्टचिरकालावधि दद्यात् । रथ्यासु दीपदाने रथ्यास्विति [3]दानवाक्ये विशेषः । फलभूय-[स्त्वार्थिनोक्तदेशे[4]-ष्वेकदैव दीपा देयाः । [5]अत्र च वाक्येऽमुकामुक-[6]देवतायतनेषु चतुष्पथेषु[7] रथ्यासु च दीपं दास्य इति विशेषः ।

महाभारते (cf. अनु-५७।२२) :—

[8]दीपालोकप्रदानेन चक्षुष्मान् [9]भवते नरः ।
तस्माद्दीपाः प्रदातव्याः [10]सायं वै गृहमेधिभिः ।
[11]दिव्यं चक्षुरवाप्नोति [12]प्रेत्य दीपस्य दायकः ॥१६॥

शुचौ स्थाने [13]सायं यथेष्ट-[14]बहुसंख्यान् दीपान् यथेष्टचिरकालावधि सङ्कल्प्य दद्यात् । ॐ महाभारतोक्त-सायं-दीपदानफलप्राप्तिकामोऽहं साय-[15]मेतान् दीपान् दास्ये ।

विष्णुधर्मोत्तरे :—

दीपदान-[16][न्तु कर्तव्यं विप्र]-वेश्मसु पण्डितैः ॥२०॥

एतद्दीपदानं[17] मोक्षफलम् । अन्यत्र दीपदानेन महत्फलमवाप्नुयादित्यनन्तर[18]-श्रुतेः । महत्फलं मोक्षः । अन्यत्रेति देवगृह-[19]व्यतिरिक्ते दीपदानस्थान इत्यर्थः । दीपदानं सङ्कल्प्य जन्मसंस्कारविद्यासम्पन्नब्राह्मणगृहेषु चिरं दद्यात् । ॐ विष्णुधर्मोत्तरोक्तविप्रगृहदीपदानफलप्राप्तिकामोऽहं विप्रगृहेषु दीपान् [20]दास्ये ।

1 A ददाति
2 A सुखभगो
3 A and I. O. स्विखितदानवाक्ये
4 A स्त्राविव राध्यायतने चतुष्पथादि for the bracketed portion
5 A तत्र for अत्र च
6 I. O. देवायतनेषु
7 A चतुष्पथ
8 A यस्माद्दीपप्रदानेन
9 A भवति
10 A सायाह्ने for सायं वै
11 A दिव्यचक्षुमवाप्नोति
12 A प्रत्य
13 A omits सायं
14 A चिरकाल for बहु
15 A एतं दीपं
16 I. O. स्थान इत्यर्थः for the bracketed portion
17 A ०दानस्य
18 A उत्तरत्र for अनन्तर
19 I. O. ०व्यतिरिक्तान् दीप्त for ०व्यतिरिक्ते
20 A दद्यात्

तथा :—

> गिरिशृङ्गे प्रदातव्या नदीनां [1]पुलिनेषु च ।
> वृक्षमूलेषु गोष्ठेषु [2]कान्तारगहनेषु च ।
> दीपदानेन सर्वत्र महत् फलमुपाश्नुते ॥२१॥
> [3]यावन्त्यक्षिनिमेषाणि दीपः प्रज्वलते नृप ।
> तावन्त्येव स राजेन्द्र वर्षाणि दिवि मोदते ॥२२॥
> दीपदानेन राजेन्द्र चक्षुष्मानिह जायते ।
> रूपसौभाग्ययुक्तश्च धनधान्यसमन्वितः ॥२३॥

[4]गिरिशृङ्गादिषु पूर्वोक्तेषु दीपदानं पूर्ववत् सङ्कल्पयेत्[5]। ॐ [6]विष्णुधर्मोत्तरोक्त-गिरिशृङ्गदीपदानफलप्राप्तिकामोऽहं गिरिशृङ्गे दीपं दास्ये इति सङ्कल्प्य गिरिशृङ्गे यथेष्टकालावधि दीपं दद्यात्। एवं नदीपुलिनदीपदानफलप्राप्तिकामोऽहं [7][नदीपुलिन इति। वृक्षमूलदीपदानफलप्राप्तिकामोऽहं] वृक्षमूल इति। गोष्ठदीपदान-[8]फलप्राप्तिकामोऽहं गोष्ठ इति। कान्तारदीपदानफलप्राप्तिकामोऽहं कान्तार इति। वनदीपदानफलप्राप्तिकामोऽहं[9][वन इति लिखितवाक्ये विशेषः। अत्र फलभूयस्त्वार्थिनोक्तदेशेषु एकदैव दीपा देयाः। तत्र दानवाक्यम्। ॐ विष्णुधर्मोत्तरोक्त-महत्फलजनकत्वोपलक्षितदीपदानफलप्राप्तिकामोऽहं] गिरिशृङ्ग-नदीपुलिन-वृक्षमूल-गोष्ठ-कान्तारवनेषु दीपान् दास्ये इति सङ्कल्प्य उक्तस्थानेषु दीपान् दद्यात्।

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे दीपदानावर्तः।

1 A सलिलेषु च
2 A कान्तारे गहनेषु
3 I. O. यावदक्षिनि०
4 A गिरिशृङ्गादिषु
5 A omits सङ्कल्पयेत्
6 I. O. विष्णुधर्मोक्त
7 A omits the bracketed portion
8 A omits फल
9 A omits the bracketed portion

अथ सरस्वतीदैवतपुराणदानावर्तः । (४२)

मत्स्यपुराणे (५३।३-४) :—

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा[1] स्मृतम् ।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥१॥
[पुराणमेकमेवासी-[2]त्तस्मिन् कल्पान्तरे सदा ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥२॥

[3]तथा (५३।११-५६) —

[4]तदर्थोऽत्र चतुर्लक्षैः संक्षेपेण प्रदर्शितः ।][5]
पुराणानि दशाष्टौ च [6]साम्प्रतं तदिहोच्यते ॥३॥
नामतस्तानि वक्ष्यामि[7] शृणुध्वमृषिसत्तमाः ।
ब्रह्मणाभिहितं पूर्वं यावन्मात्रं मरीचये ।
ब्राह्मं [8]तद्दशसाहस्रं पुराणं परिकीर्त्यते ॥४॥
लिखित्वा तच्च[9] यो दद्याज्जलधेनुसमन्वितम् ।
वैशाखे पौर्णमास्यां स ब्रह्मलोके महीयते ॥५॥
एतदेव यदा पद्ममभूद्धिरण्मयं जगत् ।
[10]तद्वृत्तान्ताश्रयन्तद्वत् [11]पाद्ममित्युच्यते बुधैः ॥६॥
[12]पाद्मं तत् पञ्चपञ्चाशत् सहस्राणीह पठ्यते ।
तत्पुराणञ्च यो [13]दद्यात् सुवर्णकमलान्वितम् ।
ज्यैष्ठे मासि तिलैर्युक्तं सोऽश्वमेधफलं लभेत् ॥७॥

1 A ब्रह्माण
2 M. P. ॰त्तदा कल्पान्तरेऽनघ
3 A omits तथा
4 A reads this line as तदर्थो च चतुर्लक्षो संक्षेपान्न प्रदर्शित:
5 A repeats the bracketed portion
6 A संप्रतं
7 A श्रवामि
8 M. P. त्रिदश॰
9 I. O. तत्र
10 A तत्तथान्ताश्रयं तद्वत्
11 A पद्म॰
12 A पद्मं
13 I. O. दद्या

अत्र पौर्णमासीप्रकरणात् [1]ज्यैष्ठपौर्णमासी ग्राह्या ।

[2]वराहकल्पवृत्तान्तमधिकृत्य पराशरः ।
[3]यान् प्राह धर्मानखिलांस्तद्युक्तं वैष्णवं विदुः ॥८॥
[4]तदाषाढे तु यो दद्याद् घृतधेनुसमन्वितम् ।
पौर्णमास्यां [5]हि पूतात्मा स पदं याति [6]वारुणम् ॥९॥
त्रयोविंशतिसाहस्रं तत-[7]पुराणं विदुर्बुधाः ।
श्वेतकल्पप्रसङ्गेन [8]धर्मान् वायुरिहाब्रवीत् ॥१०॥
यत्र तद्वायवीयं स्याद्रुद्रमाहात्म्यसंयुतम् ।
[9]चतुर्विंशत्सहस्राणि पुराणं तदिहोच्यते ॥११॥
[10]श्रावण्यां श्रावणे मासि गुडधेनुसमन्वितम् ।
यो दद्याद्द-धि[11]-संयुक्तं ब्राह्मणाय कुटुम्बिने ।
शिवलोके [12]स शान्तात्मा कल्पमेकं वसेन्नरः ॥१२॥
[13]यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं[14] [15]तद्भागवतमुच्यते ॥१३॥
[16][सारस्वतस्य कल्पस्य मध्ये [17]ये स्युर्नरोत्तमाः ।
तद्वृत्तान्तोद्भवं लोके तद्भागवत-[18]मुच्यते ॥१४॥]

1 A जैष्ठमासी जैष्ठमासीकपौर्णमासी
2 A वराहकल्पानुवृत्तौ अधिकृत्य and M. P. वाराह०
3 A यत्तेह
4 A तदामाघा
5 A विपूतात्मा
6 A वारुणम्
7 M. P. ०प्रमाणां
8 Corrected from M. P. A धर्मानापूर्तिनाब्रवीत् and I. O. धर्मार्थीयु०
9 A चतुर्विंशत्याह आदिपुराणं
10 A
11 M. P. वृष० and A गाव० for दधि
12 A समन्तात्मा and M. P. स पूतात्मा
13 I. O. यत्राधिकृत्य गायत्री
14 A यत्र for पेतं
15 I. O. तद्भागवत उच्यते
16 A omits the bracketed portion
17 I. O. येषु नरोत्तमाः
18 I. O. उ for मु

लिखित्वा [1]तच्च यो दद्याद्धेम-[2] शृङ्गसमन्वितम् ।
पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदम् ।
अष्टादशसहस्राणि पुराणं [3]तत् प्रकीर्त्तितम्[4] ॥१५॥
यत्राह नारदो धर्मान् [5]वृहत्कल्पा- [6]श्रयांस्त्विह ।
[7]पञ्चविंशत्सहस्राणि नारदीयं तदुच्यते ॥१६॥
[8]आश्विने पञ्चदश्यान्तु यो दद्याद्धेनुसंयुतम् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥१७॥
[9]यत्राधिकृत्य शकुनीन् धर्माधर्मविचारणा ।
[10][व्याख्याता वै मुनिप्रश्ने मुनिभिर्धर्मचारिभिः ॥१८॥
मार्कण्डेयेन कथितं तत् सर्वं विस्तरेण तु ।]
पुराणं नवसाहस्रं मार्कण्डेयमिहोच्यते ॥१९॥
[11]प्रतिलिख्य तु यो दद्यात् सौवर्ण-[12]करिसंयुतम् ।
कार्त्तिक्यां पुण्डरीकस्य [13]यज्ञस्य फलभाग् भवेत् ॥२०॥
[14]यत्तदीशानकल्पस्य वृत्तान्तमधिकृत्य च ।
वशिष्ठा-[15]याग्निना प्रोक्तमाग्नेयं तत् प्रचक्षते ॥२१॥
लेखयित्वा च यो दद्या-[16]द्धेमपद्मसमन्वितम् ।
[17]मार्गशीर्ष्यां विधानेन तिलधेनुयुतं तथा ।
तच्च षोडशसाहस्रं सर्व-[18]क्रतुफलप्रदम् ॥२२॥

1 I. O. तत्र
2 I. O. ०सिंह०
3 I. O. तं
4 M. P. प्रचक्षते
5 A वृहतकन्याश्रयन्तिह
6 M. P, ०श्रयाणि च
7 A पञ्चविंशत्याह मुनिर्नारदीयं तदुच्यते
8 A तद्दिने, I. O. तदीये
9 I. O. repeats पञ्चविंशत्…तदुच्यते of V. 16 before this
10 A omits the bracketed portion, I. O. reads the first line of the b. p. as व्याख्यानं जैमिनिप्रश्ने पंक्तिभिर्धर्मचारिभिः
11 Corrected from M. P. I. O. परिलिखन्तु यो दद्या, A परिलिख्य etc.
12 Corrected from M. P. A कवि०, I. O. कनि०
13 A सकल
14 M. P. यत्तदीशानकं कल्पं, I. O. and A यत्त् दीशानकल्पस्य
15 A omits या
16 A हेमहय च चतुर्मुखम्
17 Corrected from M. P. A मार्गशीर्ष, I. O. मार्गशीर्ष्यां
18 A धर्म for क्रतु

यत्राधिकृत्य [1]माहात्म्यमादित्यस्य चतुर्मुखः ।
अघोरकल्पवृत्तान्तप्रसङ्गेन [2]जगत्स्थितिम् ॥२३॥
मनवे कथयामास भूतग्रामस्य लक्षणम् ।
चतुर्दशसहस्राणि तथा [3]पञ्चशतानि च ।
[4]भविष्यचरितप्रायं भविष्यं तदिहोच्यते ॥२४॥
तत् पौषे मासि यो दद्यात् पौर्णमास्यां विमत्सरः[5] ।
[6]गुडकुम्भसमायुक्तमग्निष्टोमफलं लभेत् ॥२५॥
[7]रथान्तरस्य कल्पस्य वृत्तान्तमधिकृत्य च ।
[8]सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतम् ॥२६॥
यत्र ब्रह्मवराहस्य [9]चरितं [10]वर्ण्यते मुहुः ।
तदष्टादशसाहस्रं ब्रह्मवैवर्तमुच्यते ॥२७॥
पुराणं ब्रह्मवैवर्तं दद्याद् यो माघमासि तु[11] ।
पौर्णमास्यां [12]सभवनं ब्रह्मलोके महीयते ॥२८॥

[सभवनं गृहसहितम् ।][13]

यत्राग्निलिङ्ग[14]-मध्यस्थः प्राह देवो महेश्वरः ।
धर्मार्थकाम-[15]मोक्षार्थानाग्नेयमधिकृत्य च ।
[16][कल्पान्ते लैङ्गमित्युक्तं[17] पुराणं ब्रह्मणा स्वयम् ॥२९॥

1 A माहात्म्येमादित्यस्य
2 A जगत्स्थितिं
3 A दश०
4 M. P. भविष्यचरित० I. O. भविष्य-चरित०
5 Corrected from M. P. I. O. and A विशेषत:
6 I. O. गुड०
7 I. O. रथन्तरस्य, M. P. रथन्तरस्य
8 Corrected from M. P. A नाम यदाह and I. O. [illegible]
9 I. O. रचितं, M. P. चोदन्तं
10 M. P. वर्णितं
11 A and M. P. च
12 A स भगवान्, M. P. शुभद्दिने
13 A omits the bracketed portion
14 I. O. शिवं for लिङ्ग
15 A मोक्षार्थं for मोक्षार्थान्
16 I. O. omits the bracketed portion
17 Corrected from M. P. A कल्पं तल्लिङ्गमुदार्थं

तदेकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति ।
तिलधेनुसमायुक्तं स याति शिव [1]सात्मताम् ॥३०॥
महावराहस्य [2]पुनर्माहात्म्यमधिकृत्य च ।]
विष्णुनाभिहितं क्षोण्यै तद्वाराहमिहोच्यते ॥३१॥
मानवस्य प्रसङ्गेन कल्पस्य मुनिसत्तमाः ।
[3]चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते ॥३२॥
काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ।
पौर्णमास्यां [4]मधौ दद्याद् ब्राह्मणाय कुटुम्बिने ।
वराहस्य प्रसादेन पदमाप्नोति वैष्णवम् ॥३३॥
यत्र माहेश्वरं धर्ममधिकृत्य च षण्मुखः[5] ।
[6]कल्पे [7][तत्-[8]पुरुषे वृत्ते चरितैरुपशोभितम् ॥३४॥
स्कान्दं नाम पुराणन्तु [9]ह्येकाशीतिर्निगद्यते ।
सहस्राणि शतञ्चैकमिति[यत्नेन पठ्यते][10] ।३५॥
परिलिख्य च यो दद्याद्धेमशूलसमन्वितम् ।
शैवं पदमवाप्नोति मीने चोपागते[11] रवौ ॥३६॥

अत्रैकस्मिन् वाक्ये पौर्णमास्यां मधाविति माससहितपौर्णमासीश्रवणादन्यत्र च मीने चोपागते रवाविति तिथिविशेषाश्रवणात् अन्योन्यापेक्षया चैत्रपौर्णमास्यामेव दानद्वयम् ।

त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ।
त्रिवर्गमभ्यधाद् यत्र[12] वामनं परिकीर्त्यते[13] ॥३७॥
पुराणं दशसाहस्रं [14]कौर्मकल्पानुगं शिवम् ।
यः शरद्विषुवे दद्याद्वैष्णवं यात्यसौ पदम् ॥३८॥

---

1 M. P. ०सात्म्यताम्
2 Corrected from M. P. A पुरा for पुनर्
3 A चतुर्विंशं
4 Corrected from M P. A च यो and I. O. तु यो
5 Corrected from M. P. A सम्मुखः, I. O. षड्मुखः
6 A कल्प
7 A omits the bracketed portion
8 M. P. ०पुरुषं वृत्तं
9 Corrected from M. P. I. O. देकाशीति०
10 M. P. मर्त्येषु गद्यते for the b. p.
11 Corrected from M. P. I. O. चोपगते
12 M. P. ०धात्तत्र
13 M. P. परिकीर्तितम्
14 M. P. कूर्म०

यत्र धमार्थकामानां मोक्षस्य च रसातले ।
माहात्म्यं कथयामास कूर्मरूपी जनार्दनः ॥३९॥
[1]इन्द्रद्युम्नप्रसङ्गेन ऋषीणां [2]शक्रसन्निधौ ।
[3]अष्टादशसहस्राणि लक्ष्मीकल्पानुषङ्गिकम् ॥४०॥
यो दद्यादयने [4]कौर्मं हेमकूर्मसमन्वितम् ।
गोसहस्रप्रदानस्य[5] स फलं प्राप्नुयान्नरः ॥४१॥
श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः ।
मत्स्य-[6]रूपी च मनवे नरसिंहोपवर्णनम् ॥४२॥
अधिकृत्याब्रवीत् सप्तकल्पवृत्तं मुनीश्वराः[7] ।
तन्मात्स्यमिति जानीध्वं सहस्राणि [8]त्रयोदश ॥४३॥
विषुवे हेममत्स्येन धेन्वा चैव समन्वितम् ।
यो दद्यात् पृथिवी तेन दत्ता भवति चाखिला ॥४४॥
यदा च गारुडे कल्पे [9]विश्वाण्डाद् गरुडोद्भवम् ।
अधिकृत्याब्रवीत् [10]कृष्णो गारुडं तदिहोच्यते ।
[11][तदष्टादशकं चैव] सहस्राणीह पठ्यते ॥४५॥
[12][सौवर्णहंसमिथुनसंयुक्तं विषुवे नराः ।
यो ददाति पुमान् सिद्धिमाप्नोति शिवसम्मितः ॥४६॥]

शिवसम्मितः शिवतुल्यरूपः । अतएव सिद्धिमणिमाद्यष्टैश्वर्यम् ।

ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत् पुनः ।
तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ॥४७॥

1 Corrected from M. P. I. O. इन्द्रस्य सु०
2 Corrected from M. P. I. O. ब्रवु
3 Corrected from M. P. I. O. सप्तं
4 M. P. कूर्मं
5 Corrected from M. P. I. O. ०प्रदानेन
6 M. P. ०रूपेण for रूपी च
7 Corrected from M. P. I. O. सुनिसत्ताः
8 M. P. चतुर्दश
9 Corrected from M. P. I. O. विश्वाण्ड
10 Corrected from M. P. I. O. कृष्णं
11 Corrected from M. P. I. O. reads the b. p. as तदष्टादश चैकच
12 M. P. reads the b. p. as सौवर्णहंससंयुक्तं यो ददाति प्रमानिह । स सिद्धिं लभते मुख्यां शिवलोके च संस्थितिम् ॥

भविष्याणाञ्च कल्पानां [1]श्रूयते यत्र विस्तरः ।
तद्ब्रह्माण्डपुराणन्तु ब्रह्मणा समुदाहृतम् ॥४८॥
यो [2]दद्यात्तु व्यतीपाते [3]पीतोर्णायुगसंयुतम् ।
राजसूयसहस्रस्य फलमाप्नोति मानवः ॥४६॥

अत्राष्टादशपुराणानि लेखयित्वा यजमानो वैशाखपौर्णमास्यां शुचिं पुराणपाठशक्तं श्रद्धालुं कुटुम्बिनं ब्राह्मणमभ्यर्च्य तस्मै पुराणोक्तजलधेनुसहितं ब्रह्मपुराणमर्चितं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्षब्रह्मलोकप्राप्तिकामोऽहमेतज्जलधेनुसहितं ब्रह्मपुराणं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पुराणमिदं सरस्वतीदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा पुराणं स्पृशेत् । एवमपरपुराणसप्तदशकदानेष्वपि दक्षिणादानं [4]सरस्वतीदेवतपुराणस्पर्शनं स्वीकरणञ्चोन्नेयम् । एवं ज्यैष्ठपौर्णमास्यां सौवर्णकमलतिलचुम्पडिकासहितपद्मपुराणदानवाक्ये अश्वमेधफलप्राप्तिकामोऽहमेतत् सुवर्णकमलतिलसहितं पद्मपुराणं ददानीति विशेषः । [5]आषाढपौर्णमास्यां मत्स्यपुराणोक्तघृतधेनुसहित-विष्णुपुराण-[6]दानवाक्ये पूतात्मतापूर्वकवारुणपदप्राप्तिकामोऽहमेतद्घृतधेनुसहितं विष्णुपुराणं ददानीति विशेषः । श्रावणपौर्णमास्यां दधिपूर्णपात्रम (त्स्यपुराणोक्तगुडधेनुसहितवायुपुराण-[7]दानवाक्ये शान्तात्मकत्वपूर्वकैककल्पशिवपुरवासकामोऽहमेतद्दधिगुडसहितं वायुपुराणं ददानीति विशेषः । भाद्रपौर्णमास्यां सुवर्णशृङ्गयुक्तभागवतपुराण-[8]दानवाक्ये परमपदप्राप्तिकामोऽहमेतत् सौवर्णशृङ्गसहितं भागवतपुराणं ददानीति विशेषः । आश्विनपौर्णमास्यां सुवर्णशृङ्गाद्यलङ्कृतस्वरूपधेनुसहितनारदीयपुराण-[9]दानवाक्ये पुनरा]-वृत्तिदुर्लभ-परमसिद्धिप्राप्तिकामोऽहमेतत् सुवर्णशृङ्गाद्यलङ्कृतधेनुसहितं नारदीयपुराणं ददानीनि विशेषः । कार्तिकपौर्णमास्यां सौवर्णहस्तिसहितमार्कण्डेयपुराणदानवाक्ये पुण्डरीकयज्ञफलप्राप्तिकामोऽहमेतत् सौवर्णहस्तिसहितं मार्कण्डेयपुराणं ददानीति विशेषः । मार्गशीर्षपौर्णमास्यां मत्स्यपुराणोक्तसौवर्णपद्म[10]-तिलधेनु-

---

1 Corrected from M. P. I. O. स्तूयते
2 M. P. दद्यात्तद्
3 Corrected from M. P. I.O. पवीर्णा
4 I. O. सरस्वतीदैवतञ्च पुराणस्पर्शञ्च स्वीकरणमुन्नेयम्
5 I. O. आषाढे०
6 I. O. दाने
7 I. O. दाने
8 I. O. दाने
9 I. O. दाने
10 I. O. सौवर्णपद्मम[illegible]पुराणोक्त[illegible], A omits सौवर्णपद्म

सहिताग्नेयपुराणदान[1]-वाक्ये सर्वक्रतु[2]-फलप्राप्तिकामोऽहमेतत् सौवर्णपद्मतिलधेनुसहितमाग्नेय-पुराणं ददानीति विशेषः। पौषपौर्णमास्यां गुडकुम्भसहितभविष्यपुराण[3]-दान[4]-वाक्ये अग्निष्टोमफलप्राप्तिकामोऽहमेतद्गुडकुम्भसहितं भविष्यपुराणं ददानीति विशेषः। माघपौर्णमास्यां गृहसहितब्रह्मवैवर्त्तपुराणदान[5]-वाक्ये सोत्कर्षब्रह्मलोकप्राप्तिकामोऽहमेतत् सभवनं ब्रह्म-वैवर्त्तपुराणं ददानीति विशेषः। फाल्गुनपौर्णमास्यां मत्स्यपुराणोक्ततिलधेनुसहितलिङ्ग-पुराण[6] दान[7]-वाक्ये शिवसात्मताप्राप्तिकामोऽहमेतत्तिलधेनुसहितं लिङ्गपुराणं ददानीति विशेषः। चैत्रपौर्णमास्यां [8]मत्स्यपुराणोक्तसौवर्णगरुडतिलधेनुसहित-[9]वराहपुराणदान[10]-वाक्ये [11]वैष्णवपदप्राप्तिकामोऽहमेतत सौवर्णगरुडतिलधेनुसहितं वराहपुराणं ददानीति विशेषः। तथा [12]तस्मिन् दिने सौवर्ण-[13]शूलसहितस्कन्दपुराण-[14]दानवाक्ये शैवपदप्राप्तिकामोऽहमेतत् सौवर्ण-[15]शूलसहितं स्कन्दपुराणं ददानीति विशेषः। शरद्विषुवे केवलवामनपुराण-[16]दान-वाक्ये वैष्णवपदप्राप्तिकामोऽहमेतद्वामनपुराणं ददानीति विशेषः। [17]उत्तरायणे सौवर्णकूर्म-सहितकूर्मपुराणदानवाक्ये गोसहस्रप्रदानफलप्राप्तिकामोऽहमेतत् सौवर्णकूर्मसहितं कूर्मपुराणं ददा-नीति विशेषः। वसन्तविषुवे सौवर्णमत्स्यसुवर्णशृङ्गाद्यलङ्कृतधेनुसहितमत्स्यपुराण[18]-दानवाक्ये अखिलपृथिवीदानफलप्राप्तिकामोऽहमेतत् सौवर्णमत्स्यसुवर्णशृङ्गाद्यलङ्कृतधेनुसहितं मत्स्यपुराणं ददानीति विशेषः। तथा वसन्तविषुव [19]एव सौवर्णहंसमिथुनसहित-[20]गरुडपुराणदानवाक्ये शिवसालोक्यपूर्वकसिद्धिप्राप्तिकामोऽहमेतत् सौवर्णहंसमिथुनसहितं [21]गरुडपुराणं ददानीति विशेषः। व्यतीपाते [22]धौतकौशेयवस्त्र[23]-युगयुतब्रह्माण्डपुराण[24]-दानवाक्ये राजसूयसहस्रफल-प्राप्तिकामोऽहमेतत [25]पीतोर्णायुगसहितं ब्रह्माण्डपुराणं ददानीति विशेषः।

---

1 I. O. दाने
2 A omits क्रतु
3 A ०पुराणोक्तपुराण०
4 I. O. दाने
5 I. O. दाने
6 A ०पुराणोक्त०
7 I. O. दाने
8 A omits मत्स्य, I. O. सौवर्ण-गरुडमत्स्यपुराणोक्त०
9 A omits वराह
10 I. O. दाने
11 A विष्णु०
12 A अस्मिन्नेव
13 I. O. ०मूल०
14 I. O. दाने
15 I. O. ०मूल०
16 I. O. दाने
17 A omits उत्तरायणे
18 A ०पुराणोक्त०
19 I. O. एतत्
20 I. O. गारुड०
21 I. O. गारुडपुराणं
22 A धौत twice
23 I. O. ०वस्त्र
24 A ०पुराणं
25 I. O. कौशेयवस्त्रयुग०

कूर्मपुराणे (२।४६।१२२, १२४-१२६):—

एतत् पुराणं [1]परमं भाषितं[2] कूर्मरूपिणा ।
साक्षाद्देवाति[3]-देवेन विष्णुना विश्वयोनिना ॥५०॥
लिखित्वा चैव यो दद्याद् वैशाखे [4]मासि सुव्रतः[5] ।
विप्राय वेदविदुषे[6] तस्य पुण्यं निबोधत ॥५१॥
सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमन्वितः ।
भुक्त्वा तु विपुलान् [भोगान् स्वर्गे][7] दिव्यान् सुशोभनान् ॥५२॥
ततः स्वर्गात् परिभ्रष्टो विप्राणां जायते कुले ।
पूर्वसंस्कारमाहात्म्या[8]-द्ब्रह्मविद्यामवाप्नुयात् ॥५३॥

कूर्मपुराणं यथाशक्ति लेखयित्वार्चितं वैशाखाभिमततिथौ ब्राह्मणायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । कूर्मपुराणोक्त-कूर्मपुराणदानफलप्राप्तिकामोऽहमेतत् कूर्मपुराणं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे पुराणदानावर्त्तः ।

---

1 K. P. सकलं
2 A भावितं
3 K. P. दि for ति
4 K. P. कार्त्तिकेऽपि वा for मासि सुव्रतः
5 I. O. तत्वतः
6 A विदुषे only
7 K. P. स्वर्गे भोगान् for the b. p.
8 A ०माहात्म्ये

अथ ब्रह्मदैवतविद्यादानावर्तः । (४३)

तत्र विद्यादानप्रशंसा ।

मनुः (४।२३३) :—

सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ।
[1]वार्यन्न-[2]गोमहीवास-[3]स्तिलकाञ्चनसर्पिषाम् ॥१॥

याज्ञवल्क्यः (१।२१२) :—

सर्वदानमयं[4] ब्रह्म प्रदानेभ्योऽधिकन्ततः[5] ।
[6]तं ददत् समवाप्नोति ब्रह्मलोकमविच्युतः[7] ॥२॥

यम :—

य इमां पृथिवीं दद्यात सर्वरत्नोपशोभिताम् ।
दद्याच्छास्त्रञ्च विप्राणां [8]तच्च दानञ्च च तत्समम् ॥३॥

आदित्यपुराणे :—

त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।
सर्वकामदुघा धेनुर्गावः पृथ्वी सरस्वती ॥४॥

विष्णुधर्मोत्तरे (३।३०३।१-४) :—

विद्या कामदुघा धेनुर्विद्या चक्षुरनुत्तमम् ।
[9][विद्यादानात् परं दानं न भूतं न भविष्यति ॥५॥
विद्यावान् सर्वकामानां भाजनं पुरुषो भवेत् ।
तस्माद्विद्यां हि ददता किं न दत्तं भवेदिह ॥६॥
पराध्यापनतः क्लेशं पुरुषस्तु यदश्नुते ।
तपस्तत् परमं तस्य ब्रह्मलोकं परं स्मृतम् ॥७॥
दानानामुत्तमं ह्येतत्तपसश्च तथोत्तमम् ।]
विद्यादानं महाभागाः[10] सर्वकामफलप्रदम् ॥८॥

---

1 I, O. पवित्र
2 I. O. भो
3 A स्तथाकाञ्चनसर्पिषो
4 A सर्वदानाश्रयं
5 A ०धिकन्तु तत्
6 A कहंलोकमवाप्नोति
7 A ०विच्युतं
8 I. O. तद्दानानि
9 A omits the bracketed portion
10 A महाभाग.

अथ विद्यादानस्वरूपं तत्फलञ्च ।

नन्दिपुराणे :—

शास्त्रे यस्माज्जगत् सर्वं संश्रितञ्च शुभाशुभम् ।
तस्माच्छास्त्रं प्रयत्नेन दातव्यं पुण्यकर्मणा ॥१॥
विद्याश्चतुर्दश प्रोक्ताः क्रमेण तु यथास्थिति[1] ।
षडङ्गाश्चतुरो वेदा धर्मशास्त्रं पुरातनम् ॥२॥

पुरातनं पुराणम् ।

मीमांसातर्कमपि च एता विद्यास्तु कीर्त्तिताः ।
[2]आसामेवान्तरोत्पन्नाः परा विद्याः सहस्रशः ॥३॥
आयुर्वेदः [3]शस्त्रवेदो धनुर्वेदः प्रकीर्त्तितः ।
सर्वोत्तमा [4]चात्मविद्या संसारभयनाशिनी ॥४॥
[5]सर्वदुःखान्तकरणी [6]सर्वपापविनाशिनी ।
एता विद्याः समाख्याता बहुभेदोपभेदजाः ॥५॥
कला विद्या तथा [7]वार्त्ता शिल्पविद्या तथापरा ।
[8]सर्वा एव महाभागाः [9][सर्वाः सर्वार्थसाधिकाः ॥६॥
स्थिताश्च तारतम्येन] विशिष्टफलसाधिकाः ।
आत्मविद्या प्रधाना तु तथायुर्वेदसंहिता[10] ॥७॥
धर्माधर्मप्रणयिनी कला शिल्पानुसाधिका[11] ।
[12]सैषा विद्या च वितता एता विद्या महाफलाः ॥८॥
[13]ययैको जीवति प्राणी कयापि [14]किल कुत्रचित् ।
अप्रधानापि सा विद्या कुलानां शतमुद्धरेत् ॥९॥

1 A and I. O. यथास्थितिः
2 A अस्मात् सर्वान्तरोत्पन्नाः
3 I. O. सस्यवेदो, A शस्त्रवेदो
4 I. O. मात्मविद्या
5 A सर्वदुःखान्तःकरणी
6 A ०प्रणाशिनी
7 I. O. वाच्याः
8 A सर्व्वैव
9 A omits the bracketed portion
10 A ०संज्ञिका
11 I. O. ०गाधिका
12 A यस्य
13 I. O. यथैको
14 I. O. कत

यापि [1]साप्यवरोधत्वाद्विद्या वै यत्र कुत्रचित् ।
प्रापयत्यक्षयाल्लोँकान् विधिना [2]वाविधानतः ॥१०॥

[3][विधिना वाविधानतः] वक्ष्यमाणविधिना [4]विधानमन्तरेणैव दद्यादित्यर्थः ।

[5]शिल्पविद्यां नरो दत्त्वा याति वै ब्रह्मणोऽन्तिकम् ।
[6]कलाविद्यां नरो दत्त्वा वैष्णवं लोकमाप्नुयात् ।
[7]कल्पमेकं न सन्देहः स्वर्गभोगसमन्वितः ॥११।
[8]शस्यविद्यां नरो दत्त्वा तृप्तिमान् कामसंयुतः ।
प्रजापतिपुरं गच्छेत् तारयन्नरकात् पितॄन् ॥१२॥
आयुर्वेदं नरो दत्त्वा लोकानाप्नोति निर्मलान् ।
[9]अश्विन्योर्दिव्यकामाढ्यं [10]मन्वन्तरशतं नरः ॥१३॥
तर्कविद्यां नरो दत्त्वा वारुणं लोकमाप्नुयात् ।
मीमांसान्तु बुधो दत्त्वा शाक्रमिन्द्रपुरे[11]वसेत् ॥१४॥
धर्मशास्त्रं नरो दत्त्वा स्वर्गलोके महीयते ।
दशमन्वन्तरान् मर्त्यस्तारयेन्नरकात् पितॄन् ॥१५॥
[12]वेदविद्यां नरो दत्त्वा स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्या-[न्तु यो दद्यात्][13] तस्य संख्या न विद्यते ॥१६॥
[14]पुण्यस्त्वागदितं सम्यगपि वर्षशतायुतैः ।
एतावच्छक्यते वक्तुं यत् [15]कल्पायुतमुत्तमम् ।
सत्यलोके वसेन्मर्त्यो [16]यत्र ब्रह्म वसेत् प्रभुः ॥१७॥
अप्येकं [17]निरुजीकृत्य जन्तुं यादृशतादृशम् ।
आयुर्वेदप्रसादेन किं न दत्तं भवेद्भुवि ॥१८॥

1 A साप्यवरोधश्च
2 A omits वा
3 A इति for the bracketed portion
4 A विधानमन्त्रेनैव वा
5 I. O. शिष्ठ्ये for शिल्प
6 A reads कलाविद्यां नरो दत्त्वा याति वै ब्रह्मणोऽन्तिकं before this line
7 I. O. कालमेकं
8 A शस्य विद्यां, I. O. शस्य०
9 I. O. अश्विनोर्दिव्यकामाद्यं, A अश्विन्योर्दिव्यकामाद्यं
10 I. O. दिव्यं मन्वन्तरं
11 I. O. ०पुरो
12 I. O. वेदविद्यां
13 I. O. न्तपोविद्यां for the b. p.
14 A पुण्यस्त्वागपितं
15 A कल्पान्तमनुत्तमं
16 A विद्यार्थेत्र
17 A नीरुजीकृत्य

[1]शस्यवेदप्रसादेन सम्पन्ना यस्य[2] शालयः ।
किं नाम न कृतं [3]तत्र पुण्यं भवति शाश्वतम् ॥१६॥
मीमांसाशास्त्रमाहात्म्याद्बुद्ध्वा वै वेदनिर्णयम् ।
किं नाम न शुभं [4]दत्तं यज्ञकर्मप्रवर्तनात् ॥२०॥
आत्मविद्या च पौराणी धर्मशास्त्रात्मिका च या ।
एता विद्यास्तिस्रो मुख्याः सर्वदानक्रियाफलैः ॥२१॥
[5][धर्मशास्त्रं नरो बुद्ध्वा यत्किञ्चिद्धर्ममाश्रयेत् ।
तस्य धर्मं दशगुणं धर्मशास्त्रप्रदस्य वै ॥२२॥
पुराणाख्यानविद्वांसः पितृदेवार्चने रताः[6] ।]
लोकान् [7]सर्वान् कामपूर्णान् यान्ति सर्वशुभोदयान्[8] ॥२३॥
पुराणविद्यादातारस्त्वनन्तफलभागिनः ।
आत्मविद्याप्रदातारो नरा धर्मसमाश्रयाः ।
न पुनर्योनिनिरयं प्रविशन्ति दुरत्ययम् ॥२४॥
उत्तीर्णाः सर्वपापेभ्यः [9]सपुत्रपशुबान्धवाः ।
मुच्यन्ते निरयैर्घोरैर-[10]संख्यैर्यातनात्मकैः ॥२५॥

तथा :—

श्लोकं प्रहेलिकां [11]गाथामन्यद्वापि [12]सुभाषितम् ।
दत्त्वा प्रीतिकरं याति [13]लोकमप्सरसां शुभम् ॥२६॥
यदेतत् पुण्यमाख्यातं विद्यादानस्य साम्प्रतम् ।
देशकालविधिश्रद्धा-[14]पात्रयोगात्तथा बुधः ।
प्राप्नोति कोटिगुणितं फलं विद्याप्रदानतः ॥२७॥
यत्तु पुण्यपरो मर्त्यो जिगीषुः कीर्तिसाधकः ।
स विधानेन वै विद्यां दद्याद् विविधकामदाम् ॥२८॥

1 I. O. सस्य०, A सम्यक०
2 I. O. पश्च
3 A तत्र
4 I. O. दात्तं
5 A omits the bracketed portion
6 I. O. रत:
7 A सर्वां समान पूर्णान्
8 I. O. सर्वशुभोदय:
9 A नरा: सपशुबान्धवा:
10 I O. ०संख्ये: पातनात्मके:
11 I. O. गाखा०
12 I. O. सुभाषितां
13 A लोकमप्साविनं
14 A ०पात्र०

एवं विद्याप्रदानं वै सर्वकामगुणाधिकम् ।
[1]यत्तत् पात्रे तु संत्यक्तं रहस्यञ्चैतदुत्तमम् ॥२९॥
उद्दिश्य देवतां दातुं प्रधानां यत्र [2]कुत्रचित् ।
तस्य समाप्तपुण्यस्य केन पुण्यं निरूप्यते ॥३०॥

उद्दिश्य देवतां देवताप्रीतय इत्यर्थः ।

गुरुमाराध्य यत्नेन विद्याव्याख्यानपारगम् ।
[शक्त्या भक्त्या प्रणामेन][3] धनैः सर्वगुणैस्तथा ॥३१॥

अथ गुरुप्रशंसा ।

यथा घटप्रतिच्छन्ना [4]रत्नराजमहाप्रभाः ।
अकिञ्चित्करतां [5]प्राप्तास्तथा विद्याश्चतुर्दश ॥१॥
विना तु गुरुणा [6]सम्यग्बोधनेन विपश्चिता ।
नैव विद्याफलप्राप्तिर्गुरुं तस्मात् प्रपूजयेत् ॥२॥
स्रग्वासोभूषणैर्नित्यं यथा देवं पिनाकिनम् ।
यो गुरुं पूजयेन्नित्यं स्थितं बा प्रस्थितञ्च वा ॥३॥
तत्प्रसादेन यस्मात् स प्राप्नुयात् सर्वसम्पदः ।
तस्माद् गुरुं प्रयत्नेन महादेववदर्चयेत् ॥४॥
भक्त्या प्रीत्या प्रयत्नेन श्रद्धया च सदैव हि ।
एष माता पिता ह्येष एष एव च बान्धवः ॥५॥
एष चिन्तामणिः स्फीत एष एव च मे सुहृत् ।
एवं श्रद्धापरो नित्यं गुरुमाराधयेद्बुधः ।
अज्ञानदुःखशमनं [7]नरकोद्धरणं तथा ॥६॥
कुतो माता पिता वापि बान्धवो वा महागुणः ।
तादृगभ्युदयं कुर्याद् यत् कुर्याच्च गुरुर्महान् ॥७॥
कोऽन्यो ज्ञानेन [8]दुःखौघादुद्धरेद्बहुबन्धनात् ।
सम्यक् शास्त्रार्थबोद्धारं महादेववदर्चयेत् ॥८॥

---

1 I. O. पतेत् पात्रं तु संत्यक्तं
2 I. O. कुत्रचि
3 A सद्यो तत् प्राप्यमानेन for the b. p.
4 A बहुराजमहाप्रभुः
5 A प्राप्त०
6 A सम्यकगोधिकेन विपश्चित:
7 A नरकोद्धारणं
8 A दुःखौघादुद्धरेद्दुर्गबन्धनात्, I. O दुःखेभ्योदुद्धरेद्बहुबन्धनात्

[1]वस्तुमात्रेण यो ज्ञानं शास्त्ररूपमुपन्यसेत् ।
स तावच्छिववत्[2] पूज्यो भक्त्या[3] भवति पापहृः ॥६॥
यः शास्त्रमविविक्तार्थं[4] विशेषार्थं प्रबोधयेत् ।
[5]पदवाक्यार्थबोधेन सम्यक् शास्त्रप्रवर्तनात् ॥१०॥
[6]पूर्वोत्तरार्थसङ्गत्या समुदायार्थनिश्चयः ।
[7]सुशास्त्राभिमता वाचः सम्यग् यो वेत्ति तत्त्वतः[8] ॥११॥
स तु साक्षान्महाबुद्धिर्भगवानिव शङ्करः ।
तं भजेत् सर्वभावेन भक्तियोगेन सर्वदा ॥१२॥
आदित्येन विना [9]यावज्जगदन्धं विभाव्यते ।
गुरुवाक्यैर्विना [10]सर्वं तथैव हि तमोमयम् ॥१३॥
तस्माद् यथा महादेवं [तद्वदेव गुरुं सदा ।][11]
यः पश्यति स पुरुषः [12]सर्वधर्मानवाप्नुयात् ॥१४॥

अथ विद्यादानपात्राणि ।

विद्या च मुख्यं दानानां [13]गुरुतोऽस्य विधिं बुधः ।
श्रुत्वा विधेयं विधिवच्छ्रद्धया भावितात्मना ॥१॥
सत्पात्रेभ्यः [14]स्तुतां दद्याद् [15]विशेषाद् गुणशालिषु ।
उपयोज्यश्च [16]यद् यस्य तत्तस्य प्रतिपादयेत् ॥२॥
सुरालयेषु सिद्धेषु यथा-[17]विभवविस्तरैः ।
दातव्यास्तु प्रयत्नेन [18]सदा पुण्यफलार्थिभिः ॥३॥

1 A वट्मात्रेण
2 A भावस्थिररत
3 A भक्तो
4 A ०विविक्तानां
5 I. O. तद्वाक्याद्गुरोधेन
6 I. O. पूर्व्वोत्तरार्थसङ्गम्य, A पूर्व्वो-त्तरत्वासंगत्या
7 A सुशास्त्रविहिताश्चैवारं, I. O. स्वशास्त्रा०
8 I. O. तत्त्व
9 A यतजगदन्ध
10 A सर्व्वतंथैव हि तमामयं, I. O. ०तमोमयं
11 I. O. गुरुं यदा for the bracketed portion
12 I. O. adds सर्वकामान् after सर्वधर्मान्
13 A गुरु तस्य
14 I. O. स्तुतं विद्या
15 I. O. विशेषा
16 I. O. यस्य
17 I. O. ०विभारविस्तरैः
18 A महापुण्यफलार्थितः

अथ पुस्तकलिखनारम्भः ।

शुभे नक्षत्रदिवसे [1]शुभे चापि[2] दिनग्रहे ।
लेखयेत् पूज्य देवेशान् रुद्रब्रह्मजनार्दनान् ॥४॥

अथ सरयन्त्रविधिः ।

पूर्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
विद्याधरं प्रकुर्वीत हेमरूप्यमयं शुभम् ॥५॥

विद्याधरं सरयन्त्रम् ।

नागदन्तमयं वापि सारदारुमयं तथा ।
मनोज्ञमगुरु रम्यं शुक्लपत्रप्रयोगजम् ॥६॥
[3]सङ्कोचयन्त्रसंयुक्तं [4]विकाशनसमन्वितम् ।
[5]पत्रविद्याविनिहतां कुर्य्यात् पुस्तकसंस्थिताम् ॥७॥

अथ पत्रसञ्चयविधिः ।

कुर्य्यात्तु पुस्तकं यत्र लेख्याद्द्विगुण-[6]विस्तृतम् ।
[7]सुशुक्लं लघु रम्यञ्च कृष्णमेचकितं तथा ॥८॥

पुस्तकं पत्रसञ्चयं [8][लेख्याल्लिखनीयस्थानाद्द्विगुणविस्तृतं[9]] सुशुक्लं सुमर्दितं कृष्णमेचकितं मसीनिर्मितसमयज्ञादिलिखनानुगुण-[श्यामरेखम् ।

अथवा][10] रक्तवर्णाभं मेचकानं कृतं शुभम् ।
कार्पाससूत्रग्रथितं नानागन्धादिवासितम् ॥९॥

रक्तवर्णाभमिति कृतकृष्णलोहितरेखं नानागन्धादिवासितं नानाधूपधूपितम् ।

1 I. O. शुभवादि
2 Raghu reads in Div. T. (p. (588) रात्रि but चापि in Dik. T. (p. 650) and reads in the above two pages the following in the second line of V. 5:—निरोधो हस्तवाह्योम मसीपत्रविधारको
3 I. O. सङ्कोचयन्त्रयुक्त
4 I. O. विकाशनसमन्वितम्, A विकाशेन समन्वितम्
5 A यत्र विद्या च विहितं
6 I. O. and A °विस्मृतं
7 A सुशुक्लञ्च (सुशुक्लञ्च ?) सुरम्यञ्च
8 I. O. लेख्यादाद्यमात् द्विगुणविस्तृतं बहुतरं for the bracketed portion
9 A प्रस्तारयुतं for विस्तृतम्
10 I. O. श्यामरेखा सुखवा for the b. p.

अथ मसीनिर्माणम् ।

मसीभिश्चाप्यनेकाभिश्चतुर्वर्णाभिरेव च ।
दृढस्तम्भन[1]-युक्ताभिर्मेचकैश्चाप्यनेकशः ॥१०॥

[मसीभिश्चाप्यनेकाभिः प्रचुरभागकज्जलाभिः][2] चतुर्वर्णाभिः पीतरक्तहरितकृष्णवर्णाद्रव्य-रसमयीभिः[3] दृढस्तम्भन[4]-युक्ताभिर्भद्र[5]-गन्धरसादिसहिताभिः । मेचकैश्चाप्यनेकश इति [6]पीत × × नानाद्रव्ययुक्ताभिः ।

अथ लेखनीयष्टिकानिर्माणम् ।

लेखनीभिश्च दिव्याभि[7]-र्हेमचित्राभिरेव च ।
बहिश्च वर्णं कुर्वीत पुस्तकस्य मनोरमम् ॥११॥
पीतरक्तकषायैर्वा सुनिबन्धं सुचित्रितम् ।
रम्यं लघु सुविस्तीर्णं निर्ग्रन्थि ग्रन्थिसंयुतम् ॥१२॥

बहिश्च पुस्तकस्य काष्ठपट्टिकादिकं पीतरक्तकषायैर्वेति पीतरक्तैः कषायैर्वा वर्णं[8] कुर्यादिति सम्बन्धः । निर्ग्रन्थि ग्रन्थिशून्यदारुमयं ग्रन्थिसंयुतं सूत्रग्रन्थिसहितम्[9] ।

अथादर्शपुस्तकारोपणम्

विद्याधरे ततो यन्त्रे[10] संस्थितं पूर्वपुस्तकम् ।
गृहे मनोरमे गुप्ते सुधालेपितभित्तिके ॥१३॥

पूर्वपुस्तकमादर्शं कृत्वेति शेषः[11] ।

नानारागा[12]-ङ्कुरोपेते [13]सुरवृन्दमनोरमे ।
धूपामोदमनोज्ञे तु वितानकपरिष्कृते ॥१४॥

नानारागा[14]-ङ्कुरः नाना-[15]तरुपुष्पपल्लवः ।

1 A च्यस्तन for स्तम्भन
2 I. O. omits the bracketed portion
3 I. O. ०मयाभिः
4 A स्तन for स्तम्भन
5 A omits भद्र
6 A पीतसानपानीयादिनानाद्रव्य-युक्ताभिः, I. O. प्रचुरभागकज्जलाभिः
7 A लेखनीतत्र द्रव्याभि०
8 I. O. omits वर्णं
9 A omits it
10 I. O. पात्रे
11 A विशेषः
12 I. O. ०रामा०
13 A ग्रवविल्वमनोरमे
14 I. O. ०रामा०
15 I. O. ०रुरु०

अथ लेखकस्यालङ्कारादिदानपूर्वकलिखनारम्भः ।

लेखको बुद्धिमान् [1]स्नातः शुक्लपुष्पाम्बरो[2]-उज्ज्वलः ।
सुवर्णयुक्त[3]-केयूरमुद्रिकाशोभिताङ्गुलिः ॥१५॥
सुसमृद्धे[4] मसीभाण्डे लेखनीशस्त्रसंयुते ।
[5]प्रारभेत् तूर्य्यघोषेण पूज्य देवान् पितॄंस्तथा ॥१६॥

शस्त्रसंयुते नखरञ्जनीकर्त्तरीसहिते प्रारभेत् लेखकः प्रारभेदित्यर्थः ।

[6]ब्राह्मणान् स्वस्ति वाच्यादौ शास्त्रं सञ्चारयेद्बुधः ।
[7]श्लोकपञ्चकमादौ तु दशकं वापि लेखयेत् ॥१७॥

अयमर्थः—बुधो यजमानो देवान् पितॄंश्च[8] सम्पूज्य पत्रसञ्चये शास्त्रं लेखयेदिति ।

ततो नक्षत्रयोगेन द्वितीयेऽहनि तल्लिखेत् ।
तादृशेनैव विधिना पुण्याहैः शुभसंयुतैः ॥१८॥
ततः समाप्ते शास्त्रे तु[9] पुनः पुण्याहसंयुतम् ।
[10]कुर्य्यात्तदहरग्र्यैश्च [11]पानभोजनवस्तुभिः ॥१९॥

अथ शोधनविधिः ।

उभयञ्चापि तल्लेख्यं मसी (?) कुर्य्याच्च वाचयेत् ।
[ऊनाधिकैश्च संयुक्तं वर्णैर्मात्रादिभिस्तथा ॥२०॥
अनुस्वारविसर्गैश्च युक्तायुक्तैर्विचारयेत् ।
शास्त्राप्रतिक्रियायुक्तया पुनरुक्त्या च शोधयेत् ॥२१॥][12]
जनार्थोक्त्या[13] प्रसङ्गस्य शब्दयोग्यतया तथा ।
[14]सूत्रान्तरानुरोधेन प्रश्नोत्तरविवेकतः ॥२२॥
असूत्रत्वाच्च शास्त्रस्य समुदायानु-[15]रोधतः ।
प्रकान्त-[16]सूचनोद्देशैर्गदितैश्चोदितैरपि ॥२३॥

---

1 A स्नुत:
2 A ०स्नुरो०
3 A omits युक्त
4 I. O. सुसमिद्ध
5 I. O. प्रारम्भे
6 A ब्राह्मणो
7 I. O श्लोक०
8 A पितृन्
9 I. O. omits तु
10 A कुर्य्यादहरहं श्च ष
11 A पानभोजनस्तुभि:
12 A omits the bracketed portion
13 A जनार्थोक्ता
14 I. O. सूत्रान्तरार्थबोधेन
15 I. O. ०बोधत:
16 A ०स्वना०

[1]बह्वर्थानाञ्च शब्दानां [2]योग्यमर्थं परीक्ष्य तु ।
सर्वशास्त्राविरोधेन[3] [कारकार्थैरविप्लुतैः ।
क्वचिच्च शब्दं चर्य्येव (?)][4]प्रकृतार्थं निरूपयेत् ॥२४॥
[छन्दसा वापि बुध्येत वृत्तसंयोगमीप्सितम्][5] ।
एवं विद्यात्तु मेधावी शास्त्रं सत्कृत्य कृत्स्नशः ॥२५॥

अथ देवायतननिवेदनविधिः ।

प्रदद्याद्विभवैर्दिव्यैः पुरायतनवेश्मसु ।
व्यक्तदेशलिपिन्यासं मुख्यं [6]नापरमुच्यते ॥१॥
[7]आरोग्ययानरत्नाढ्ये शुभवस्त्रपरिष्कृते ।
घण्टाचामरशोभाढ्ये रत्नदण्डातपत्रिणि ॥२॥
गजवाजिरथस्थं वा महाशोभासमन्वितम् ।
पुरतो गीतनृत्येन नानावाद्यरवेण च ।
मङ्गलैर्वेदघोषैश्च देवाय विनिवेदयेत् ॥३॥
नानाधूपोपहारैश्च सम्पूज्य तु दिवौकसः ।
दत्त्वा तु पुस्तकं तत्र पितॄणां धर्ममुद्दिशेत् ।
बान्धवानाञ्च हृद्यानामनन्तफलमिच्छताम् ॥४॥

पितॄणां धर्ममुद्दिशेदित्यादेः पितॄन् [8]बान्धवानुद्दिश्य दद्यादिति सम्बन्धः[9] ।

ततो [10]दद्याद्विधानेन तां विद्यां शिवमन्दिरे ।
ततश्च दत्तयेद्विप्रान् शिवभक्तांश्च मानवान् ॥५॥
[11][दत्तयेत् कृतनिवेदनप्रतिष्ठार्थं दक्षिणादिभिः] पूजयेत् ।

1 I. O. बन्धार्थानाञ्च
2 I. O. योग्यासन्नं
3 I. O. सर्व्वशास्त्रावबोधेन
4 A omits the bracketed portion
5 A चन्दसा कपिठककेतु वृने संयोगमाद्रितं for the b. p.
6 A नगर?
7 A आरोमाने तद्वाठ्ये
8 I. O. बान्धवान्नोद्दिश्य
9 A adds अभ्यस्ता...विशारदः of V. 10 below after this
10 A दत्त्वा for दद्याद्
11 A दत्तयेत् विद्याप्रतिष्ठार्थं दक्षिभिः for the b. p.

यथाशक्ति च कर्त्तव्या [1][उत्सवा विष्णुवेश्मनि]।
राज्ञा तु नगरे[2] कार्य्या ग्रामे ग्रामाधिपैस्तथा ॥६॥
गृहे गृहस्थैः कर्त्तव्यमुत्सवं बन्धुभिः सह[3]।
स्नातैर्भुक्तैः समालब्धैः स्रग्विभिः सुसमाहितैः ॥७॥

अथ श्रोतृपाठक[4]-गुरुगुणसहितव्याख्यानविधिः।

प्रीतियुक्तैस्ततः[5] श्रव्यं शास्त्रं [6]श्रद्धासमन्वितैः।
वाचकं दत्तयेत्तत्र यथाविभववित्ततः।
गुरुश्च शक्त्या मतिमान् यथाशक्ति त्वमायया ॥८॥

दत्तयेद्वस्त्रादिभिरर्चयेदित्यर्थः।

ततः पुष्पैश्च धूपैश्च श्रावकं संप्रपूजयेत्।
वाचको ब्राह्मणः प्राज्ञः श्रुतशास्त्रो महामनाः[7] ॥९॥

श्रावकं पाठकं पाठसमये पुष्पधूपादिभिरभ्यर्चयेदिति सम्बन्धः।

अभ्यस्ताक्षरविन्यासो [8]वृत्तशास्त्रविशारदः।
सूत्रार्थवित् प्रगल्भश्च विनीतो मेधया युतः।
[9]नीतिज्ञो वाक्पटुः [10]अव्यस्वरो ×× भाषकः ॥१०॥
गुरुश्च धर्मवान् प्राज्ञः श्रुतशास्त्रो विमत्सरः।
विप्रः प्रकृतितः शुद्धः शुचिः स्मितमुखः सुधीः[11] ॥११॥
[सुव्रतो व्रतशास्त्रज्ञः सर्वशास्त्रविशारदः।
अभ्यस्तशास्त्रसन्देहः प्रकृतार्थप्रवर्तकः।
[12]सश्रद्धः सुकृतव्याख्यः पौर्वपर्यार्थवित् सुधीः ॥१२॥][13]
अध्याय-[14]सर्गविच्छेदविभक्त्यर्थप्रयोजकः।

---

1 I. O. वतुसेवा: स्ववेषु वेश्मसु
2 A नसठ्ये
3 A सदा
4 A श्रावक for श्रोतृपाठक
5 A श्रेष्ठं
6 A श्रुत्वा स्राग्विभिः
7 I. O. महामहाः
8 A विद्यशास्त्र०
9 A गीतिज्ञो
10 A श्राव्यसुरो
11 A सदा
12 A नाश्रद्धमकृतव्याख्यां
13 I. O. omits the bracketed portion
14 A ग्रन्थ for सर्ग

शास्त्रार्थ-[1]पदविद्धीमान् पदश्लोकार्थबोधकः ॥१३॥

समुदायप्रकीर्णार्थमुख्यशास्त्रानुसञ्जकः[2] ।

अनन्तरश्च हृद्वस्तु व्यपदिश्यार्थबोधकः ॥१४॥

अनन्तरमनुक्तं हृद्वस्तु परस्याशयस्थ[3] किमपि विवक्षितमित्यर्थः ।

प्रक्रान्तादिषु शास्त्रार्थविभागपरिनिष्ठितः ।

कथाभिधान-[गूढार्थभङ्गेन च विबोधकः][4] ॥१५॥

श्रद्धेयश्च गतालस्यः श्रौतचिन्तावबोधकः ।

संस्कृतैः संस्कृतां[5] विद्यां प्राकृतैः प्राकृतामपि ॥१६॥

आलापमात्रै[6]-र्व्याख्यानैर्यश्च शिष्यान् [7]प्रबोधयेत् ।

देशाभिधानविन्यासैर्बोधयेच्चापि[8] यो गुरुः ॥१७॥

स गुरुः स पिता माता[9] स तु चिन्तामणिः स्मृतः ।

स शास्त्रोपायमाख्याय नरकेभ्यः समुद्धरेत् ॥१८॥

कस्तेन सदृशो लोके [बान्धवो भुवि][10] विद्यते ।

यस्य वाग्रश्मिवृन्देन [11]हृदयान्नश्यते तमः ।

महासंसाररजनीभवं सोऽर्को[12] महाद्युतिः ॥१९॥

नोद्विजेत्तस्य पारुष्ये[13] न च वैलोम्यमिच्छतः ।

न चास्य व्याधिदुःखेषु मलानां वाप्रियो[14] भवेत् ॥२०॥

[प्रसादयेच्च कुपितं][15] दुःखमग्न[16] समुद्धरेत् ।

1 I. O. ०पर०

2 A ०शास्त्रानुसंज्ञकः, I.O. ०शास्त्रार्थ-सञ्जकः

3 I. O. परस्याशयस्तं, A परस्याशयनस्थं

4 A भूमन्वभङ्गेषु स्वनिरोधकः for the bracketed portion

5 I. O. सतृक्ता

6 A शास्त्र for मात्रैर्

7 A सुबोधयेत्, I. O. प्रबोधकान्

8 A ०द्वापि

9 I. O. स गुरुः माता पिता, A य गुरुमपि कामक्ता

10 I. O. बान्धवोस्तु न for the bracketed portion

11 I. O. हृदयं पद्मयते, A हृदयान्नस्यते

12 A लोके

13 A रूपस्य

14 A गोयो

15 A कस्तेन सदृशो लोके for the bracketed portion

16 I. O. दुःखमुग्धं

रोगेभ्यश्चापि यत्नेन[1] [परित्यागेन चोद्धरेत्][2] ॥२१॥

अथ व्याख्यायां विधिनिषेधविधिः[3] ।

[4]एवं व्याख्यां शुभां श्रुत्वा[5] गुरुवक्त्रान्नरोत्तमः ।
विधेयं चिन्तयेद् यत्नात्[6] परत्र हितकारणम्[7] ॥१॥
शृणुयात् श्रद्धया[8] युक्तः प्रणतोऽभिमुखो[9] गुरोः ।
[10]अनन्यसंकथाक्षेपी निष्प्रमादो ह्यतन्द्रितः ॥२॥
[11]सूत्रे च संशये जाते पृच्छेद्वाक्य[12]-मुदीरयेत् ।
[13][गुरुणा चोक्तमेकान्ते] श्रद्धावान् वाक्यमाश्रयेत् ॥३॥
न पुरो गुरुवाक्यानि गुरूक्तं परिपालयेत् ।
भिषजां वचनं कार्य्यं गुरूणाञ्च महात्मनाम् ॥४॥

गुरुवाक्यानीत्यत्र हन्यादिति शेषः ।

न तत्कृतं स्वयं कुर्यात्ते समिद्धानलार्चिषः[14] ।
अप्रस्तुतकथाक्षेपं यः कुर्य्यादग्रतो गुरोः ।
स ब्रह्महत्यामाप्नोति गुरुवाक्येषु निश्चयः ।।५॥
[यः श्रुत्वा अन्यतः][15] शास्त्रं संस्कारं प्राप्य वा शुभम् ।
अन्यस्य जनयेत् कीर्त्तिं गुरोः स ब्रह्महा भवेत् ॥६॥
विस्मरेच्चाथ वा मौग्ध्याद् योऽपि शास्त्रमनुत्तमम् ।
स याति नरकं घोरमक्षयं भीमदर्शनम् ॥७॥
यस्तु बुद्ध्वा नरः शास्त्रं[16] किञ्चित् कुर्य्याच्छुभाशुभम् ।
भवेच्छतगुणं तद्वै विज्ञानेभ्यो नरस्य[17] च ॥८॥

---

1 A यत्तेन
2 A परित्यागमतोद्धरेत् for the bracketed portion
3 A विवोधनिषेधः
4 A तुरं
5 I. O. क्षत्वा
6 A यत्नत्
7 A हितकारकम्
8 I. O. यत्नात्वा
9 A चाभिमुख
10 A अन्योन्य॰
11 I. O. सूत्रेष, सूत्रायां
12 A अर्थम् for वाक्यम्
13 A गुरुर्नऽऽव्याख्यानान्ते for the bracketed portion
14 I. O. समिद्धानलाग्निषः, A स समृद्धानवर्च्चिंसः
15 A यश्च श्रुत्वान्यतः for the bracketed portion
16 A शास्त्रं
17 I. O. रथस्य

अथ पाठक्रमः।

एवं विधानतो [वाच्यं पाठकेन विपश्चिता][1]।
तपःशमात्मकं स्वर्गधर्मादि[2]-फलसाधनम्।
शनैर्विविच्य[3] तद्वाच्यमध्यात्मादि च यद्भवेत् ॥६॥

तपःशमात्मकं ग्रन्थमध्यात्मप्रतिपादकञ्च शनैर्विविच्य[4] पठेत्।

क्रुद्धोक्तं युद्धसंक्षोभं त्वरायुक्तेन वाचयेत्।
सरागं ललितैर्वाक्यै[5]-र्वाचयेद्धृदयङ्गमैः।
नानाचिन्तार्थ[6]-रूपेण ललितेन [च वाचयेत्][7] ॥१०॥

सरागं शृङ्गारग्रन्थम्।

सर्गाध्यायसमाप्त्यैव[8] कथापर्यन्तमेव च[9]।
[10]प्रशस्तशब्दसंयोगे[11] कुर्यादिति विरामणम् ॥११॥

विरामणं पाठसमाप्तिः।

समाप्ते वचनेऽभीष्टं कुर्यादेव विचक्षणः।
अवधार्य जगच्छान्तिमन्ते[12] शान्त्युदकं सृजेत् ॥१२॥

शान्त्युदकं [13]शान्त्यर्थमुदकम्।

सुश्रुतं [14]सुव्रतं ब्रूयादस्तु व्याख्या तु[15] नित्यदा।
लोकः प्रवर्त्ततां धर्मे राजा चास्तु[16] सदा जयी[17] ॥१३॥
धर्मवान् धर्मसम्पन्नो गुरुश्चास्तु निरामयः।
इति प्रोच्य यथायातं[18] गन्तव्यञ्च विभावितैः ॥१४॥

अथ चिन्ताविधिः।

शिष्टैः परस्परं शास्त्रं चिन्तनीयं विचक्षणैः।
कथावस्तुप्रसङ्गेन नानाव्याख्यानभावनैः ॥१५॥

---

1 A वाक्यं वाचकेन परिस्थिता
2 I. O. सर्गस्वर्गादि०
3 I. O. ०विरोध्य
4 I. O. ०विपश्च
5 A वक्त्रैर् for वाक्यैर्
6 A वृत्तानु for चिन्तार्थ
7 A तथाचर्चयेत।
8 A ०समाप्तौ च
9 A वा
10 I. O. वायुप्रस्त for प्रशस्त
11 A ०संयोगात्
12 I. O. अन्त्ये for अन्ते, A omits it
13 I. O. शान्त्यामुदकं, A शान्त्यन्नमुदकं
14 A सुष्टुतं
15 I. O. त
16 I. O. वस्तु
17 I. O. जपी
18 I. O. यथागतं

युक्तिभिश्च स्मरेद्व्याख्यां चिह्नैश्चापि स्वयं कृतैः ।
एवं दिने दिने व्याख्यां शृणुयान्नियतो नरः ॥१६॥

अथ शास्त्रव्याख्यासमाप्तिकृत्यम् ।

समस्तशास्त्रश्रवणेन पुंसः[1] श्रद्धाप्रधानं भवतीह चेतः[2] ।
रागश्च [3]शास्त्राच्छमम्भ्युपैति दोषाश्च नाशं [4]निखिलेन यान्ति ॥१७॥
[5]यथाकथञ्चिच्छृणुयान्न शास्त्रमश्रद्धया वर्जितधर्मसन्धः[6] ।
ततः समाप्तावथ शास्त्रमार्गकथोदये[7] चापि विनीतबुद्धिः ॥१८॥
शक्त्यार्चयेद्-[8][वाचकमग्र एव गुरुञ्च][9]भक्त्या पितृवन्निकामम् ॥१६॥
एष [विद्याप्रदानस्य प्रधानो][10]विधिरुच्यते ।

अथ ब्राह्मणाय दानम् ।

अनेनैव विधानेन ब्राह्मणे शीलशालिनि ।
प्रबोधयति [11]धीयुक्ते विधिज्ञे[12] वेदवादिनि ।
प्रबोधयति व्याख्यातरि[13] ।
विन्यस्येत शुभं शास्त्रं महाभोगजिगीषया ॥२०॥

अनेनैव विधानेनेति यथा देवाय निवेदने विधिरुक्तस्तथैव ब्राह्मणायापि[14] गृहं नीत्वा विद्यां[15] दद्यादित्यर्थः ।

अथ शास्त्रानुष्ठानम्[16] ।

धनैर्वा विपुलैर्वस्त्रैः-[17]गुरुं कृत्वा सुतर्पितम् ।
अध्यापयेच्छुभान् शिष्यानभिजातान् सुमेधसः ॥२१॥

1 I. O. युक्तः
2 I. O. भवद्गीयचेतः
3 A शास्त्राशममन्वपैति, I. O. शास्त्राच्छतमभ्युपैति
4 A निखिला प्रयान्ति
5 I. O. कथा
6 A ॰संघं
7 A ॰कावाद्ये
8 I. O. शक्त्यार्चयेद
9 A वाचकमग्रादेव आचार्य for the b. p.
10 I. O. विद्याप्रधानस्य प्रदाने for the b. p.
11 I. O. वायुक्त
12 A विविक्ते
13 A व्याख्याताति
14 I. O. ब्राह्मणापि
15 A omits विद्यां
16 I. O. शास्त्रानुष्ठानं
17 A ॰गुरुः कृत्वा सभार्पितं

एतेन यथाप्रसिद्ध-[1]शास्त्रानुष्ठानमुक्तम् । [तथा च शास्त्रदानं]²सङ्कल्पयेत् ।

अथ विद्यादानफलम् ।

एवं विद्याप्रदानन्तु सर्वदानोत्तमं स्मृतम् ।
सर्वदा सर्वदानानां [3]नरकोत्प्लवमुत्तमम् ॥१॥
अनेन विधिना दत्त्वा विद्यां [4]धर्मपरो नरः ।
फलं दशाश्वमेधानां शतस्य सुकृतस्य च ॥२॥
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत्फलं लभते मर्त्यो विद्यादानेन भाग्यवान्[5] ॥३॥
[सर्वशस्यसुसम्पूर्णां सर्वरत्नोपशोभिताम् ।
ब्राह्मणेभ्यो महीं दत्त्वा ग्रहणे चन्द्रसूर्ययोः ।
यत् फलं लभते मर्त्यो विद्यादानेन तत्फलम्][6] ॥४॥
यावदक्षरसंख्यानं विद्यते शास्त्रशंसने ।
तावद्वर्षसहस्राणि स्वर्गे विद्याप्रदो वसेत्[7] ॥५॥
यावन्त्यः पङ्क्तयस्तत्र पुस्तकेऽक्षरसंश्रिताः ।
तावतो नरकात् [8]कुल्यानुद्धृत्य नयते दिवम् ॥६॥
यावच्च पत्रसंख्यानं पुस्तके विद्यते शुभम् ।
[9]तावद्युगसहस्राणि सकुलो[10] मोदते दिवि ॥७॥
यावच्च पातकं तेन कृतं जन्मशतैरपि ।
तत्सर्वं नश्यते तस्य विद्यादानेन देहिनः ॥८॥
स जातो मनुजो लोके स धन्यः स तु बुद्धिमान् ।
यो [11]विद्यादानसम्पर्कप्रसक्तः पुरुषोत्तमः ॥९॥

1 I. O. ०ग्रन्थानु०, A ०मन्त्रानु०
2 I. O. तदा च सर्वदानं, A तथा च मन्त्रदानं
3 I. O. नरकात्०
4 A पुण्यपरो
5 A केवल°
6 A omits the bracketed portion
7 A भवेत्
8 A वंश्यानुद्धृत्य
9 A तावद्वर्ष०
10 A सकुले, I. O. सकुलौ
11 A विद्यादानतः सम्यक्प्रसक्तः

यथाविभवतो दत्त्वा विद्यां शाठ्यविवर्जितः ।
याति पुण्यमयान्[1] लोकानक्षयान् [2]भोगभूषितान् ॥१०॥
[3]येऽपि एवं मसीपात्रलेखनी-[4]सम्पुटादिकम् ।
[5]दद्युः शास्त्राभियुक्ताय तेऽपि विद्याप्रदायिनाम् ।
यान्ति लोकान् शुभान् मर्त्याः पुण्यभाजो महाधियः[6] ॥११॥
इति विद्याप्रदानस्य महाभाग्यं प्रकीर्तितम् ।
श्रुत्वैतत् पातकैर्मुच्येन्नियतं[7] सप्तजन्मजैः ॥१२॥

अत्र वेदाश्चत्वारस्तदङ्गानि च शिक्षाकल्पनिरुक्तच्छन्दोज्योतिषव्याकरणानि धर्मशास्त्रं [8]मन्वादिस्मृतिसंहितारूपम् । पुराणानि [9]ब्रह्मादीनि कर्मब्रह्मात्मिका च मीमांसा न्यायश्चेति चतुर्दशविद्याः । उपविद्याश्च कृषिविद्या-शिल्पविद्या-[10]कलाविद्याप्रमुखविद्या यथायथमुन्नेयाः । तदासां विद्यानां मध्याद् यथेष्टं[11] विद्यामुक्त-[विधायतनं नीत्वा स्वेष्टदेवाय][12] निवेदयेत् । तद्यथा—यजमानः शुभनक्षत्रयुक्तं दिनमनुसन्धाय गृहं सुदृढं [13]सुस्तम्भं सुधालिप्तभित्तिकं निःसन्धि घटयित्वा तत्र यथेच्छदेवताप्रतिमां स्थापयित्वा लेखयित्वा वा नानापुष्प-[14]नानातरुपल्लवालङ्कृतं [15]सुधूपावासितम् [उपरिविततचन्द्रातपं च][16] तद्गृहं कृत्वा तत्र महेश्वरं ब्रह्माणं जनार्दनञ्च प्रतिमासु स्थण्डिले वा [17]आवाहनपूर्वकं सम्पूज्य यथाविधि वृद्धिश्राद्धं कृत्वा यथेष्टसंख्यान् ब्राह्मणानभ्यर्च्यास्मिन् विद्या[18]-लिखनारम्भे पुण्याहं भवन्तो ब्रुवन्त्विति वदेत् । पुण्याहमिति तैस्त्रिः प्रत्येकमुक्ते स्वस्ति भवन्तो ब्रुवन्त्विति वदेत् । [19][स्वस्तीति तैस्त्रिः प्रत्येकमुक्ते ऋद्धिं भवन्तो ब्रुवन्त्विति वदेत्]। ते च ऋद्ध्यतामिति प्रत्येकं त्रिर्ब्रूयुः । ततो **नागरलिपिज्ञं** तदसम्भवे लिप्यन्तरज्ञमपि वा स्नातं लेखकं यथाशक्ति हैम-

1 A पुण्यसमा
2 A तोय०
3 A येसपरं
4 I. O. ०संपद्रादिकं
5 I. O. दद्युः
6 I. O. महाधिपः
7 I. O. निरयं
8 I. O. मन्वादिस्मृति०
9 A ब्राह्म्यादीनि
10 A omits कलाविद्या
11 A यथेष्ट
12 A विधिना यत्राम्नीत्वा अष्टदेवाय देवान्तराय वा for the bracketed portion
13 I. O. गुप्तं
14 A omits नाना
15 I. O. सुधूपाधिवासितं
16 A उपरितचन्द्रातपां for the bracketed portion
17 A मन्त्रावाहनपूर्वकम्
18 A ऋषिशिक्षादि for ऋषिन विद्या
19 I. O. omits the bracketed portion

केयूराङ्गुरीयकं[1]-शुक्लवस्त्रमाल्यादिभिरर्चयेत् । लेखकस्तु शुक्लमाल्याम्बरधरो[2]ऽलङ्कृतः प्राङ्मुखो यथोक्तं [3]सरयन्त्रमारोप्य तत्र लेख्यं शास्त्रं यथोक्तं पत्रसञ्चयञ्च स्थापयित्वोक्तविधिना मसीं कृत्वा तत्पूर्णभाण्डे यथोक्तलेखन्या मसीमादाय तूर्य्यघोषपूर्वकं लेखनीयशास्त्रस्यादौ पञ्चदश वा श्लोकान् लिखेत् । ततोऽपरस्मिन्नपि दिने शुभवेलायां पूर्ववत् पुण्याहवाचनतूर्य्यघोषपूर्वकं लिखेत् । एवञ्च क्रमेण शास्त्रं लेखयित्वा लिखनसमाप्तिदिने पुण्याहादिवाचनं ब्राह्मण-भोजनादिकञ्च कुर्यात्[4] । ततो यथोक्तक्रमेण [5]शोधयित्वा [6]शलाकाडोरपट्टिकादिना पुस्तकरूपं कृत्वा वस्त्रेणाच्छाद्य शक्तितश्चतुर्दोलं दोलायानं[7] गजमश्वं रथं वा [8]श्वेतवस्त्रादिशोभितं [9]मुकुटरत्नालङ्कृतं घण्टाचामरपताकाद्यन्वितं विधृत-[10]यथाशक्त्यपात्तरत्नमय-[11]दण्डातपत्रमुप-कल्प्य तत्र लिखितं पुस्तकमारोप्य नृत्यगीतवाद्यमङ्गलघोषवेदध्वनिभिर्देवायतनं नयेत् । तत्र [12]च तं देवं सम्पूज्य तदग्रतः पुस्तकं स्थापयित्वा देवाय निवेदयेत् । [13]तद् यथा—ॐ अद्य पुण्येऽहनि श्रीमदमुकभट्टारकाय मत्पितृ-[14]गत-नन्दिपुराणोक्तामुकविद्यादानफलप्राप्तिकामोऽह-मेतद्विद्याध्ययनसिद्ध्यर्थमेतां विद्यां ददानि । ततः शिवभक्तेभ्यो देवान्तरभक्तेभ्यश्च यथेच्छ-संख्यब्राह्मणेभ्योऽभीष्टसंख्यं सुवर्णं दद्यात् । तद् यथा—कृतैतद्दानप्रतिष्ठार्थं [15]युष्मभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । स्वस्तीति ब्राह्मणा ब्रूयुः । बान्धवोद्देशदाने तु मत्पितृपद-स्थाने अमुक-[16]सद्बन्धुपदनिवेशो विशेषः । [17]स्वोद्देशेन दाने तु [18]मत्पितृपदं [19]सद्बन्धुपदञ्च पूर्वनिवेदन-[20]वाक्येनैव प्रयोज्यम् । ततो यथाशक्ति यथोक्तं वाचकमुपाध्यायञ्च सुवर्णादिभिः परितोष्य गुरुवाचकयोर्निर्वाहाय वृत्तिमुपकल्प्य तदा तस्मिन्नायतने श्रोतॄन् पुराणानि शास्त्राणि च श्रावयेदध्यापयेच्च । पाठसमये पाठकं पुष्पधूपाभ्यां पूजयेत् । शास्त्रनिवेदनदिने यथायथं नृपत्न्यादयो यथाशक्ति पौरपरितोषणहट्टरथ्यादिशोभागीतनृत्यवाद्यादीन्नगरादिषु कारयेयुः । ततः श्रोतारो यथोक्तक्रमेण[21] श्रवणं कुर्युः । [22]चिन्तयेदनुदिनं पाठसमाप्तौ च[23] पाठको

---

1 A and I. O. अङ्गुलीयक
2 A माल्याबम्री
3 I. O. सरपत्र०. A श्रिवयन्त्र०
4 A कुर्युः
5 A लिखयित्वा
6 I. O. शलाद्दोरपट्टिकादिना
7 A चतुर्दोलकं दोलायां
8 A नेतवस्त्रादि०, I. O. नेत्रवस्त्रादि०
9 A बहुरत्नाशोभितं
10 A omits यथा
11 I. O. ०दण्डातपमुपकल्प्य, A दण्डात्-पत्रमुपकल्प्य
12 I. O. omits च
13 I. O. omits तद् यथा
14 A ०गतमन्दिपुराणोक्ता०
15 A तुभ्यमहं
16 A सम्बन्ध for सद्बन्धु
17 A स्वदेय
18 I. O. पितृपदं, A मपितृदपदं
19 A तद्बन्धुपदञ्च
20 I. O. omits वाक्यमैव
21 I. O. यथोक्तजमेन
22 A चिन्तयेद् यच्च अनुदिनं
23 I. O. omits च

यथोक्तं [1]जगच्छान्त्याद्यवधारणं कुर्य्यात्। [2]शास्त्रपरिसमाप्तौ च श्रोतारोऽपि [3]वाचकपूजा-पूर्वकं गुरुमर्चयेयुः। अध्यापकत्वादिगुणयुक्तब्राह्मणाय दाने तु पूर्वोक्तक्रमेणैव[4] यथोक्त-ब्राह्मणगृहं नीत्वा तं ब्राह्मणमभ्यर्च्य तस्मै दद्यात्। तत्र दानवाक्ये श्रीमदमुकभट्टारकायेति स्थाने[5] अमुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमिति देवतानिवेदन-[6]दान-वाक्याद्विशेषः। प्रतिग्रहीता च स्वस्तीत्युक्त्वा सावित्रीं पठित्वा विद्येयं ब्रह्मदैवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। [7][ततो दक्षिणादानम्।] [8]ॐ अद्य कृतैतद्दान-प्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। ब्राह्मणः स्वस्तीत्युक्त्वा पुस्तकं[9] स्पृशेत्। ब्राह्मणेभ्यश्च देवतानिवेदनवत् दक्षिणादानम्। ततः पूर्ववद् गुर्वादि-परितोषणावृत्त्युपकल्पनपूर्वकं तद्ब्राह्मणगृह एव [10]यथेच्छकालमध्यापनादि कारयेत्। [11]सत्र-दाने च यथाशक्तीष्टकादिना गृहं निर्माय यथाशक्ति बहुभिर्वस्त्रकाञ्चनादिभिरुपाध्यायम-भ्यर्च्य[12] [13]यथेच्छकालमभीष्टविद्याध्यापनं सङ्कल्पयेत्। तद् यथा—ॐ नन्दिपुराणोक्ता-मुकविद्यादानफलप्राप्तिकामोऽहमेतदमुकविद्याध्यापनं कारयिष्ये[14]। ततो [15]वृत्त्युपकल्पन-मुत्सवादिकरणञ्च पूर्ववत्। विद्यादानशक्तस्तु तत्तद्विद्यालिखनोचित-मसीपात्र-लेखनी-नख-रञ्जनीपुस्तकवाहनाय[16] संपुटादिकं नन्दिपुराणोक्तफलसिद्धिकामनया[17] तत्तद्विद्याभियुक्तेभ्यो यथा-शक्ति दद्यात्। एतच्च विद्यादानं यथोक्तपुस्तकलिखनादि[18]-क्रमव्यतिरेकेणापि यथाकथञ्चित् पुस्तकमुपादायाविधिनैव कुर्य्यात् पूर्वत्राविधानत इति श्रुतेः। विष्णुधर्मोत्तरेऽप्येतदुक्तम्।

तथा च विष्णुधर्मोत्तरम् (३।३०३।५-७) :—

वेददानादवाप्नोति सर्वयज्ञफलं नरः।
उपवेदप्रदानेन[19] गन्धर्वैः सह मोदते ॥१॥

---

1 I. O. गजच्छन्त्याद्यवधारणं
2 A शास्त्रसमाप्तौ
3 I. O. श्रोतारो
4 A पूर्वोक्तक्रमेण च
5 A omits स्थाने
6 A वाक्ये for दानवाक्याद्
7 A reads the bracketed portion after दक्षिणादानम्, two lines below.
8 I. O. omits ॐ
9 A omits पुस्तकं
10 A यथाकाल०
11 I. O. अवदाने, A संप्रदाने
12 I. O. ०रुपाख्यायदभ्यर्च्य
13 A यथेष्ट०
14 A करिष्ये
15 I. O. मृत्युपकल्पनस्वमेवादिकरणञ्च
16 I. O. वह्निर्म्मतयत्न for वाहनाय
17 I. O. ०सिद्धिमभिधाय
18 I. O. ०लिखनादि०
19 I. O. ०प्रधानेन

[1]वेदाङ्गानां [2]प्रदानेन शक्रलोकमवाप्नुयात् ।
धर्मशास्त्रप्रदानेन धर्मेण सह मोदते ॥२॥
[3]सिद्धान्तानां प्रदानेन मोक्षमाप्नोत्यसंशयम् ।
[4]शास्त्राणि दत्त्वा चान्यानि[5] नरो [6]लोके महीयते ॥३॥

सिद्धान्ताश्च योगियाज्ञवल्क्येनोक्ताः । तथा च योगियाज्ञवल्क्यः :—

हैरण्यगर्भैः [7]कपिलैरपान्तरतमैस्तथा ।
सनत्कुमार-[8][ब्रह्मिष्ठैस्तथा पाशुपतैरपि] ।
[9]पञ्चरात्रैः सदोन्मुक्तैः सिद्धान्तैरत्र सप्तभिः ॥४॥ (२।६५क-६८क)

विद्यां यथेच्छं पुरुषस्य दत्त्वा
मन्त्रं शुभं [10][वाप्यथ वापि] शिल्पम् ।
[11]शिल्पस्य भाण्डं यदि वा द्विजेन्द्राः
प्राप्नोति [12]लोकान् मनसस्त्वभीष्टान् ॥५॥ (=वि, ध. ३।३०३।१५)

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे विद्यादानावर्त्तः ।

1 A प्रसङ्गेन
2 I. O. प्रधानेन —
3 A विद्यान्तानां
4 I. O. शस्त्राणि
5 A नाना
6 V. D. नाके
7 A कापिल रयान्तितवतयैस्तथा
8 A ब्रह्मादैस्तथा पाशुपतैरपि for the bracketed portion
9 A पञ्चरात्रै र्मदोत्मुक्तौ:, Yogi-yāj. पाञ्चरात्रैः सदोदुक्तैः
10 A वापि तथैव for the bracketed portion
11 I. O. मन्त्रस्य
12 A लोक मनस्त्वभीष्टान

अथ विष्णुदैवतकल्पदानावर्तः । (४४)

मत्स्यपुराणे (२६०।२-८, ६ख-१२, १८-१६) :—

कल्पानुकीर्त्तनं वक्ष्ये [1]सर्वपापप्रणाशनम् ।
यस्यानुकीर्तनादेव[2] वेदपुण्येन युज्यते ॥१॥

वेदपुण्येन वेदपाठपुण्येन ।

प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः ।
[3]वामदेवस्तृतीयस्तु ततो [4]राथन्तरः स्मृतः ॥२॥
रौरवः पञ्चमः प्रोक्तः [5]षष्ठः [6]प्राण इति स्मृतः ।
सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥३॥
सद्योऽथ नवमः [7]कल्प ईशानो दशमः स्मृतः ।
[8]तम एकादशः[9] प्रोक्तस्तथा सारस्वतोऽपरः ॥४॥
त्रयोदश उदानस्तु गारुडोऽथ[10] चतुर्दशः ।
कौर्मः [11]पञ्चदशो ज्ञेयः[12] [13]पौर्णमास्यामजायत ॥५॥
षोडशो नारसिंहस्तु [14]वामनस्तु ततोऽपरः[15]
आग्नेयोऽष्टादशः प्रोक्तः सोमकल्प-[16]स्ततः स्मृतः ॥६॥

---

1 M. P. महापातकनाशनं
2 A यस्यानुकीर्त्तनं वेद
3 Corrected from M. P. A वामदे०यस्तृतीयंस्तु, I. O. वाम-देवास्तृतीयस्तु
4 Corrected from M. P. A रथन्तरं, I. O. वाथन्तर
5 Both I. O. and A षष्ठप्राण for षष्ठः प्राण
6 M. P. देव
7 M. P. प्रोक्त
8 Corrected from M. P. I. O. ध्यान, A ०यग्न
9 A एकादश
10 A गारुडस्तु
11 M. P. पञ्चदशः प्रोक्तः
12 A राजन
13 Corrected from M. P. Both I. O. and A पौर्णमासी प्रजापतेः
14 M. P. समानस्तु
15 A ततः परः
16 M. P. ०स्तथापरः

मानवो विंशतिः प्रोक्तस्तत्पुमानिति चापरः ।
वैकुण्ठश्चापरस्तद्वल्लक्ष्मीकल्पस्तथापरः[1] ॥७॥
पञ्चविंश [स्ततो घोरो][2] वाराहस्तु ततोऽपरः ॥८॥
सप्तविंशोऽथ वैराजो[3] गौरीकल्पस्तथापरः ।
माहेश्वरस्ततः[4] प्रोक्तस्त्रिपुरं [5]यत्र घातितम् ॥९॥
पितृकल्पस्तथा-[6][न्ते तु या कुहू]र्ब्रह्मणः [7]पुरा ।
इत्येवं ब्रह्मणो मासः[8] सर्वपापप्रणाशनः[9] ॥१०॥
[10]आदावेव हि माहात्म्यं यस्मिन् [11]यस्य विधीयते ।
तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा ॥११॥
यस्तु[12] दद्यादिमान् कृत्वा [13]हेमान् [14]पर्वणि पर्वणि ।
ब्रह्मविष्णुपुरे [15]कल्पं मुनिभिः पूज्यते दिवि ॥१२॥
सर्वपापक्षयकरं कल्पदानं यतो भवेत् ।
मुनिरूपांस्ततः कृत्वा दद्यात् कल्पान् विचक्षणः ॥१३॥

अत्र प्रथमं त्रिंशतं कल्पान् सौवर्णमुनिप्रतिमारूपान् द्विजान् दक्षिणे अक्षसूत्रधरान् वामे कमण्डलुधरान् कृत्वा पौर्णमास्यमावास्याष्टमीद्वयचतुर्दशीद्वयरविसंक्रमणेषु क्रमेणैकैक-

M. P. adds the following after this:—चतुर्विंशतिमः प्रोक्तः सावित्रीकल्पसंज्ञकः, which portion was presumably wanting in the MS. of M. P., utilised by Ballāla Sena, as is evident from the last three lines of the accompanying prose comment on the next page.

Corrected from M. P. I. O. तितो घोरे and A तिमोंद्देशो for the b. p.

Corrected from M. P. I. O. सप्तविंशस्ततो राजा and A स्त... तो राजन्

4 M. P. ०स्तु स

5 I. O. पत्र

6 Corrected from M. P. Both I. O. and A न्यम्तु मानहृद for the b. p.

7 Corrected from M. P. I. O. and A स्मृत:

8 A मार्ग:

9 A प्रणशनः M. P. सर्वपातकनाशनः

10 A आचारेण

11 I. O. पश्य

12 A यस्य

13 I. O. हेमान्

14 A मुनीन्

15 M. P. वन्ध

शोऽभ्यर्च्य यजमानः शुचिर्ब्राह्मणायार्चिताय दद्यात्। तद् यथा—ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकदेवशर्मणे तुभ्यं मत्स्यपुराणोक्त-कल्प-दानफलप्राप्तिकामोऽहमेतं सुवर्णघटितं श्वेतकल्पं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा कल्पोऽयं विष्णुदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा कल्पं स्पृशेत्। एवं नीललोहितादिकल्पदानवाक्ये श्वेतकल्पपदस्थाने यथायथममुककल्पमिति विशेषः। वैकुण्ठश्चापरस्तद्वदिति वैकुण्ठनामैवापरोऽपरनामैव वेति [1]विनिगमनायां प्रमाणाभावात् दानवाक्ये [2]वैकुण्ठानन्तरं [3]त्रयोविंशं कल्पं ददानीति विशेषः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे कल्पदानावर्तः।

1 A गिगमा
2 A वैकुण्ठनामान्तर
3 I. O. वद्गीविंशत्

अथ प्रजापतिदैवत- प्रैष्यदानावर्तः । (४५)

महाभारते (अनु—२३।६८) :—

वैवाहिकानां द्रव्याणां [2]प्रैष्याणाञ्च युधिष्ठिर ।

दातारो वाससाञ्चैव पुरुषाः स्वर्गगामिनः ॥१॥

[3]प्रैष्याणामिति विशेषानुपादानाद्दासीदासमिथुनानामुपादानम् । [4]प्रैष्याणामिति बहुत्वं दातृबहुत्वापेक्षया । अत्र यजमानो ब्राह्मणायार्च्चिताय दासमर्च्चितं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुक[5]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं स्वर्गप्राप्तिकामोऽहमेतं दासं[6] ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा दासोऽयं प्रजापतिदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा दासं[7] हृदये स्पृशेत् । [8]दासीदासमिथुनदानवाक्ययोस्तु एतां दासीमेतद्दासमिथुनमिति विशेषः[9] ।

स्कन्दपुराणे :—

रथमश्वं गजं [दासीं कन्यां गृहं][10]-मथापि च ।

भूमिञ्च यः प्रयच्छेत[11] स राजा भुवि जायते ॥२॥

ब्राह्मणायार्च्चिताय दासीमर्च्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [12]भूमिराज्यप्राप्तिकामोऽहमेतां दासीं ददानि । स्वस्त्यादिस्तोकारान्तं पूर्ववत् । दासदाने तु एतं दासमिति विशेषः ।

आग्नेयपुराणे :—

एतद्विचार्य हृदये दासीं दद्याद्द्विजातये ।

स्थिरनक्षत्रसंयुक्ते [13]सोमे सौम्यग्रहान्विते ॥३॥

स्थिरनक्षत्रसंयुक्ते [रोहिण्यार्द्रयोरन्यतमनक्षत्रयुक्तेसोमे चन्द्रे][14] सौम्यग्रहान्विते × × ।

1, 2, 3 and 4 A प्रेष्य०, प्रष्याणाञ्च, प्रष्याणामिति and प्रेष्याणामिति

5 A' omits वेदामुक

6 A' omits दासं

7 A' omits दासं

8 A दासीदासजदानयोस्तु वाक्ये

9 I. O. शेषः

10 A दासं दासीं कन्या for the bracketed portion

11 A' प्रयच्छेच

12 A omits भूमि

13 I. O. सोम

14 I. O. रोहिण्युत्तरात्रयाणामन्यतमनक्षत्रस्थे for the b. p.

[1]दानकालं प्रशंसन्ति सन्तः पर्वणि वा पुनः ।
अलङ्कृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा ॥४॥
इयं दासी मया तुभ्यं श्रीवत्स[2] प्रतिपादिता ।
सदा कर्मकरी [3][योज्या यथेच्छं] भद्रमस्तु ते ॥५॥
दत्त्वा क्षमापयेत् पश्चात् [4]ब्राह्मणं वस्त्रकाञ्चनैः ।
अनुगत्वा तु सीमायां विसर्जयेत्[5] द्विजं ततः ॥६॥

सीमायां गृहसीमायां गृहद्वार इत्यर्थः ।

एवं दत्त्वा महाराज कृतकृत्यो भवेत् पुमान् ।
इहलोके परे चैव सप्तजन्मान्यखण्डितः ॥७॥

उक्तानामन्यतमे समये वस्त्रैर्भूषणैश्चालङ्कृतां दासीमर्चितामर्चिताय ब्राह्मणाय इयं दासी [6]मयेति मन्त्रं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त[7]-नियतसमयविहित-दासीदानफलप्राप्तिकामोऽहमेतां वस्त्रैर्भूषणैरलङ्कृतां दासीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । ततो यजमानो ब्राह्मणं पुनर्वस्त्रैः काञ्चनैश्चाभ्यर्च्य क्षमस्वेत्युक्त्वा [8]सीमामनुगम्य विसर्जयेत् ।

[9][वामनपुराणे (६५।४ः) ब्राह्मणाय दानानुवृत्तौ :—

दासीं दासमलङ्कार-[मन्नं षड्रस][10]-संयुतम् ।
[11]पुरुषोत्तमप्रीत्यर्थं प्रदेयं[12] सर्वकालिकम् ॥८॥

ब्राह्मणायार्चिताय दासीमर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पुरुषोत्तमप्रीतय एतां दासीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।]

तथा :—

गृहकर्मकरीं दद्यात्तरुणीं रूपशालिनीम्[13] ।
बहुद्रव्योपसंयुक्तां ग्रामवेश्मसमन्विताम् ॥९॥

1 A reads the entire line as शुभाशुभाविभेदेन कालं प्रशंसन्ति सन्तः पर्वणि व पुरा
2 Both I. O. and A श्रीवत्स
3 A तोष्या यथेष्टं for the b. p.
4 I. O. ब्राह्मणे वस्त्रकाञ्चनैः
5 I. O. वर्जयेत
6 A ममेति
7 I. O. आग्नेयपुराणो
8 A सीमान्तमनु०
9 A reads the bracketed portion between पूर्ववत् and दास दाने, two lines above आग्नेय, पुराणे on the previous page
10 A omits the bracketed portion
11 I. O. and A पुरुषोत्तमस्य प्रीत्यर्थं Vāmana P. पुरुषोत्तमतुष्ट्यर्थं
12 A देयं
13 A omits रूपशालिनीम्

[1]बहुद्रव्योपसंयुक्तां [2]पानीयपात्र शय्यामुषलोदूखल-वस्त्रालङ्कार-रन्धनसामग्री[3]-गृहवासोचितद्रव्यसहितामित्यर्थः ।

दासीं समीक्ष्य बहुशो गृहकर्मदक्षां यो ब्राह्मणाय कुलशीलवते ददाति ।
विद्याधराधिपतिभिः[4] प्रतिपूजितोऽसौ मर्त्यः प्रयाति [5]सुरैः सह मर्त्यलोकम् ॥१०॥

ब्राह्मणाय कुलशीलवतेऽर्चिताय उक्तरूपां गृहवासोचितद्रव्यसहितां गृहयुतां ग्रामसहितां दासीमर्चिताम् ॐ अद्यादि[6] तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त-ग्रामादियुक्त-दासीदानफलप्राप्तिकामोऽहमेतां बहुद्रव्योपसंयुक्तां ग्रामवेश्मसमन्वितां दासीं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्व्ववत् ।

विष्णुधर्मोत्तरे (३।३१२।२ख) :—

दासं कर्मकरं दत्त्वा गोसवस्य फलं लभेत् ।

अर्चिताय ब्राह्मणाय कर्मकरणक्षमं दासमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । गोसवफलप्राप्तिकामोऽहमेतं दासं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

तथा दासदानानुवृत्तौ (३।३१२।३क) :—

स याति शक्रसालोक्यं[7] यस्तु योग्यं[8] प्रयच्छति ॥११॥

[9]योग्यं कर्मकुशलम् । अर्चिताय ब्राह्मणाय [10]कर्मकुशलं दासमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [11]शक्रसालोक्यप्राप्तिकामोऽहमेतं दासं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्व्ववत् ।

तथा (३।३१२।३ख-४क):—

यस्तु कर्मकरीं दासीं ब्राह्मणाय प्रयच्छति ।
लोकास्तु सुलभास्तस्य वसूनां समुदाहृताः ॥१२॥

ब्राह्मणायार्चिताय कर्मकरणक्षमां दासीमर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [वसुलोकप्राप्तिकामोऽहमेतां दासीं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।][12]

1 I. O. यज्ञद्रव्योपसंयुक्ता
2 A पानीयपात्रं पतिग्रह्याशलोदूखल०
3 I. O. ०सामग्रिकादि०
4 I. O. विद्याधराधिपतिभिः
5 A सुरैः मर्त्यलोके
6 A omits अद्यादि
7 A स जाति शक्रसायुज्यं
8 I. O. and V. D. योधं
9 I. O. योधं युद्धकुशलं
10 I. O. युद्धकुशलं
11 A शक्रसायुज्यप्राप्तिकामो०
12 A omits the bracketed portion

तथा (३।३१२।४ख-५क) :—

[[1]तरुणीं रूपसम्पन्नां दासीं यस्तु प्रयच्छति ।
[2](सोऽप्सरोभिर्मुदा युक्तः क्रीड़ते नन्दने) वने ॥१३॥][3]

ब्राह्मणायार्च्चिताय तरुणीं रूपसम्पन्नां[4] दासीमर्च्चिताम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इति मन्त्रमुक्त्वा दद्यात् । विष्णुधर्म्मोत्तरोक्त-तरुणीदासीदानफलप्राप्तिकामोऽहमेतां दासीं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्व्ववत् ।

इति महाराजाधिराजनिःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [5]प्रैष्यदानावर्त्तः ।

1 A तरुणीं
2 A अप्सरोभिर्युतस्तत्र क्रीडते नन्दने for the bracketed portion
3 A reads the bracketed portion just before यस्तु कर्मकरीं दासीं, six lines above
4 A रूपवतीं
5 A प्रेस्य०

अथ प्रजापतिदैवतशस्य[1]-दानावर्त्तः । (४६)

मनुः (४।२३२) :—

धान्यदः शाश्वतं सौख्यम् ॥१॥

आप्नोतीति सम्बन्धः । अत्र यजमानोऽर्च्चिताय ब्राह्मणायार्च्चितं यथेच्छसंख्यं धान्यं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं शाश्वत-सौख्यप्राप्तिकामोऽहमेतद्धान्यं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा धान्यमिदं प्रजापतिदैवतमित्युक्त्वा[यथाशाखं कामस्तुति [2](पठेत् । ततः ॐ) अद्य कृतैतद्दान-प्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा][3]धान्यमुष्टिं गृह्णीयात् ।

महाभारते (अनु—२३।१०१) :—

रसानामथ बीजानां धान्यानां [4]वा युधिष्ठिर ।

स्वयमुत्पाद्य[5]दातारः पुरुषाः स्वर्गगामिनः ॥२॥

बीजानां शाककुष्माण्डादिबीजानां कलमादीनां स्वयमुत्पाद्य [6]कृष्यादिना अर्च्चिताय ब्राह्मणायार्च्चितानि यथोक्तबीजानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्वर्गप्राप्तिकामोऽह-मेतानि बीजानि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् । एवं धान्यदाने[धान्यं ददानीति][7] वाक्ये विशेषः ।

तथा :—

धान्यं[8]श्रमेणार्जितवित्तसञ्चितं [9]विप्रे सुशीले प्रतियच्छते यः ।

वसुन्धरा तस्य भवेत् [10]सुतुष्टा धारा वसूनां प्रतिमुञ्चतीति ॥३॥

श्रमेणार्जितवित्तसञ्चितं स्वयं वाणिज्यादिलब्धधनेन क्रीतम् । अर्च्चिताय ब्राह्मणायार्च्चितं

---

1 A ०सम्य०
2 A पठित्वा for the bracketed portion
3 I. O. omits the bracketed portion
4 A च युधिष्ठिर:
5 A नेतार:
6 A नै कृष्यादिना
7 A धान्यददानीति for the bracketed portion
8 A क्रमे०
9 A [illegible]
10 A सुतुष्टा[illegible]

यथोक्तधान्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-श्रमार्जित-वित्तसञ्चित-धान्यदानफल[1]-प्राप्तिकामोऽहमेतद्धान्यं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

स्कन्दपुराणे :—

[2]ओषधीर्यः प्रयच्छेत धान्यानि विविधानि च।
स [3]सर्वकामसंयुक्तः सोमलोकं समश्नुते ॥४॥
तत्र वर्षसहस्राणि सप्त स्थित्वा[4] पुनर्नरः।
[5]इह सर्वधनोपेतो [6]भोगवानभिजायते ॥५॥

ओषधयो [7]ग्राह्याः परिभाषोक्ताः। धान्यानि विविधानि कलमादीनि। अर्चिताय [8]ब्राह्मणायार्चिता यथेच्छमोषधीः ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्तौषधी-दानफलप्राप्तिकामोऽहमेता ओषधीर्ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। धान्यदाने[9] तु वाक्ये[10] ओषधीपदस्थाने धान्यपदनिवेशो विशेषः।

विष्णुधर्मोत्तरे (३।३१४।१) :—

धान्यानामुत्तमं दानं कथितं द्विजपुङ्गवाः[11]।
धान्येभ्योऽपि परं धान्यं रक्तशालिः प्रकीर्तितः ॥६॥

द्विजपुङ्गवा[12] इति सम्बोधनम्।

रक्तशालिं नरो दत्त्वा सूर्यलोके महीयते। (३।३१४।२क)

[13]अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं रक्तशालिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्ष-सूर्यलोकप्राप्तिकामोऽहमेतं रक्तशालिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१४।२ख) :—

दत्त्वा तथा सुगन्धांश्च गन्धर्वैः सह मोदते ॥७॥

अत्र धान्यप्रकरणात् सुगन्धानिति सुगन्धिशालयो बोद्धव्याः। अर्चिताय ब्राह्मणायार्चितान् यथेच्छसंख्यान् गन्धशालीन्[14] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्ष-गन्धर्वलोकप्राप्तिकामोऽहमेतान् गन्धशालीन् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

1 I. O. omits फल
2 A ओषधिर्यस्य यच्छेत
3 I. O. सर्वकालसंयुक्तः
4 A स्थित्वा गत्वा for सप्त स्थित्वा
5 A तत्
6 A भोगान्वित जायते
7 I. O. युक्तादाः
8 A ब्राह्मणा।चिता
9 I. O. धान्यधाने
10 A वाक्य
11 A द्विजपुङ्गवः
12 A द्विजपुङ्गव
13 A omits अर्चिताय ब्राह्मणाय
14 I. O. गन्धशीलान्

तथा (३।३१४।३क) :—

कलमानां प्रदानेन सोमलोके महीयते ।

अर्चिताय ब्राह्मणायार्चितान्[1] कलमान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्ष-सोमलोकप्राप्तिकामोऽहमेतान् कलमान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[2]महाशालेः प्रदानेन [3]वसूनां लोकमाप्नुयात् ॥८॥ (३।३१४।३ख)

महाशालिः स्वनामप्रसिद्धः । अर्चिताय ब्राह्मणायार्चितं महाशालिधान्यं यथेच्छ-परिमाणम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वसुलोकप्राप्तिकामोऽहमेतं [4]महाशालि-धान्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।४क) :—

काष्ठशालिं नरो दत्त्वा अलकायां प्रमोदते ।

काष्ठशालिर्गन्धहीनशालिः । अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं काष्ठशालिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [5]अलकावस्थानपूर्वकप्रमोदप्राप्तिकामोऽहमेतं काष्ठशालिं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।४ख) :—

व्रीहीणाश्चाद्यमानानां[6] दानात् स्वर्गमवाप्नुयात् ॥९॥

[व्रीहीणां षष्टिकेतर][7]-शरत्पक्वधान्यानाम् [8]आद्यमानानां [9]बहुपरिमाणानाम् । अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाण[10] व्रीहिम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [11]स्वर्ग-प्राप्तिकामोऽहमेतान् व्रीहीन् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।५क) :—

यवप्रदानेन नरः [12]शक्रलोके महीयते ।

अर्चिताय [13]ब्राह्मणायार्चितं यथेच्छपरिमाणं [14]यवम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षशक्रलोकप्राप्तिकामोऽहमेतं यवं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

1 A omits अर्चितान
2 A महाशालि प्रदानेन
3 A वसुलोकमवाप्नुयात्
4 A महाशालिं
5 A अलंकाराम for अलकावस्थान
6 I. O. व्रीहीनाश्चाद्यमानानां
7 A व्रीहिशालि ॐ अद्यादिस्तानि for the b. p.
8 I. O. आद्यमानानां
9 A उद्घपरिमाणानाम्
10 Both I. O. and A यथेच्छबहु-परिमाणं
11 A स्वर्गलोक for स्वर्ग
12 I. O. स्वर्गलोके
13 A omits ब्राह्मणाय
14 A omits यवम

तथा (३।३१४।५ख) :—

तथा गोधूमदानेन वसूनां लोकमाप्नुयात् ॥१०॥

अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं गोधूमम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वसुलोकप्राप्तिकामोऽहमेतं गोधूमं[1] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१४।६क) :—

प्रियो भवति लोकस्य प्रियङ्गुं यः प्रयच्छति।

[2]प्रियङ्गु कामनीति प्रसिद्धा। अर्चिताय ब्राह्मणायार्चितां यथेच्छपरिमाणां प्रियङ्गुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। लोकप्रियत्वप्राप्तिकामोऽहमेतां प्रियङ्गुं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

[तथा (३।३१४।६ख) :—

ददाति यस्तु श्यामाकं तस्य प्रीयन्ति देवताः ॥११॥

अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं श्यामाकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। देवताप्रीतिप्राप्ति[3]-कामोऽहमेतच्छ्यामाकं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।][4]

तथा (३।३१४।७) :—

अन्येषां शूकधान्यानां प्रदाननिरतो नरः।

स्वर्गलोकमवाप्नोति नात्र कार्य्या विचारणा ॥१२॥

अन्येषां शूकधान्यानामिति पूर्वोक्त-[5]शूकसहित-रक्तशालि-गन्धशालि-[6]काष्ठशालि-यव-गोधूमेभ्य इतरेषां प्रकृष्टशूकयुक्तानां नीवारादीनां [7]ते च लोकत एवानुसन्धेयाः। अर्चिताय ब्राह्मणायार्चितं[8] यथेच्छपरिमाणं शूकधान्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गलोक-प्राप्तिकामोऽहमेतच्छूकधान्यं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१४।८ क) :—

[9][मुद्गदः शक्रलोकन्तु।

लभत इति सम्बन्धः। अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं मुद्गम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। शक्रलोकप्राप्तिकामोऽहमेतं मुद्गं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

1 A एतद्गोधूमं for एतं गोधूमं
2 A प्रियङ्गुकामिनी प्रसिद्धा
3 A omits प्राप्ति
4 A reads the bracketed portion twice
5 A ०शूक०
6 A omits काष्ठशालि
7 A तेन
8 A omits अर्चितं
9 A reads the following for the bracketed portion :— माषदः शक्रलोकन्तु लभतेति सम्बन्धः

तथा (३।३१४।८ क) :—

यमलोकन्तु माषदः ॥१३॥

[1]लभत इति सम्बन्धः ।] अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं माषम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-माषदानफलप्राप्तिकामोऽहमेतं माषं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।६क) :—

षष्टिकानां प्रदानेन लोकं नैर्ऋतकं [2]लभेत् ।

षष्टिकाः [3]साठिया इति प्रसिद्धाः । अर्चिताय ब्राह्मणायार्चितान् यथेच्छपरिमाणान् षष्टिकान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नैर्ऋतलोकप्राप्तिकामोऽहमेतान् षष्टिकान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।६ख) :—

[4]सचीणचणके दत्त्वा लोकं वारुणमाप्नुयात् ॥१४॥

[5]सचीणः कलायः । अर्चिताय ब्राह्मणायार्चितं[6] यथेच्छपरिमाणं कलायम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वारुणलोकप्राप्तिकामोऽहमेतं [7]सचीणं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । चणकदाने तु एतं चणकमिति [8]वाक्ये विशेषः ।

तथा (३।३१४।१०क) :—

वायव्यञ्च मसूराणि राजमाषाणि धानदम् ।

[9]दत्त्वाप्नुयादिति सम्बन्धः । वायव्यं वायुलोकं धानदं धनदलोकम् । अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं मसूरम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वायव्यलोक-प्राप्तिकामोऽहमेतान् मसूरान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । राजमाषदाने तु धानदलोकप्राप्तिकामोऽहमेतानि [10]राजमाषाणीति वाक्ये विशेषः ।

तथा (३।३१४।१० ख) :—

अन्येषां [11]शिम्बिधान्यानां दानात् स्वर्गमवाप्नुयात्[12] ॥१५॥

---

1 I. O. लभतेति
2 A भवेत्
3 A शाठेयाः इति प्रसिद्धः
4 A षष्ठीनचनके
5 A षष्ठीन
6 A omits अर्चितं
7 A सठीनं
8 A वाक्यविशेषः
9 A दातापनुयादिति
10 A राजमाषाणि वाक्यविशेषः
11 A शिम्बधान्यानां, I. O. शिम्बिका-धान्यानां
12 I. O. स्वर्गमाप्नुयात्

अन्येषामिति [विष्णुधर्मोत्तरोक्त-मुद्ग]-[1]माष-तिल-कलाय-चणक मसूर-राजमाषेभ्यो व्यतिरिक्तानां सर्षपादीनाम्। ते च लोकत एव प्रसिद्धाः। अर्चिताय ब्राह्मणायार्चितं यथेच्छपरिमाणं शिम्बिधान्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [2]स्वर्गप्राप्तिकामोऽहमेतानि [3]शिम्बिधान्यानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे शस्यदानावर्तः।

1 A विष्णुधर्मोत्तर for the bracketed portion
2 A स्वर्गसिद्धि for स्वर्ग
3 A सिध्यशिम्बि for शिम्बि

अथ प्रजापतिदैवततिलदानावर्त्तः । (४७)

तत्र तिलदानप्रशंसा ।

महाभारते (अनु-६६।१०-११) :—

महर्षेः कश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेषु तिला[1] विभो[2] ॥१॥
पौष्टिका रूपदाश्चैव तथा पापविनाशनाः ।
तस्मात् सर्वप्रदानेभ्यस्तिलदानं विशिष्यते ॥२॥

अथ दानम् ।

याज्ञवल्क्यः (१।२१०) :—

[3]भूदीपाश्वान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।
नैवेशिकस्वर्णधूर्यान् दत्त्वा स्वर्गे महीयते ॥३॥

अथ यजमानोऽर्चिताय ब्राह्मणायार्चितान् यथेच्छपरिमाणान् तिलान् [4]दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुका[5]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्षस्वर्गप्राप्तिकामोऽह-मेतांस्तिलान् ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्री पठित्वा तिला एते प्रजापतिदैवता इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । [तत ॐ अद्य][6] कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा तिलमुष्टिं गृह्णीयात् ।

यमः :—

तिलप्रदः प्रजामिष्टां पुरुषः खलु विन्दति ।
माघे मासि विशेषेण[शुक्ले कृष्णे][7]विशेषतः ॥४॥

[अत्र कुत्रापि][8]दिनेऽर्चिताय ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अभिमतप्रजाप्राप्ति[9]-कामोऽहमेतान् तिलान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

1 I. O. तिलां
2 A प्रभो
3 I. O. भूद्दीपश्वान्न०, A भूद्दीप वस्त्रा-नम्भिलसर्पिषु प्रतिश्रयान्
4 I. O. omits दद्यात्
5 A omits वेदामुक
6 A तत्र for the bracketed portion
7 I. O. तत्र मिश्रे for the bracketed portion
8 I. O. अत्र चया for the bracketed portion
9 A प्राप्ति and I. O. प्रजा for प्रजाप्राप्ति

एषामेव माघे मासि शुक्लपक्षतिथौ दाने फलविशेषः । [1]तत्कृष्णपक्षतिथौ च ततोऽपि विशेषः । तत्र माघे मासि तिलदाने यथोक्तमाघमास[2]-विहिततिलदानफलप्राप्तिकामोऽहमिति वाक्ये विशेषः । [3]कृष्णपक्षतिलदाने तु [4]माघमासिककृष्णपक्षविहिततिलदानफलप्राप्ति-कामोऽहमिति वाक्ये विशेषः ।

[5]तथा :—

सर्वपातकसंघातः कामतो वाप्यकामतः ।
शुद्धिं तस्य प्रवक्ष्यामि[6] [स्वर्गसाधनमेव च ॥५॥
शुक्लैः कृष्णैः समैः स्निग्धैर्द्वात्रिंशदङ्गुलोच्छ्रितः ।
राशिस्तिलैः समे देशे कर्तव्यः पुरुषायतः ॥६॥

समैरिति तुल्यभागैः शुक्लैः कृष्णैस्तिलैर्मिलितैरित्यर्थः । स्निग्धैर्मनोहरैः पुरुषायतः [7]सम्प्रदातृपुरुषायतः ।

प्रतिमाष्टाङ्गुलो दातुः सौवर्णा विभवे सति ।
क्षौद्रेण पयसा दध्ना घृतेनापूरयेद् घटान् ॥७॥

प्रतिमा दातृप्रकृति[8]-रूपा दातुः सन्निहितत्वात विभवे सतीति श्रवणादशक्तावन्येनापि तैजसेन प्रतिमा कार्य्या ।

यथाविभवविस्तारं ब्राह्मणे श्रोत्रियार्थिनि ।
दद्यान्माघेऽथ वैशाखे विषुवे चोत्तरायणे ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥८॥

माघवैशाखयोरभीष्टदिने [9]विषुवोत्तरायणयोर्वान्यतरस्मिन् दिने यजमानः सुपरिमाणायतं द्वात्रिंशदङ्गुलोच्छ्रितं मधुदुग्धदधिघृतपूर्णघटचतुष्टयसहितमुपरिविन्यस्त-सौवर्णाष्टाङ्गुलात्म[10]-कृतिप्रतिमं पानीयशकटसमीकृतभूभागे समभागमिलित-शुक्लकृष्णतिलराशिमर्चितं कृत्वा अर्चिताय ब्राह्मणायार्थिने विद्यातपःशालिने ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । यमोक्त-द्वात्रिंशदङ्गुलोच्छ्रित-तिलराशिदानफलप्राप्तिकामोऽहमेतं द्वात्रिंशदङ्गुलोच्छ्रितं पुरुषायत-

---

1 A[1] omits तत्
2 A[1] omits माघमास
3 I. O. तत्तुमिश्र for कृष्णपक्ष
4 A माघे मासि for माघमासिक
5 A reads तत्र माघे मासि before तथा
6 A omits the bracketed portion
7 I. O. सम्प्रदातृ०
8 I. O. ०प्रकृति०
9 I. O. विषुवे चोत्तरायणोर्वा०
10 I. O. ०लात्मा०

मुपरिविन्यस्ताष्टाङ्गुलसुवर्णप्रतिमं क्षौद्रपयोदधिघृतपूर्णघटचतुष्टयसहितं तिलराशिं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

महाभारते :—

श्रूयतां वायवो धर्मः सरहस्यो महाफलः।
इमं कलियुगं प्राप्य मानवानां सुखावहम् ॥९॥
कल्यमुत्थाय यो मर्त्यः स्नातः शुक्लेन वाससा।
तिलपात्रं प्रयच्छेत ब्राह्मणेभ्यः समाहितः ॥१०॥
तिलपात्रे फलं प्राह भगवान् पाकशासनः।
गोप्रदानञ्च यः कुर्य्याद्भूमिदानञ्च शाश्वतम् ॥११॥
अग्निष्टोमञ्च यो यज्ञं यजेत बहुदक्षिणम्।
तिलपात्रं सहैतेन समं मन्यन्ति देवताः ॥१२॥

शुक्लेन वाससा तिलपात्रमाच्छाद्येत्यर्थः। ब्राह्मणेभ्य इति प्रयोगबहुत्वापेक्षम्। ततश्च प्रत्यहमिदं दातव्यम्। एवञ्च चिरामुष्मस्य (?) विष्टरफलत्वमुपपन्नं कल्यमुत्थायेत्यपि प्रत्यहकर्तव्यत्वार्थमुक्तं न तु प्रातःकाल एव कर्तव्यत्वार्थम्। अर्चिताय ब्राह्मणायार्चितं शुक्लवस्त्राच्छादितं तिलपूर्णपात्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्ततिलपात्रदानफलप्राप्तिकामोऽहमेतत् शुक्लवस्त्राच्छादितं तिलपात्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

[1]ब्रह्मपुराणे :—

ये तिलांस्तिलधेनुञ्च घृतधेनुमथापि वा।
विप्रेभ्यः श्रोत्रियेभ्यश्च ददाति श्रद्धयान्विताः ॥१३॥
सोममण्डलसङ्काशैर्यानैस्ते यान्ति निर्मलैः।
गन्धर्वैरुपगायन्तः पुरं वैवस्वतस्य च ॥१४॥

विप्रेभ्य इति बहुवचनं दातृबहुत्वापेक्षया। अर्चिताय विद्यासंस्कारशालिने ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यमगृहानुसर्पणकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

आग्नेयपुराणे :—

पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये।
यानमश्वमनड्वाहं हैमरूप्यमणीं स्तिलान् ॥१५॥

1 I. O. ब्राह्मपुराणे

ये प्रयच्छन्ति पापेषु निरताः सर्वदा मुने ।
न तेषां भैरवः पन्था दत्त्वैषां दानमित्युत ॥१६॥

उक्तदिनानामन्यतमेऽर्चिताय] ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्त-नियतसमयविहित-तिलदान-फलप्राप्तिकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

तिला नित्यं प्रदातव्या यथाशक्ति द्विजातये[1] ।
नित्यदानात सर्वकामा[2] भवन्ति स्वर्णसंयुताः ॥१७॥

अर्चिताय ब्राह्मणाय यथेच्छपरिमाणकाञ्चन-[3]युक्तानर्चितान् तिलान् प्रत्यहं[4] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुककामोऽहमेतान् स्वर्णसंयुतान् तिलान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

[5][विष्णुधर्मोत्तरे[6] :—

लवणस्य प्रदातारस्तिलानां सर्पिषान्तथा ।
ओजस्विनोऽभिजायन्ते भोगिनश्चिरजीविनः ॥१८॥

अर्चिताय ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त[7]-तिलदानफलप्राप्तिकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।]

विष्णुधर्मोत्तरे[8] (३।३१४।८ख) :—

यथेच्छं[9] लोकमाप्नोति [10]तथा विप्रास्तिलप्रदः ॥१९॥

विप्रा इति सम्बोधनम्। अर्चिताय ब्राह्मणायार्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुक-[11]देवलोकप्राप्तिकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्व्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे तिलदानावर्तः।

1 I. O. द्विजर्षभ
2 A सर्वकामान्
3 I. O. °युक्तामर्चिताम्
4 A omits प्रत्यहं
5 A reads the bracketed portion just above the colophon of this section
6 I. O. विष्णुधर्मे
7 I. O. विष्णुधर्मो क्त°
8 I. O. विष्णुधर्मे
9 A and V. D. यथेष्ट
10 A यथा
11 I. O. omits देव

अथ वनस्पतिदैवतारामदानावर्तः । (४८)

नन्दिपुराणे :—

क्रीडारामन्तु यो दद्यादुद्यानं[1] पुष्पसङ्कुलम्[2] ।
सकल्पतरुखण्डेषु[3] महेन्द्रोद्यानवेश्मसु ।
विनोद्यतेऽप्सरोवृन्दैर्देवसेचात्र युगं बुधः ॥१॥

अत्र यजमानः क्रीडोचितवापी[4] गृहादिसहितं [पुष्पितं वकुलचम्पकादिपादपोपेत][5]-मुद्यान-मर्चित[6]-मर्चिताय ब्राह्मणाय दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुक-देवशर्मणे तुभ्यं नन्दिपुराणोक्तोद्यानदानफलप्राप्तिकामोऽहमेतत् क्रीडारामोद्यानं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा उद्यानमिदं वनस्पतिदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । [तत ॐ अद्य][7] कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[8] काञ्चनं ददानि । प्रतिगृहीता स्वस्तीत्युक्त्वा यथेच्छं वृक्षमूलानि स्पृशेत् ।

महाभारते[9] (अनु—२३।६६) :—

विहारावसथोद्यान-[कूपारामसभाप्रदाः][10] ।
विप्राणाश्चोपकर्तारः[11] पुरुषाः[12] स्वर्गगामिनः ॥२॥

उद्यानं सर्वजनोपभोग्यं नानाजातीयतरु[13]-वनम् । आरामो ग्रामसमीपस्थसजातीयतरु-वनम् । उद्यानमारामं वा कारयित्वा सकलसत्त्वेभ्य[14] उत्सृज्य दद्यात् । ॐ[15] स्वर्गप्राप्ति-कामोऽहं नानासत्त्वेभ्यो यथासम्भवफल-[पुष्पाद्युपभोगार्थं][16]-मेतदुद्यानमुत्सृजे । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानीति कस्मैचिद्[17]ब्राह्मणाय दक्षिणादानम् । एवमारामदाने एतमाराममिति [18]वाक्ये विशेषः ।

---

1 A सगृह्यं
2 A पष्पसङ्कुलं
3 A ०सत्वेभ्य
4 A omits वापी
5 A वकुलचम्पकादिसपुष्पकल्पतरुपादप for the bracketed portion
6 A omits अर्चितम्
7 A ॐ for the b. p.
8 A एतत् for इदं
9 A omits महाभारते
10 I. O. सकूपारामसम्पदाः for the bracketed portion
11 I. O. विप्राणाञ्चैव कर्त्तारः
12 A पुरुषैः
13 A omits तरु
14 A सभ्या
15 A omits ॐ
16 A पुष्पोपयोग्य for the bracketed portion
17 A एतदन्ते after कस्मै चिद्
18 A वाक्यविशेषः

विष्णुधर्मोत्तरे यममार्गानुवृत्तौ :—

आराम-[दानात् संयान्ति][1] तथैव द्रुमरोपकाः ।
शीतलेन तु मार्गेण फलपुष्पवता सुखम् ॥३॥

यथाशक्त्याराममुपकल्प्यार्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त[2]-केवलारामदानफलप्राप्तिकामोऽहमेतमारामं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्व्ववत् ।

तथा :—

[3]आराममथ सोद्यानं नन्दने क्रीडते वने ॥४॥

दत्त्वेति [4]शेषः । अर्चिताय ब्राह्मणायार्चितमाराममुद्यानञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दनवनक्रीडा[5]-प्राप्तिकामोऽहमेतं[6] [7]सोद्यानमारामं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्व्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे आरामदानावर्तः ।

1 I. O. दाराम यन्ति for the bracketed portion
3 A विष्णुधर्मोक्त
4 A आत्मारामम्थ
4 A विशेष:
5 A नन्दनक्रीडावन॰
6 A एतत् for एतं
7 I. O. सोद्यामारा॰

अथ वनस्पतिदैवतवृक्षदानावर्तः । (४९)

महाभारते (अनु—५७।३६) :—

[1]पुष्पोपगं वाथ फलोपगं वा यः पादपं स्पर्शयते द्विजाय।
[2][स स्त्रीसमृद्धं]बहुरत्नपूर्णं लभत्ययत्नोपगतं[3] गृहं वै ॥१॥

पुष्पोपगं पुष्पप्रदं[4] फलोपगं फलप्रदम् । अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं पुष्पोपगं वृक्षं दद्यात् । ॐ [5]अद्यामुकसगोत्रायामुकवेदामुक[6]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं महाभारतोक्त-पुष्पोपगपादपदानफलप्राप्तिकामोऽहमेतं पादपं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पादपोऽयं वनस्पतिदैवत[7] इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा [8][वृक्षं मूलदेशे] स्पृशेत् । [9]फलोपगवृक्षदाने तु [10]वाक्ये पुष्पोपगपद[11]-स्थाने फलोपगपद[12]-[निवेशो विशेषः][13] ।

आदित्यपुराणे :—

स्कन्धेन [14]तारयेद् यस्तु [15]तृषार्तानां जलप्रदः ।
[16]पक्वान् ददाति [17]केदारान् [18]सफलांश्चैव पादपान् ॥२॥
षष्टि[19] कोटसहस्राणि अर्वुदानाञ्च वै [20]तथा ।
क्रीड़न्ति [21]ते श्वेतपुरे एतदुक्तं द्विजोत्तम[22] ॥३॥

1 A reads the entire line as follows :—पुष्पोपगश्चाथ फलोपगम्यः पादपस्प्रश्यते द्विजाय
2 A स स्त्रौसमृद्ध, M. bh. सस्त्रीकमृद्ध
3 Corrected from M. bh. A नभस्त्यपस्तावनतं, I. O. नभस्त्ययत्तोयलभं
4 I. O. पुष्पदं
5 A अद्यादि असुकगोत्रायामुक॰
6 A omits वेदामुक
7 I. O. ॰दैवतम
8 A वृत्तमूलदेश for the bracketed portion
9 A फलोपवृत्तदाने
10 A वाक्येषु
11 I. O. omits पद
12 I. O. omits पद
13 A निवेशः for the bracketed portion
14 A भारयेद
15 I. O. तृषात्तीनां
16 A पक्वान
17 A केदानान
18 A सफला चैव
19 A षष्टि
20 A वयं
21 A omits ते
22 I. O. द्विजोत्तमः

अर्चिताय ब्राह्मणायार्चितान्[1] यथेच्छसंख्यान् [2]सफलपादपान् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात्। आदित्यपुराणोक्त-पादपदानफलप्राप्तिकामोऽहमेतान् पादपान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

फलवृक्षन्तु[3] यो दद्याद् धर्ममुद्दिश्य मानवः।
स सर्वकामतृप्तात्मा गच्छेद्वरुणमन्दिरम्।
[4][वसेच्च तत्र] पुरुषो युगं कामफलान्वितः ॥४॥

अर्चिताय भगवते धर्मायार्चितं फलसहितं[5] वृक्षमाम्रादीना[6]-मन्यतमं दद्यात्। ॐ अद्य नन्दिपुराणोक्त-वृक्षदानफलप्राप्तिकामोऽहं भगवते धर्मायैतं फलवृक्षं ददानि। तत ॐ [7]अद्य कृतैतद्दानप्रतिष्ठार्थं धर्मायाहं दक्षिणामेतत्[8] काञ्चनं ददानि।

विष्णुधर्मोत्तरे (३।२६७।११क) :—

आम्राक्षोड[9]-प्रदानेन [10]सर्वान् कामानवाप्नुयात्।

अक्षोडः[11] स्वनामप्रसिद्धः। [12][आम्राक्षोडेत्यत्र द्वन्द्वनिर्देशो यद्यप्युभयोः] क्रियासम्बन्ध-मात्रेणैव उपपद्यते [13]तथाप्याम्रस्योत्तरत्रापि श्रवणादत्र च [14]फलभूयस्त्वान्मिलितयोरेव दानम्। अर्चिताय [15]ब्राह्मणायार्चितावाम्राक्षोडवृक्षौ [16]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुक-प्राप्तिकामोऽहमेतावाम्राक्षोडौ[17] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[18][तथा (३।२६७।१०ख) :—

दत्त्वा पालीवताम्रौ तु तृप्तिमाप्नोत्यनुत्तमाम् ॥५॥

पालीवतः पारेवत इति प्रसिद्धः। अर्चिताय ब्राह्मणायार्चितं पालीवतवृक्षम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अत्र तु तृप्तिकामोऽहमेतं पालीवतं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्। आम्रवृक्षदाने तु वाक्ये पालीवतपदस्थाने आम्रपदनिवेशो विशेषः।]

1 A यथेष्टसंख्यान्
2 A[1] फेलपादवपान
3 I. O. फलवृक्षस्तु
4 A omits the bracketed portion
5 A omits फलसहितं
6 A[1] आम्रमादीनाम् for आम्रादीनाम्
7 A omits अद्य
8 A omits एतत्
9 I. O. आम्राक्षोट-
10 A सर्वं
11 I. O. आक्षोटः
12 A आक्षोडेत्यत्र निर्देशो यद्यप्युभय for the bracketed portion
13 A तथाप्यस्योत्तरत्रापि
14 A फलभूतद for फलभूयस्त्वान्
15 A ब्राह्मणायार्चितो आक्षोडवृक्षौ
16 I. O. omits ॐ
17 A •क्षोडौ
18 A omits the bracketed portion

तथा [1]वृक्षदानप्रकरणे (३।२९७।९ख) :—

[2]नागरङ्गदानाद्भवति [3]नरो रूपसमन्वितः ।

अर्चिताय ब्राह्मणायार्चितं नागरङ्गं वृक्षम्[4] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [5][उत्कृष्टरूपप्राप्तिकामोऽहमेतं नागरङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।२९७।१०क) :—

बीजपूरकदानेन सौभाग्यं महदाप्नुयात् ॥६॥

अर्चिताय ब्राह्मणायार्चितं बीजपूरकं वृक्षम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।] महासौभाग्यप्राप्तिकामोऽहमेतं बीजपूरकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा :—

पुष्पदं फलदं वृक्षं दत्त्वा विप्राय भक्तितः ।
स्वर्गलोकपरिभ्रष्टो [6]नगराधिपतिर्भवेत् ॥७॥

पुष्पदं नागकेशरादिकं फलदं [7]कण्टकिफलादिकम् । अर्चिताय ब्राह्मणायार्चितं पुष्पदं वृक्षम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-पुष्पदवृक्ष[8]-दानफल-प्राप्तिकामोऽहमेतं वृक्षं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । फलदवृक्षदाने तु वाक्ये पुष्पद[9]-पदस्थाने फलदपदनिवेशो विशेषः ।

तथा (३।२९७।७ख-८क) :—

चम्पकं मल्लिकाजाती-[10][श्रेष्ठाः पुष्पाकरा मताः] ।
[11]अन्येभ्योऽधिकमाप्नोति दत्त्वैतान्नात्र संशयः ॥८॥

अर्चिताय ब्राह्मणायार्चितं चम्पकतरुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णु-धर्मोत्तरोक्त-चम्पकतरुदानफलप्राप्तिकामोऽहमेतं चम्पकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

1 I. O. omits वृक्ष
2 A नाना०
3 A नाना
4 A वृक्षान्तरं
5 A omits the bracketed portion but reads instead महासौभाग्यमाप्नोति बीजपूरस्य दानतः which is a paraphrase of the line viz. बीज...प्नुयात्, quoted within this bracketed portion
6 I. O. नागराधिपति०
7 A नाति for कण्टकि
8 I. O. omits वृक्ष
9 I. O. पुष्प for पुष्पद
10 A श्रेष्ठ पुष्पकला मता for the b. p.
11 A अन्येभ्योऽप्यधिकश्चैव

मल्लिकाजातीदानयोर्वाक्ये तु चम्पकपदस्थाने यथायथं मल्लिकापदनिवेशो जातीपदनिवेशश्च[1] विशेषः ।

तथा :—

गुल्मं [2]पुष्पप्रदं यस्तु [3]लतावासं प्रयच्छति ।
विमाने नन्दने सोऽथ क्रीडत्यप्सरसां गणैः ॥६॥

गुल्मोऽभिमुक्तादिः[4] लता नवमल्लिकादिः[5] । अर्चिताय ब्राह्मणायार्चितं पुष्पितं गुल्मम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तगुल्मदानफलप्राप्तिकामोऽहमेतं गुल्मं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । एवं पुष्पितनवमल्लिकादि[6]-दाने लतादानफलप्राप्तिकामोऽहमेतां[7] लतामिति वाक्ये विशेषः ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे वृक्षदानावर्तः ।

1 A ०निवेशो
2 A पुष्पं ददे
3 A लतां वास
4 I. O. गुल्मोतिमुक्तादि
5 I. O. नवमालिकादिः
6 I. O. ०मालिकादि०
7 I. O. एतं

अथ विष्णुदैवतसम्भारदानावर्तः। (५०)

यमः :—

यस्तु सम्भृत्य सम्भारं ब्राह्मणेभ्यः प्रयच्छति।

तस्य पुण्यकृतो[1] लोका न तस्य [2]प्रभवाम्यहम् ॥१॥

सम्भारो विवाहोपनयन-[3]यज्ञाद्युपकरणसामग्री। ब्राह्मणेभ्य इति बहुवचनं जात्यपेक्षत्वादविवक्षितम्[4]। अत एकस्मै द्वाभ्यां बहुभ्यो वा दानम्। अत्र यजमानोऽर्चिताय [5]ब्राह्मणायार्चितं यमोक्तसम्भारं दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं [6]यमोक्तसम्भारदानफलप्राप्तिकामोऽहमेतं सम्भारं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा सम्भारोऽयं विष्णुदैवत[7] इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। [ततः ॐ][8] अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सम्भारं[9] स्पृशेत्। द्वाभ्यां सम्भारद्वयदाने बहुभ्यो वा बहुसम्भारदाने [10]देयसम्प्रदानयोर्द्विवचनं बहुवचनमूहनीयम्।

महाभारते (अनु—२३।६८):—

वैवाहिकानां द्रव्याणां प्रैष्याणाञ्च[11] युधिष्ठिर।

दातारो वाससाञ्चैव पुरुषाः स्वर्गगामिनः ॥२॥

अर्चिताय ब्राह्मणायार्चितं विवाहोपकरणद्रव्यम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गप्राप्तिकामोऽहमेतानि वैवाहिकानि द्रव्याणि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (अनु—५७।३३):—

नैवेशिकं [12]सर्वगुणोपपन्नं ददाति वै यस्तु नरो द्विजाय।

स्वाध्यायचारित्रगुणान्विताय तस्यापि लोकाः[13] कुरुषूत्तरेषु[14] ॥३॥

---

1 A पुण्यकृता
2 A प्रववाम्यहं
3 A यज्ञव्यय० for यज्ञादुप०
4 A जात्यपेक्षयाद्विवक्षितं, I. O. जात्यपेक्षत्वाद्विवक्षितं
5 A omits ब्राह्मणाय
6 A यथोक्त
7 A and I. O. विष्णुदैवतं
8 A omits the bracketed portion
9 I. O. सम्भारं
10 I. O. देयसम्भारयोर्द्विवचनबहुवचनमूहनीयं, A देयसंप्रदानयोर्द्विवचनबहुवचन चोदाहरणीये
11 A पुष्पाणाञ्च
12 I. O. सर्वगुणोपन्नं
13 A लोकाश्च
14 A गुरुषूत्तरेषु

नैवेशिकं विवाहादिक्रियासिद्ध्युचित[1]-मुपकरणम्। अर्चिताय विद्यातपःशीलशालिने ब्राह्मणाय तदभिमतविवाहयज्ञाद्युचितोपकरणं यथाशक्त्युपकल्प्यार्चितम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात्। [2]उत्तरकुरुलोकप्राप्तिकामोऽहमेतन्नैवेशिकं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३१६।२०ख-२१क) :—

विवाहादिक्रियाकाले तत्क्रियासिद्धिकारकम्[3]।
यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं लभेत् ॥४॥

तत्क्रियासिद्धिकारकम् [4]तदुपयोग्यद्रव्यम्। आदिशब्देन [5]यज्ञोपनयनप्रतिष्ठाग्रहणम्। अर्चिताय ब्राह्मणाय[6]-र्चितामुक्तामन्यतमां[7] सामग्रीम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अश्वमेधफलप्राप्तिकामोऽहमेताममुकक्रियोचितसामग्रीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे सम्भारदानावर्तः।

1 A ०र्चित० for ०सिद्ध्युचित०
2 A उत्तरमहालोक०
3 A तत्क्रियाकारकं
4 I. O. omits this
5 A यज्ञायतन० for यज्ञोपनयन०
6 A omits अर्चिताय ब्राह्मणाय
7 I. O. अन्यतता

अथ तानादैवतपशुदानावर्तः। (५१)

विष्णुधर्मोत्तरे (३।३०६।५६ख—६०क)—

अजामलङ्कृतां दत्त्वा वह्निलोके महीयते।

तमेव लोकमाप्नोति दत्त्वाज[1] विधिवन्नरः ॥१॥

तमेव लोकं वह्निलोकं[2] विधिवदलङ्कारादिना। अत्र यजमानोऽर्चिताय ब्राह्मणाय छागीं सौवर्णतिलकादिभिरलङ्कृत्यार्चितां[3] दद्यात्। ॐ [4]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं सोत्कर्षवह्निलोकप्राप्तिकामोऽहमेतामलङ्कृतां छागीं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [5]छागीयमग्निदैवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[6] काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा छागीं कर्णे स्पृशेत्[7]। [एवमलङ्कृतछागदान[8]-वाक्ये एतमलङ्कृतं][9] छागमिति विशेषः।

तथा (३।३०६।६१ख—६२क):—

[10]वारुणं लोकमाप्नोति दत्त्वा वस्तं[11] नरोत्तमः[12]।

अविप्रदाता च तथा तदेव फलमश्नुते ॥२॥

[13]वस्तं छागं तदेव फलं [14]वारुणलोकप्राप्तिरूपमित्यर्थः। अर्चिताय ब्राह्मणायार्चितं वस्तम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [15]वारुणलोकप्राप्तिकामोऽहमेतं [16]वस्तं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। अविदाने तु वाक्ये [17]वस्तपदस्थाने अविपद-[18][निवेशो विशेषः]। स्वस्तिसावित्रीपाठानन्तरम् अविरयं वरुणदैवत इति प्रतिग्रहीतृवाक्यम्[19]। [20][कामस्तुत्यादि पूर्ववत्।] पुच्छग्रहणञ्च स्वीकारः।

---

1 A दत्त्वाग्नौ
2 A omits this
3 A अलङ्कृतां for अलङ्कृत्यार्चितां
4 A omits अद्य
5 I. O. छागीमग्नि०
6 A एतत् for इदं
7 A गृह्णीयात्
8 I. O. ०दाने०
9 A एवंमलङ्कृत for the bracketed portion
10 I. O. वरुणं
11 A छाग
12 I. O. नरोत्तम:
13 A omits it
14 A and I. O. वरुण०
15 A and I. O. वरुण०
16 A वस्त्रं
17 A वस्त्र०
18 A निवेष: for the bracketed portion
19 A प्रतिग्रहीतुर्वाक्यं
20 A and I. O. पूर्ववत् कामस्तुत्यादि

तथा (३।३०६।६२ख) :—

आरण्यपशुदानेन वायुलोके महीयते ॥३॥

आरण्यपशवो हरिणशशकादयः। अर्चिताय ब्राह्मणाय हरिणादीनामन्यतम[1]-मर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षवायुलोकप्राप्तिकामोऽहमेतमारण्यकपशुं ददानि। [2]स्वस्तिसावित्रीपाठानन्तरम् आरण्यपशुरयं वायुदैवत इति प्रतिग्रहीतृवाक्यम्[3]। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणञ्च स्वीकारः।

तथा (३।३१२।५ख-६क) :—

[उष्ट्रं वा गर्दभं वापि][4] खरं वा यः प्रयच्छति।
अलकां स समासाद्य[5] यक्षेन्द्रैः [6]सह मोदते ॥४॥

खरोऽश्वतरः। अर्चिताय ब्राह्मणायार्चितमुष्ट्रम्[7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तोष्ट्र[8]-दानफलप्राप्तिकामोऽहमेतमुष्ट्रं[9] ददानि। स्वस्तिसावित्रीपाठानन्तरम् [10]उष्ट्रोऽयं निर्ऋतिदैवत इति प्रतिग्रहीतृवाक्यम्[11]। कामस्तुत्यादि पूर्ववत्। [उष्ट्रस्यारोहणं स्वीकारः। एवं गर्दभदानवाक्ये तु विष्णुधर्मोत्तरोक्तगर्दभदानफलप्राप्तिकामोऽहमेतं गर्दभमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं गर्दभोऽयं यमदैवत इति प्रतिग्रहीतृवाक्यम्[12]। कर्णग्रहणं स्वीकारः।][13] अश्वतरदानवाक्ये हि विष्णुधर्मोत्तरोक्तखरदानफलप्राप्तिकामोऽहमेतं खरमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं खरोऽयं यमदैवत इति प्रतिग्रहीतृवाक्यम्[14]। कामस्तुत्यादि पूर्ववत्। कर्णग्रहणं स्वीकारः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे पशुदानावर्तः।

1 I. O. अन्यं
2 A स्वस्त्यादिस्वीकारान्तं पूर्ववत्
3 I. O. प्रतिग्रहीतृवाक्यं
4 A खर्गमार्गगर्दभस्वपि for the bracketed portion
5 A समासाद्य
6 A ग्टह
7 A खरं for उष्टम्
8 A खड्ग for उष्ट्र
9 A खड्गं for उष्ट्रं
10 A खड्गोऽयं
11, 12 and 14 I. O. वाक्यम्
13 A omits the bracketed portion

अथ प्रजापतिदैवत-कृष्णाजिन-दानाव्रतः। (५२)

मत्स्यपुराणे (२०६।१।२१क, २२ख-३०) :—

कृष्णाजिनप्रदानस्य [1]विधिं कालं ममानघ ।
ब्राह्मणश्च [2]समाचक्ष्व [तत्र मे संशयो महान्][3] ॥

मत्स्य उवाच :—

वैशाखी पौर्णमासी च[4] ग्रहणं[5] शशिसूर्ययोः ।
पौर्णमासी [6]तथा माघी[7] [आषाढी[8] कार्त्तिकी तथा ॥२॥
[9]उत्तरायणे द्वादश्यां][10] तस्यां दत्तं महाफलम्[11] ।
आहिताग्निर्द्विजो यस्तु[12] यद्देयं[13] तस्य पार्थिव ॥३॥
[14]तथा येन विधानेन तन्मे निगदतः शृणु ।
गोमयेनोपलिप्ते तु शुचौ देशे नराधिप ।
आदावेव समास्तीर्य शोभनं [15]वस्त्रमाविकम् ॥४॥

गोमयोपलेपादेव [16]शुचित्वप्राप्ते पुनः [17]शुचाविति पदं गोमयोपलेपे[18] कृते पुनः केश कीटादिवारणार्थम् ।

ततः सशृङ्ग[19] सखुरमास्तरेत्[20] कृष्णमार्गकम्[21] ।
[22]कर्तव्यं रुक्मशृङ्गन्तद्[23] रुक्मदन्तं[24] तथैव च ॥५॥

1 M. P. विधिकालौ
2 M. P. तथाचक्ष्व
3 A यथा मे तत्र संशयः महान् for the bracketed portion
4 A तु
5 M. P. ग्रहणे
6 M. P. तु या
7 I. O. and M. P. माघे
8 I. O. आषाढे, M. P. ह्याषाढौ
9 M. P. उत्तरायणद्वादशीवा
10 A omits the bracketed portion
11 I. O.
12 A यः
13 I. O. तद्देयं
14 A and M. P. यथा
15 Corrected from M. P. A मन्त्र. माविकं, I. O. परममाविकम्
16 A शुचित्ते
17 A शुभाविति, I. O. शुचावेति
18 I. O. गोमयोपलेपेति
19 A शृङ्ग
20 A सखुरान्तरेत्र
21 Corrected from M. P. I. O. and A ॰मार्गणम्
22 A कर्त्तव्यवाक्य शृङ्गन्तु
23 Corrected from M. P. I. O. and A तु for तद्
24 M. P. [illegible]

रुक्मदन्तं [1]सौवर्णदन्तपङ्क्तिद्वययुतमित्यर्थः ।

[[2]लाङ्गूले विद्रुमञ्चैव नेत्रयोर्मौक्तिकं न्यसेत् ।
[3]तिलैरात्मसमं कृत्वा वाससाच्छादयेद्बुधः][4] ॥६॥

आत्मसमं कृत्वा सर्वतः कृष्णाजिनाच्छादकं तिलं दत्त्वेत्यर्थः[5] ।

[6]सुवर्णनाभं तत् कुर्यादलङ्कुर्याद्विशेषतः ।
[7]रत्नैर्गन्धैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत् ॥७॥

[8]रत्नैः परिभाषोक्तनवरत्नत्रयेण । [9]गन्धैः प्रसिद्धचन्दनादिभिः ।

कांस्यपात्राणि चत्वारि [10]तेषां दद्याद् यथाक्रमम् ।
मृन्मयेषु च पात्रेषु पूर्वादिषु [11]क्रमेण तु ॥८॥
[12]घृतं क्षीरं दधि क्षौद्रमेवं [13]दद्याद् यथाविधि ।
चम्पकस्य तथा शाखामव्रणं कुम्भमेव च ॥९॥
बाह्योपस्थानकं कृत्वा शुभचित्तो[14] निवेशयेत् ।
[15]जीर्णवस्त्रेण पीतेन सर्वाङ्गाणि च मार्जयेत् ॥१०॥

तच्च चम्पकशाखान्वितस्य कुम्भस्य [16]बहिःस्थापनं पीतवाससा दानोत्तर-[17]स्नानानन्तरमङ्ग-मार्जनञ्च यजमानेन कर्तव्यम्, तस्यैव [18]सुकृतत्वात् ।

धातुमयानि पात्राणि पादेष्वस्य प्रदापयेत् ।
यानि काम्यानि[19] पापानि मया [20]लोभात् कृतानि तु[21] ॥११॥

1 A सौवर्णं शृङ्गं खुरञ्चेत्यर्थः
2 I. O. लाङ्गूलो
3 A तिलैरात्मसमं
4 M. P. reads the b. p. as लाङ्गूलं मौक्तिकैर्युक्तं तिलच्छन्नं तथैव च । तिलैश्च लिखितं कृत्वा वाससाच्छादयेच्छुचिः ॥
5 A दद्यात्
6 A स्वर्णनाभिं ततः कुर्याद्विशेषतः for the entire line
7 A वस्त्रैर्गन्धैः०
8 A वस्त्रैः परिभाषोक्तं नवद्रमुच्यते
9 A यथाक्रमं गन्धैः
10 M. P. तेषु
11 A क्रमान्यथेत, M. P. यथाक्रमम्
12 A reads घृतं after दधि
13 Corrected from M. P. I. O. and A कुर्य्याद्
14 M. P. शुभचित्ता
15 M. P. सूक्ष्म०
16 A रक्षितस्थापनम्
17 A स्थापनान्तरमङ्गसमार्जनञ्च
18 I. O. प्रहृतत्वात्
19 M. P. कानि च
20 I. O. शोकात्
21 M. P. मे

लौहपात्रप्रदानेन [प्रणश्यन्तु ममाशु वै][1] ।
तिलपूर्णन्तु तत् कृत्वा वामपादे निवेशयेत् ॥१२॥
यानि [पापान्यकामानि कर्मोत्थानि कृतानि तु][2] ।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥१३॥
मधुपूर्णन्तु तत् कृत्वा पादे वै दक्षिणे न्यसेत् ।
परापवादपैशुन्याद्[3] [4]वृथा मांसस्य भक्षणात् ।
[5]तत्रोत्थितञ्च [6]पापं मे ताम्रपात्रात् प्रणश्यतु ॥१४॥
[7][कन्याया दूषणञ्चैव] परदारप्रधर्षणम्[8] ।
रूप्यपात्रप्रदानाद्धि क्षिप्रं नाशं प्रयातु मे ।
[9][ऊर्द्ध्वपादे त्विमे कार्ये ताम्रस्य रजतस्य च] ॥१५॥

[10]ऊर्द्ध्वपादयग्रपादे तयोश्च वामक्रमेणैव[11] पात्रारोपणम् पश्चात् पादयोस्तथाश्रुतेः ।

जन्मजन्मसहस्रेषु कृतं पापं कुबुद्धिना[12] ।
सुवर्णपात्रदानात्तु [नाशयाशु जनार्दन][13] ॥१६॥
हेममुक्ताविद्रुमञ्च दाडिमं वीजपूरकम् ।
[14]प्रशस्ते पात्रश्रवणे [15]खुरैः शृङ्गाटकानि च ॥१७॥

अत्राग्रपादद्वयस्य-[16]पात्रद्वयस्यानुपदिष्टस्थानक-सौवर्णपात्रस्य श्रवणे इति कर्णस्थानद्वयस्येति पञ्चानामाधारतया-[17]वगतेराधारद्रव्याणामन्येषां वा श्रुतेर्हेममुक्तादीनां[18] पञ्चानां तत्रा-

1 A क्षिप्रं नश्यन्तु तानि मे for the bracketed portion
2 M. P. reads the b. p. as कानि च पापानि कर्णोत्थानि कृतानि च
3 A परापवादपैसुन्या
4 Corrected from M. P. I O. पृष्ठमांसस्य, A प्रोष्ठमासंसस्य
5 I. O. ततोत्थितञ्च
5 A पापञ्च
7 I. O. कन्यागवाश्चैव तथा and M. P. कन्यानृताश्ववाच्चैव for the b. p.
8 A परदारप्रसेवनं, M. P. परदाराभिमर्षणात्
9 I. O. omits the bracketed portion, A ऊर्द्ध्वपादौ त्विमौ कार्यौ०, M. P. ऊर्द्ध्वपादे त्विमे कार्यं०
10 I. O. and A ऊर्द्ध्वपादावग्रपादौ
11 A वामक्रमेणैव, I. O. रामक्रमणैव
12 A कुसङ्गिनां
13 A नश्येदाशु जनार्दनः for the bracketed portion
14 I. O. and A प्रशस्तपात्रश्रवणे, M. P. प्रशस्तपात्रे श्रवणे
15 M. P. खुरे
16 I. O. पाद for पात्र
17 A ०रमतेनाधेयद्रव्याणामन्ये वाच
18 A ०हेतुमुक्तादीना

धेयत्वं [1]यथासंख्यमुन्नेयम्। [2]पात्रस्य श्रवणे इति पात्रश्रवणे अनिर्दिष्टस्थानस्य[3] सौवर्णपात्रस्य मध्यस्थान एव निवेशः। 'सुवर्णनाभिकं दद्यात् प्रीयतां वृषभध्वज' इति पुनः सुवर्ण-[4]नाभिकत्वश्रुतेः। एवञ्च 'सुवर्णनाभं तत् कुर्यादि'त्युपरिग्रन्थेन[5] मध्ये सुवर्णपात्रं [6]स्थाप्यमिति सिद्धम्। अनेन च पात्रं सौवर्णं मध्ये [7]स्थाप्यमिति [8]द्विधा सुवर्णनाभिकत्वम्। खुरैः शृङ्गाटकानि [9]सिङ्घान इति प्रसिद्धानि फलानि[10] खुरेषु देयानीत्यर्थः।

एवं कृत्वा यथोक्तेन सर्वशाकफलानि च।
तत्प्रतिग्रह-[विद्विद्वाना][11]-हिताग्निर्द्विजोत्तमः ॥१८॥

एवं कृत्वेति खुरेष्वेव नानाजातीयशाकानि फलानि च नानाजातीयानि देयानीत्यर्थः।

[12]स्नातो वस्त्रयुगच्छन्नः स्वशक्त्या [13]चाप्यलङ्कृतः।
प्रतिग्रहश्च तस्योक्तः पुच्छदेशे महीपते ॥१९॥
सुवर्णनाभिकं दद्यात् प्रीयतां वृषभध्वजः।
अनेन विधिना [14]दत्त्वा [यथावत् कृष्णमार्गकम्][15] ॥२०॥
न [16]स्पृश्यः स द्विजो राजंश्चितियूप-[समो हि सः][17]।
[18][दाने च] श्राद्धकाले च दूरतः परिवर्जयेत् ॥२१॥
स्वगृहात् प्रेष्य[19] तं विप्रं मण्डले[20] स्नानमाचरेत्।
पूर्णकुम्भेन राजेन्द्र [शाखया चम्पकस्य च][21] ॥२२॥

---

1 I. O. समुन्नेयं
2 I. O. and A पात्रश्च
3 A adds च after this
4 A नाभिकत्व श्रुतेः
5 A एवञ्च सुवर्णनाभिं कुर्यादित्युपरिग्रन्थं
6 A संस्थाप्य०
7 I. O. स्थापनमिति
8 A द्विरासुवर्णनाभिकद्वयं
9 A सिंघ
10 I. O. adds मोच्यानि here
11 Corrected from M. P. I. O. विद्विद्वाना and A नाधीय मा for the bracketed portion
12 Corrected from M. P. A स्नातो वस्त्रयुगाच्छन्न and I. O. ह्वैतवस्त्रयुगच्छन्नः
13 A वाप्यलङ्कृतः
14 Corrected from M. P. I. O. and A दद्यात्
15 A मक्रुमाम्बम for the bracketed portion
16 M. P. स्पृश्योऽसौ
17 A समा हि ता for the bracketed portion
18 M. P. तं दानं for the b. p.
19 Corrected from M. P. I. O. and A प्रेष्य
20 I. O. and A मण्डले, M. P. मण्डप
21 A शाखाया चम्पकस्य च for the b. p.

[1]कृत्वाचार्यश्च कलसं मन्त्रेणानेन मूर्द्धनि ।
आप्यायतां समुद्रस्य [2]द्वयोर्जप्यास्तु षोडश ॥२३॥

[आप्यायतामित्येकः समुद्रस्य त्वेति][3] पञ्चदश । एवं षोडश भवन्ति[4] ।

[5][आहते वाससी वीत आचान्तः शुचितामियात्]
[6]तद्वस्त्रसहितं कुम्भं नीत्वा [7]क्षेप्यं चतुष्पथे ॥२४॥
[8]कृतेनानेन या तुष्टिर्न शक्याब्दशतैरपि ।
[9][वक्तुं हि] नृपतिश्रेष्ठ तथाप्युद्देशतः शृणु ॥२५॥
समग्रभूमिदानस्य फलं प्राप्नोत्यसंशयम् ।
सर्वांश्च[10] लोकान् जयति[11] [कामचारी विहङ्गवत्][12] ॥२६॥
आभूतसंप्लवं यावत् स्वर्गं प्राप्नोत्यसंशयम् ।
न पितुः पुत्रमरणं वियोगो[13] भार्यया सह ।
धनदेशपरित्यागं [नैव चेहाप्नुयात्][14] क्वचित् ॥२७॥

अत्र यजमान उक्तानां समयानामिच्छयान्यतमे स्नातः शुचि-[र्गोमयोपलिप्ते अ][15]-पनीत-केशकीटादौ भूमिभागे स्वरूपं यथाशक्ति कम्बलमास्तीर्य तत्र सखुरं सशृङ्गं[16] कृष्णाजिनमास्तीर्य [17]सौवर्णदन्तपङ्क्तिद्वयं विद्रुमलाङ्गूलं मुक्तानेत्रयुगं मध्यस्थानार्पितसुवर्णं कृत्वा सर्वतस्तिलै-राच्छाद्य वाससाच्छादयेत् । ततः पूर्वस्यां दिशि घृतपूर्णं कांस्यपात्रं [मृन्मयञ्च पात्रं][18] दक्षिणस्यां क्षीरपूर्णं [19]तत्पात्रयुगं पश्चिमायां दधिपूर्णं तत्पात्रद्वयम् उत्तरस्यां मधुपूर्णं

1 Corrected from M. P. A कृत्वा चार्वोर्थं, I. O. कृत्वा वाचार्यं
2 A द्वार्थ्वा जप्यास्तु
3 A आप्यायतामिति एकाश्चकसमुद्रस्य द्वावक्वार्येति and I. O. आप्यायता-मित्येकसमुद्रस्य वाचकयेति for the b. p.
4 I. O. तरन्ति
5 Supplied from M. P. I. O. and A omit it
6 A तद्वत् वस्त्रसहितं
7 Corrected from M. P. A क्षेप्तुचतुष्पथे, I. O. चतुष्पथे only
8 Corrected from M. P. I. O. and A क्षेपे for कृते०
9 Corrected from M. P. I. O. and A वक्तु for the b. p.
10 A सर्व्वांश्च
11 I. O. यजति
12 A कामतारीदृङ्गमः for the b. p.
13 I. O. वियोगं
14 A नैवात्र प्राप्नुयात् for the bracketed portion
15 A र्होमयोपलिप्ता for the bracketed portion
16 A शृङ्गं
17 A सौवर्णशृङ्गं पङ्क्तिद्वयं
18 A omits the bracketed portion
19 A तत्पात्रद्वयं

तत्पात्रद्वयम् एवमष्टौ पात्राण्यारोप्य ॐ यानि काम्यानीति मन्त्रेण[1] तिलपूर्णं लोहपात्रं पश्चात् [2]वामपाद आरोपयेत्। [ॐ यानि पापान्यकामानीति][3] मन्त्रेण मधुपूर्णं कांस्य-पात्रं पश्चाद्दक्षिणपाद आरोपयेत्। ॐ [परापवादेत्यादि][4]-मन्त्रेणोत्कृष्टसुवर्णसहितं ताम्र-पात्रमग्रपाद[5] आरोपयेत्। ॐ [कन्याया दूषणमित्यादि][6]-मन्त्रेण उत्कृष्टमुक्तासहितं रौप्यपात्रमग्रदक्षिणपाद आरोपयेत्। ॐ [7]जन्म जन्म सहस्रे ष्विति मन्त्रेणोत्कृष्टविद्रुमसहितं सौवर्णपात्रं मध्यस्थान आरोपयेत्। वामकर्णस्थाने [चोत्कृष्टदाडिमफलं दक्षिणकर्णस्थाने][8] चोत्कृष्टं वीजपूरफलमारोपयेत्। खुरचतुष्टयं शृङ्गाटक-सर्वशाक[9]-सर्वफलयुतं कृत्वा ततः कृष्णाजिनं परिभाषोक्त-[नवरत्नगणमध्यादिच्छया यैः][10] कैश्चिद्रत्नैर्यथाशक्ति[11][रत्नैश्चन्द-नादिगन्धैश्चालङ्कुर्यात्। एवं कृष्णाजिनमारोप्य चम्पकशाखासहितजलपूर्णकुम्भ-दानानन्तरं स्नानार्थं गात्रमार्जनार्थञ्च जीर्णवस्त्रं दानस्थानबहिः स्थापयित्वा ब्राह्मणमग्निहोत्रिणं गन्ध-माल्यादिभिरभ्यर्च्य वस्त्रयुगेनाच्छाद्य] [12]हेमाङ्गुरीयकादिभिरलङ्कृत्य कृष्णाजिन-[पुच्छदेश उप-विश्योक्त][13]-संस्थानं कृष्णाजिनमर्चितं तस्मै दद्यात्। ॐ[14] अद्यामुकसगोत्रायामुकवेदामुक-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं मत्स्यपुराणोक्त-कृष्णाजिन-दानफलप्राप्तिकामोऽहमेतत् कम्बलस्थं रुक्मशृङ्गं रुक्मदन्तं[15] [16]प्रवालभूषितलाङ्गूलं मुक्तानेत्रं तिलपूर्णं सर्वतो वस्त्रा-च्छादितं सुवर्णनाभिकं [17]रत्नगन्धालङ्कृतं [घृतदुग्धदधिमधुपूर्णकांस्यपात्रचतुष्टयसहितं][18] घृतदुग्धदधिमधुपूर्णमृन्मयपात्र-चतुष्टययुतं तिलपूर्ण-लोहपात्र-मधुपूर्णकांस्यपात्र-हेमसहितताम्र-पात्र--मुक्तासहितरूप्यपात्र--प्रवालसहितसुवर्णपात्र[19]--दाडिमफलवीजपूरफलशृङ्गाटक-सर्वशाक[20]-

1 A omits मन्त्रेण
2 I. O. वामपादमारोपयेत्, A वाम-पादे प्ररोपयेत्
3 A यानि पापान्यनेकानि इति for the bracketed portion
4 I. O. पराय वेत्यादि for the bracketed portion
5 A ताम्रपात्रञ्च वामपादे
6 A कांयां कृतमित्यादि and I. O. कन्यामृतमित्यादि for the b. p.
7 A जन्मसहस्रेष्विति
8 I. O. omits the bracketed portion
9 A शृङ्गाटकं सर्व्वशाकं
10 A नरत्नै यदैः for the bracketed portion
11 A omits the bracketed portion
12 I. O. हेमाङ्गुलीयष्टिकादिभिर-लङ्कृत्य, A हेमाङ्गुरीयकादीभिरलं कृत्य
13 I. O. पुच्छदेशे उपवेश्योक्त and A पुच्छदेश उपविश्योक्तं for the bracketed portion
14 A omits ॐ
15 I. O. omits रुक्मदन्तं
16 I. O. प्रवालभूतिलाङ्गूलं
17 A मन्दगन्धालङ्कृतं
18 A omits the bracketed portion
19 A omits पात्र
20 A ०सर्व्वशाक०

सर्वफलान्वितं कृष्णाजिनं ददानि। प्रीयतां वृषभध्वजः। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा कृष्णाजिनमिदं प्रजापतिदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। तत अथ कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा कृष्णाजिनं पुच्छे गृह्णीयात्। ततस्तं ब्राह्मणं विसृज्य मण्डलं कृत्वा पूर्वस्थापितजलकुम्भेन चम्पकशाखान्तरितमुखेन स्नात्वा जीर्णपीतवस्त्रेणाङ्गानि मार्जयित्वाऽऽहते[1] वाससी परिधायाचम्याङ्गमार्जनवस्त्रसहितं कुम्भं चतुष्पथे क्षेपयेत्। अथवा [2]वेदविदं ब्राह्मणमाहूय तद्द्वारा[3] ॐ आप्यायेतामिति मन्त्रेण [4]समुद्रस्य त्वेति मन्त्रैश्चाभिमन्त्र्य चम्पक-[5]शाखोद्धृतजलेन [6]शिरःस्नानं कुर्यात्। अङ्गमार्जनादिकं समानम्।

आग्नेयपुराणे :—

[7]ग्रहणे अयने चैव संक्रान्तौ [8]विषुवद्वये।
युगादिषु युगान्तेषु द्वादश्यां नियतः शुचिः ॥१॥
समुपोष्य समभ्यर्च्य केशवं कल्मषापहम्।
द्वादश्यान्तु चतुर्दश्यां कृष्णायां नियतः शुचिः ॥२॥

अत्र कृष्णायामिति [विशेषणं द्वादश्यान्त्वित्यत्रापि सम्बन्धः][9] [द्वादश्यां पुनः-कीर्तनात्][10]। एवञ्च द्वादशीचतुर्दश्यौ कृष्णे एव ग्राह्ये।

संलिप्य गोमयेनाथ चतुर्हस्तप्रमाणतः।
वस्त्राणि [प्रस्तरे भूम्यामजिनं][11] तत्र विन्यसेत् ॥३॥
कृष्णतिलैस्तु संछन्नं[12] कृत्वा तत्रोपरि न्यसेत्।
मधुसर्पिर्युतं[13] पात्रं हैमं चौडुम्बरं तथा ॥४॥

औडुम्बरं ताम्रमयम्।

सुवर्णं प्रक्षिपेत्तत्र [14][पलं वा त्रिपलं] शतम्।
शक्तितो दानमेवं हि भक्तिरेवात्र कारणम् ॥५॥

1 A धौते for आहते
2 I. O. वेदब्राह्मण०
3 A तद्दान
4 A समुद्रस्येति
5 A ०शाखाकृतजलेन
6 I. O. शिवः स्ना
7 A omits ग्रहणे
8 A विषुवे पर्व्वणि द्विने
9 I. O. विशेषणार्थं for the bracketed portion
10 A omits the bracketed portion
11 A प्रस्तरे कृष्णमथाजिनं for the bracketed portion
12 I. O. संकन्नं, A संच्छन्न
13 A मधुसर्पिर्गुडं
14 I. O. फलं वा त्रिफलं for the bracketed portion

संछाद्य [1]तच्छुभैर्वस्त्रैः पात्रं यज्ञोपवीतिनम् ।
कलसाष्टौ तथा दिक्षु सवस्त्राः पात्रसंयुताः ॥६॥
तान् स्थाप्याहवनं कृत्वा विधिवत् पूज्य केशवम् ।
कृष्णाजिनं समभ्यर्च्य ब्राह्मणायोपपादयेत् ॥७॥

आहवनमाहुतिं कृत्वा होमं कृत्वेत्यर्थः ।

[2]कृष्णोऽसि कर्मणा कृष्ण कृष्णाजिनमतस्तिलैः[3] ।
[4][कृष्णैर्युतं प्रतीच्छस्व कृष्णः] संप्रीयतामिति ॥८॥
एवं दत्त्वा द्विजेभ्यस्तु [5]पश्चाद्दद्यात् सुदक्षिणाम् ।
तिलाहारो [6]भवेत्तत्र ब्राह्मणान् भोजयेत्ततः ॥९॥

द्विजेभ्य इति बहुवचनं [7]जात्याख्यायामेकस्मिन्नेव । एवञ्च प्रतिग्रहीतृब्राह्मणायैव यथाशक्ति बहुदक्षिणादानम् । तिलाहारो भवेद् ब्राह्मणान् भोजयेदिति च ब्राह्मणान् भोजयित्वा [8]स्वयं तिलाहारो भवेदिति बोद्धव्यम् ।

एतं कृष्णाजिनं दत्त्वा नरो विगतकल्मषः ।
पितामहान् समुद्धृत्य स्वर्गं याति न संशयः ॥१०॥
तत्र भोगांश्चिरं भुक्त्वा पितृ-[9]पितामहैर्वृतः ।
स नरोऽस्य प्रभावाद्धि याति विष्णोः परं पदम् ॥११॥

उक्तसमयानामन्यतमस्य पूर्वतरदिने यजमानः कृतनित्यो घटिकाधिकप्रहरत्रये[10] हविष्यं भुक्त्वाचम्य शुचौ देशे उपविश्य पादौ प्रक्षाल्याचम्य प्राङ्मुख उदङ्मुखो[11] वा कृताञ्जलिः ॐ सूर्यः सोमो यमः[12] कालः [महाभूतानि पञ्च च इति][13] आग्नेयपुराणोक्त-सोपवासकृष्णाजिनदानकर्म मया कर्तव्यमित्युक्त्वा गृहीतोदपूर्णताम्रपात्र[14] उदङ्मुखः सङ्कल्पयेत् । [ॐ उपोष्य][15] परदिने

1 I. O. तच्छतैर्वस्त्रैः, A तच्छुभैर्वस्त्रैः
2 I. O. कृष्णो
3 A कृष्णाजिनं शुभैस्तिलैः
4 A कृष्णैः प्रतीच्छ प्रीयताम् for the bracketed portion
5 A पश्चाद्दद्यात् दक्षिणां
6 A भवेद्वत्र
7 A जात्याख्यायां एकस्मिन्नेव
8 A omits स्वयं
9 I. O. ०पैतामहैर्वृतः
10 A घटिकाधिकप्रहरत्रये, I. O. घटिकाधिकप्रहरत्रये
11 A omits उदङ्मुखो
12 I. O. omits यमः
13 I. O. पञ्चमहाभूतानि for the bracketed portion
14 A गृहीतोदकपूर्णताम्र
15 I. O. omits the bracketed portion

आग्नेयपुराणोक्त-तिलाहार-रूपोदीच्या[1]-ङ्गसहित-सोपवासकृष्णाजिन-दानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा [2]परदिने उपोष्यापरदिने प्रातः स्नात्वा गोमयोपलिप्तभूमौ वस्त्रत्रयञ्च[3] चतुर्हस्त-प्रमाणमास्तीर्य तत्रोपरि [4][कृष्णमृगाजिनं तिलाच्छादितं] स्थापयित्वा तदुपरि [5]हैमं ताम्रं वा पात्रं शक्तित आरोप्य मधुघृतपूर्णं कृत्वा तत्र सुवर्णस्य [6]पलं पलत्रयं पलशतं वा शक्तितो निक्षिप्य[7] [तत्पात्रमुत्कृष्ट][8]-वस्त्रैराच्छाद्य यज्ञोपवीतिनं[9] कृत्वा पूर्वादिदिक्क्रमेणाष्टौ कलसान् शरावपिहितमुखान् सवस्त्रानारोपयेत्। ततो ब्राह्मणः [10]स्वशाखोक्तक्रमेणाग्निमुप-समाधाय[11] ॐ [केशवाय स्वाहेत्याद्यैर्हुत्वा][12] शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ॐ केशवाय नम इति यथाविधि वासुदेवप्रतिमां[13] सम्पूज्य कृष्णाजिनमर्चयित्वा अर्चिताय ब्राह्मणाय ॐ कृष्णोऽसीत्यादि[14] पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेय-पुराणोक्त-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतद्वस्त्रत्रयोपरिस्थापित-[15][कृष्णतिलसंछन्नं] मधु-घृतपूर्ण-[हैमपात्र-तन्निहित][16]-काञ्चन-शुभवस्त्राच्छन्नयज्ञोपवीत्यमुकपात्रसहितं [17]पात्रपिहितमुखं सवस्त्रकुम्भाष्टकयुतमर्चितं कृष्णाजिनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततः [18]प्राक्तणे [19]ब्राह्मणेभ्यो भोजनं दत्त्वा स्वयं तिलाहारो भवेत्।

कालिकापुराणे :—

> [20]येऽपि रुक्मादिपात्रेषु हुत्वा वह्निं [21]ददन्ति वै।
> तिलद्रोणसमायुक्तं [22]वस्त्रयुगाभिवेष्टितम् ॥१॥

1 A and I. O. ०द्दिव्या०
2 A omits परद्दिने
3 A वस्त्रत्रयं
4 A कृष्णाजिनमाच्छाद्दितं for the bracketed portion
5 A हैमं
6 A omits पल
7 A omits निक्षिप्य
8 A वितततपात्रयुक्तं च for the bracketed portion
9 A यज्ञोपवीति, I. O. यज्ञोपवीतं
10 A स्वशाखार्यो०
11 I. O. उपसमाधाय
12 A केशवायेति स्वाहेत्याज्यं हुत्वा for the bracketed portion
13 A ०प्रतिमासं
14 I. O. कृष्णोसीति
15 A omits the bracketed portion
16 A पत्रस्थितं for the bracketed portion
17 A मुखं
18 I. O. ऋत्विग्भि
19 A ब्राह्मणो
20 A योपिहेमाद्दि०
21 A द्दाति
22 A वस्त्रयुग्मेन वेष्टितं

पलार्द्धमथवाऽदुष्टं[1] विभवाद्धेमसंयुतम् ।
[3]सूक्ष्मयुग्मेन वस्त्रेण अनेनाच्छादयेद्द्विजाः[3] ॥२॥

[4][पलार्द्धमथवाऽदुष्टमिति]पलं सुवर्णचतुष्टयं [5][तदर्द्धं वा अर्द्धष्टकाय(?)]कृष्णाजिनार्द्धभागे देयं[6] विभवात् । विभवशून्यस्तु हेमसंयुतमित्यल्प-[7]स्वर्णसंयोगमयं मध्ये कुर्यादिति श्लोकार्थः ।

[सोदकञ्चापरं रुक्मं][8] सतिलं [9]न्यस्य तत्करे ।
ततः कृष्णाजिनं दद्यात्तिलद्रोणान्वितञ्च यत् ।
दत्त्वा च भोजयेत्तत्र नत्वा[10] चैव विसर्जयेत् ॥३॥

दत्त्वा च भोजयेदिति तमेव ब्राह्मणं[11] भोजयेत् । [पश्चात् प्रणम्य][12] विसर्जयेत् ।

अयने विषुवे चैव ग्रहणे शशिसूर्ययोः ।
युगादौ ये प्रयच्छन्ति [विधिना ये तु वै][13] द्विजे ॥४॥
तेऽपि तत्पद[14]-मासाद्य दशांशं [ब्रह्म आयुषः][15] ।
क्रीडन्ते विविधैर्भोगैः कलारूपगुणान्विताः[16] ॥५॥
अनेनैव विधानेन दशद्रोणप्रदायकः ।
आब्रह्माण्डभवं कालं मोदते स पुरोत्तमे ॥६॥

उक्तसमयानामन्यतमे कृष्णाजिनं तिलद्रोणाच्छादितमुक्तोपकरणसहितं कृत्वा यथाशक्ति सुवर्णरूप्यताम्राणामन्यतमे पात्रे अग्निं यथाविध्युपसमाधाय ॐ प्रजापतये स्वाहेत्याहुतिं दत्त्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ब्राह्मणायार्चिताय [17]सूक्ष्मवस्त्रयुगाच्छादिताय करे तिलोदकसहितमग्रे[18] काञ्चनमन्यद्दत्त्वा[19] कृष्णाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् ।

1 A ०संस्त
2 A षक्ष०
3 A ०द्विजं
4 A पलार्द्धांशमर्थाद्दसुमिति for the bracketed portion
5 A तदर्द्धंस्वार्द्धयस्याकार्य्यं for the bracketed portion
6 I. O. देय
7 I. O. ०मिति
8 A सोदकं वासकं वा for the bracketed portion
9 A नत्वा
10 I. O. कृष्णा
11 A omits ब्राह्मणं
12 A नत्वा तमेव for the bracketed portion
13 A विधिनानेन वा for the bracketed portion
14 A सम for पद
15 A चैवब्रह्मणः पुरा for the bracketed portion
16 A ०गुणान्विते:
17 A षक्ष०
18 A omits च
19 A काञ्चनमन्यं दत्त्वा

[1] [कालिकापुराणोक्ततिलद्रोणाच्छादित-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतत्तिलद्रोणाच्छादितं वस्त्रयुगाभिवेष्टितं मध्यस्थनष्टकाञ्चनं कृष्णा]-जिनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। ततस्तं ब्राह्मणं भोजयित्वा प्रणम्य विसर्जयेत्। अनेनैव विधानेन तिलद्रोणदशकाच्छादित-[2][कृष्णाजिनदानमपि। तत्र दानवाक्ये कालिकापुराणोक्ततिलद्रोणदशकाच्छादितकृष्णा-जिनदानफलप्राप्तिकामोऽमेतद्दशद्रोणाच्छादितमिति] विशेषः। [अन्यत् सर्वं तु तुल्यम्][3]।

स्कन्दपुराणे :—

कृष्णाजिनन्तु यो दद्याद्व्रतिने ब्रह्मचारिणे।
पृथिवीफलमाप्नोति योगश्चास्य प्रवर्त्तते ॥७॥
ससमुद्रगुहा तेन[4] सशैलवनकानना।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥८॥

व्रतस्थाय ब्रह्मचारिणेऽर्चिताय कृष्णाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्कन्दपुराणोक्त-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतत् कृष्णाजिनं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्। [5]एतत् फलबाहुल्याद्बहुदक्षिणम्।

[6]पुलस्त्यः :—

अथातः कृष्णाजिनदानविधिं वक्ष्यामः। कार्त्तिक्यां पौर्णमास्यां वैशाख्यां वा चन्द्र-सूर्यग्रहे[7] विषुव अयनयोर्वा कृष्णमृगाजिनं सखुरं सशृङ्गमव्रणं मनोहरं[8] हिरण्यशृङ्गं[9] रूप्यखुरं मुक्तालाङ्गूलभूषितं[10] बहिर्लोमं प्राग्ग्रीवं स्यात्। गोमयोपलिप्तायां भुवि कुतपं[11] विस्तीर्य[12] तस्मिन्नाविकं वस्त्रं प्रसारयेत्। तस्मिन्नजिनं हिरण्यनाभं कृत्वा [13]तिलैराच्छाद्य तद्रूपं कृत्वा वस्त्रयुगेन तिलान् प्रच्छादयेत्। चतसृषु दिक्षु चत्वारि पात्राणि ताम्ररौप्यसौवर्णानि शक्तितः[14] पूर्वस्यां दिशि [क्षीरपूर्णं दक्षिणस्यां दिशि][15] [5]दधिपूर्णं पश्चिमायां[16] दिशि[17]

1 A omits the bracketed portion and reads भोजयेत्तत्र...... ग्रहणे of p. 528 again here with the word ब्राह्मणान् prefixed to it.
2 I. O. omits the bracketed portion
3 I. O. omits the bracketed portion
4 I. O. omits तेन
5 A तत्फलबाहुल्याद्बहुदक्षिणां
6 A omits पुलस्त्यः
7 A चन्द्रसूर्ययो ग्रहण
8 I. O. नहरं
9 A omits this
10 A भूमिदन्तं मांसं for भूषितं
11 A कम्बं
12 A प्रस्तीर्य्य
13 A तिलेनाच्छाद्य:
14 I. O. यथाशक्तितः
15 A omits the bracketed portion
16 I. O. पश्चिमस्यां
17 A omits it

घृतपूर्णम् उत्तरस्यां दिशि क्षौद्रपूर्णं निदध्यात्[1]। [पश्चिमभागेषु समिद्धमग्निं कृत्वा परिसमूह्य पर्य्युक्ष्य परोस्तीर्य भागाग्रैर्द्भैर्महाव्याहृतिभिस्तिलान् घृताक्तान् जुहुयात्][2]। तत आहिताग्नये[3] ब्राह्मणाय [4]सर्वाङ्गसम्पूर्णाय संयुगाय विदुषे वस्त्रयुगप्रच्छन्नायालङ्कृताय दद्यात् [सर्वगुणविशिष्टं कृष्णाजिनं ददानीति। नाभिं स्पृशन् कृष्णाजिनं प्रतिगृह्णीयात् प्रतिवाचयिता][5]।

[अत्र यमगीतागाथा भवति][6]।

[7][गोभूहिरण्यसंयुक्तं मार्गमेकं] ददाति यः।
सर्वदुष्कृतकर्मापि सायुज्यं[8] ब्रह्मणो व्रजेत्[9] ॥६॥

उक्तसमयानामिच्छयान्यतमे यजमानः शुचिर्यथोक्तं कृष्णाजिनं भूमिञ्च यथेच्छोत्पत्तियोग्यामुपकल्प्य कृष्णाजिनपश्चिमदेशे उक्तविधिना अग्निमुपसमाधाय ओं भूर्भुवः स्वाहेति घृताक्तांस्तिलान्[10] यथेष्टसंख्यान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ब्राह्मणमुक्तरूपं वस्त्रयुगाच्छादितमलङ्कृतं पुच्छदेशे कृष्णाजि-[नमाधार][11]-कम्बल उपवेश्यार्चिताय तस्मै कृष्णाजिनमर्चितम् ओं अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। पुलस्त्योक्तकृष्णाजिनदानफलप्राप्तिकामोऽहमेतत् कम्बलोपरि प्रसारितं हिरण्यशृङ्गं रूप्यखुरं मुक्तालाङ्गूलभूषितं हिरण्यनाभं तिलप्रच्छादितं वस्त्रप्रच्छादित[12]-क्षीरदधिघृतक्षौद्रपूर्णामुकपात्रचतुष्टययुतं [13]गृष्टिचतुष्टयसहितमुप[14]-[कल्पित-समुत्पत्तियोग्यभूमिकं][15] सर्वगुणविशिष्टं कृष्णाजिनं[16] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। नाभिस्पर्शः स्वीकारः। कुतपं [17]विस्तीर्येति कुतपः कुशः[18]। तद्रूपं कृत्वेति [यथा कृष्णाजिनसन्निवेश][19]-स्तथा तिलैराच्छादनं कृत्वेत्यर्थः। चतसृषु दिक्षु

1 A दद्यात्
2 I. O. omits the bracketed portion
3 A ततस्त्वाहिताग्न
4 A पर्वाङ्गसंपूर्णाय and omits संयुगाय
5 A omits the bracketed portion
6 A यत्र यमोक्ता गाथा भवन्ति for the bracketed portion
7 A अहतैर्हिरण्यसंयुक्तामार्गमेकं for the bracketed portion
8 I. O. सायोज्य
9 I. O. व्रजेत्
10 I. O. कृताक्तान्
11 A नावाध for the bracketed portion
12 A omits this word
13 A दृष्टि॰
14 A युग for मुप
15 I. O. कल्पिते यदुत्पत्तियोग्यभूमिकं for the bracketed portion
16 A कृष्णाजितं
17 I. O. प्रस्ताय्र्येति, A प्रस्तीर्य्येति
18 A कुश
19 A यथा कृष्णाजिनं तथा सन्निवेश for the bracketed portion

चत्वारि पात्राणि ताम्ररौप्यसुवर्णानीत्यत्र द्रव्यत्रयेण चतसृणां दिशां चतुर्णां क्षीरादीनां यथासंख्यसम्बन्धासम्भवात् ताम्ररूप्यसुवर्णानामन्यतमद्रव्यपात्रचतुष्टयस्य ग्रहणम्। अतएव [1]शक्तित इति मुनिराह। गृष्टीर्निदध्यादिति गृष्टिरेकवारप्रसूता गौः। अत्र यमगाथायाः पुलस्त्येनैकवाक्यतयोक्तत्वाद्भूमिसहितस्य दानम्[2]।

विष्णुधर्मोत्तरे :—

वैशाखी पौर्णमासी च ग्रहणे शशिसूर्ययोः।
पौर्णमासी तथा माघी तस्य दाने महाफला[3] ॥१॥
गोमयेनोपलिप्ते तु शुचौ देशे नराधिप।
आदावेव समास्तीर्य शोभनं वस्त्रमाविकम् ॥२॥
ततः सश्रृङ्गं सखुरमास्तरेत् कृष्णमार्गणम्।
कर्तव्यं रुक्मश्रृङ्गं तद्रूप्यपादं तथैव च ॥३॥
लाङ्गूलं मुक्तिसंयुक्तं [4]तिलच्छन्नं तथैव च।
तिलैः [5]सुशिखरं कृत्वा वाससाच्छादयेद्बुधः ॥४॥

[6]सुशिखरं कृत्वेत्याच्छादकतिल-[7]राश्यग्रभागं शोभनं कृत्वेत्यर्थः।

[8]सुवर्णनाभं तत् कुर्यादलङ्कुर्याद्विशेषतः।
[9]रत्नैर्गन्धैर्यथाशक्त्या[10] तस्य दिक्षु च विन्यसेत् ॥५॥

[11]रत्नैः परिभाषोक्त-[12]रत्नमध्ये यैः कैश्चित्त्रिभिः[13]। गन्धैः प्रसिद्धचन्दनादिभिः। अलङ्कुर्यादिति सम्बन्धः।

कांस्यपात्राणि चत्वारि तेषां दद्यादयथाक्रमम्।
[14]घृतक्षीरं दधिक्षौद्रमेवं दत्त्वा यथाविधि ॥६॥

यथाक्रममिति पूर्वादिक्रमेण।

1 I. O. यथाशक्तित
2 A omits दानम्
3 I. O. महाफलं
4 A तिलकान्नं
5 A स्वखिरं, I. O. स्वशिखरं
6 I. O. स्वशिखरं
7 I. O. ०राश्याग्रभागं, A कृत्वेच्छाद-कराश्यग्रभागं
8 A reads the entire line as सुवर्णनाभः ततः कुर्याद्विशेषः
9 A वर्णै०
10 I. O. ०यथा तस्य
11 A वर्णैः
12 A ०वर्णमध्ये
13 A यांश्चित्रिभि.
14 I. O. घृतं क्षौद्रं

तत्प्रतिग्राहयेद्विद्वानाहिताग्निं द्विजोत्तमम्[1] ।
[2]श्वेतवस्त्रयुगच्छन्नं स्वशक्त्या [3]चाप्यलङ्कृतम् ॥७॥
प्रतिग्रहस्तत्प्रोक्तः पुच्छदेशे महीपते ।
अनेन विधिना दत्त्वा यथावत् कृष्णमार्गणम् ॥८॥
समग्रभूमिदानस्य फलमाप्नोत्यसंशयम् ।
सर्वांश्च लोकांश्चरति कामयानस्य जीवितम् ॥९॥

कामयानस्य [4]जीवितमिच्छतो [5]भोगार्थिन इत्यर्थः ।

[6]एतत्तु सर्वमाख्यातं[7] मार्गमाप्नोत्यसंशयम् ।
[8]कृष्णेप्सितं कृष्णमृगस्य चर्म दत्त्वा द्विजेन्द्राय समाहितात्मा[9] ।
यथोक्तमेतन्मरणं न शोचेत् प्राप्नोत्यभीष्टान् मनसः स लोकान् ॥१०॥

[उक्तसमयानामन्यतमे स्वेच्छया][10] भगवद्वासुदेवाग्रतो गोमयोपलिप्तापनीतकेशकीटादिभूमौ शोभनं कम्बलमास्तीर्य तत्रोपरि [11]कृष्णमृगाजिन-[मुक्तरूप][12]-मुक्तोपकरणमर्चितं ब्राह्मणायाग्निहोत्रिणे स्नाताय [13]वस्त्रयुगाच्छादिताय यथाशक्त्यलङ्कृतायार्चिताय [14]कृष्णाजिनपुच्छस्थाय[15] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-कृष्णाजिनदानफलप्राप्तिकामोऽहमेतदाविकवस्त्रोपरिप्रसारितं रुक्मशृङ्गं रूप्यपादं[16] मुक्तायुक्तलाङ्गूलं[17] तिलराशिसंच्छन्नं[18] वस्त्राच्छादितं सुवर्णनाभं [19]रत्नगन्धालङ्कृतं घृतक्षीरदधिमधुपूर्ण-[20]ताम्रकांस्यपात्रचतुष्टययुतं कृष्णाजिनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराज-निःशङ्क-शङ्कर-श्रीमद्वल्लालसेनदेवविरचिते श्रीदानसागरे
कृष्णाजिनदानावर्तः ।

1 A reads the following additional line after this, viz. जीवितं कामयानस्य जीवितासिद्धियोत्तमं
2 A स्नातं वस्त्रयुगाच्छन्नं
3 I. O. याप्यलङ्कृतं
4 A चितमिच्छतो
5 A भागार्थिन, I. O. भोगा
6 A एतत्ते
7 I. O. सर्व्वमाख्यात
8 I. O. कृष्णेप्सितं
9 A समाहितश्च
10 A उक्तसमयानामिच्छयान्यतमे for the bracketed portion
11 A omits कृष्ण
12 A omits the bracketed portion
13 A वस्त्राच्छादिताय
14 A कृष्णान
15 I. O. ०मुपस्थाय
16 A रूप्यदानं
17 A मुक्तालाङ्गुलं
18 A तिलराशिच्छन्नं
19 A वस्त्रगन्धालङ्कृत
20 A omits ताम्र

अथ प्रजापतिदैवतच्छत्रदानावर्तः । (५३)

तत्र छत्रदानप्रशंसा ।

महाभारते (अनु—९६।१४-१७) :—

सूर्य्य उवाच ।

महर्षे शिरसस्त्राणं [1]छत्रमातपवारणम् ।
प्रतिगृह्णीष्व पद्भ्यां च त्राणार्थं चर्मपादुके ॥१॥
अद्यप्रभृति चैवैतल्लोके [2]संप्रचरिष्यति ।
पुण्यदानेषु सर्वेषु [3]परमं कृत्यमेव च ॥२॥

भीष्म उवाच ।

छत्रोपानहमेतत्तु[4] सूर्येणैव प्रवर्तितम् ।
पुण्यमेतदभिख्यातं[5] त्रिषु लोकेषु भारत ॥३॥
[6]तस्मात् प्रयच्छ विप्रेषु छत्रोपानहमेव च ।
[7]धर्मस्ते सुमहद्भावी [8]न मेऽत्रास्ति विचारणा ॥४॥

अथ दानम् ।

याज्ञवल्क्यः (१।२११) :—

[9]गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।
यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥५॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं छत्रं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमत्यन्त[10]-सुखप्राप्तिकामोऽहमेतच्छत्रं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा छत्रमिदं प्रजापतिदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं

1 A छत्रं मभ्रस्मि वारणं
2 I. O. समुच्चरिष्यति, A सं -प्रचरिष्यति
3 A पर[illegible]यदैव च
4 A ०मेतत्त
5 A ०तिख्यातं
6 A reads the entire line as तस्माद्यं च विप्रस्य छत्रोपानहमुत्तमं
7 A धर्मस्तेषु महद्भावी
8 A [illegible]त्रास्ति
9 A गृहधान्यतयोपान०
10 A omits अत्यन्त

पठेत। [1]तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा छत्रं[2] गृह्णीयात्।

महाभारते[3] :—

न तं त्यजन्ति पशवः संग्रामे च [4]जयत्यपि।
पुत्रान् श्रियञ्च लभते [5]यश्छत्रं संप्रयच्छति।
न च क्षुद्व्याधिं लभते यज्ञभागमथाश्नुते ॥६॥

अर्च्चिताय ब्राह्मणायार्च्चितं छत्रम् [ॐ अद्यादि तुभ्यमन्तमुक्त्वा][6] दद्यात्। महाभारतोक्तानेककालस्थायि[7]-पशुशालित्व-[8]जयत्व--[9]जनकत्वोपलक्षितच्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [अत्र च फलभूयस्त्वेनोत्कृष्टच्छत्रदानम्।][10]

[11]तथा (अनु—६६।१८-१९) :—

छत्रं हि भरतश्रेष्ठ यः प्रदद्याद्द्विजातये।
शुभ्रं शतशलाकं वै स प्रेत्य सुखमश्नुते ॥७॥

[12]शतशलाकं [शतशलाकानिर्मितं वातिच्छत्रमिति][13] प्रसिद्धम्।

स शक्रलोके वसति पूज्यमानो द्विजातिभिः।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ ॥८॥

अर्च्चिताय ब्राह्मणायार्च्चितं [14]शतशलाकम् [शुक्लं छत्रम्][15] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त--शतशलाक-च्छत्रदान--[16]फलप्राप्तिकामोऽहमेतच्छतशलाक[17]-च्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A omits तत
2 I. O. छत्रदाने
3 I. O. महाभारते twice
4 A यजत्यपि
5 A यश्चत्रं, I. O. यच्छत्रं
6 A दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकदेवशर्म्मणे तुभ्यंमहमुक्त्वा for the bracketed portion
7 I. O. ...स्थायि
8 I. O. omits जयत्व
9 A omits जनकत्व
10 I. O. omits the bracketed portion
11 A यथा
12 A omits it
13 I. O. शतशलाकनिर्म्मितं इति for the bracketed portion
14 A शलाकं
15 I. O. omits the bracketed portion
16 A omits फल
17 I. O. omits च्छतशलाक, A reads तशलाक

[1]तथा (अनु—१३०।३३ख) :—

[2]छत्रदाने सुखच्छायां लभते परलोकगः ॥९॥

अर्चिताय ब्राह्मणायार्चितं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। परलोकसुखच्छायाप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

निदाघकाले वर्षे वा [3]यश्छत्रं संप्रयच्छति।
नास्य [4]कश्चिन्मनोदाहः कदाचिदपि जायते।
कृच्छ्रात् स विषमाच्चैव [5]क्षिप्रं मोक्षमवाप्नुयात् ॥१०॥

ग्रीष्मे वर्षासु वाऽर्चिताय ब्राह्मणायार्चितमुत्कृष्टं दृढं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-[6]वर्षानिदाघकालविहित-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

वराहपुराणे (२०६।१४ख-१५क) चित्रगुप्तवाक्ये :—

[उपानहौ[7] महच्छत्रं][8] जलभाजनमेव[9] च।
असकृद् येन दत्तानि [10]तस्मै पूजां प्रयच्छथ ॥११॥

असकृदित्यावृत्त्या दानख्यापनार्थम्। अर्चिताय ब्राह्मणायार्चितं बृहच्छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वराहपुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 A omits it
2 A छत्रदानात्
3 I. O. यच्छत्रं, A यश्चत्रं
4 A कान्तं मनोदाहः
5 A क्षौपं
6 A सर्व for वर्षा
7 Varāha P. च छत्रं च

A उपानहमहं छत्रं for the bracketed portion
Corrected from Varāha P.
I. O. and A जलं भोजनमेव
10 Corrected from Varāha P.
I. O. and A तस्मिन्

आग्नेयपुराणे :—

घर्मवर्षा-[1]तपत्राणं छत्रं दद्याद्द्विजातये ।
सर्वव्याधिविनिर्मुक्तः श्रियं [2]पुत्रांश्च विन्दति ॥१२॥

घर्मवर्षातपत्राणमिति ग्रीष्म-वर्षा-[शरत्सु तदु][3]-पद्रवस्य[4] [5]वारकमित्यर्थः ।

विमानेन च दिव्येन किङ्किणीजालमालिना ।
महेन्द्रभवनं याति सेव्यमानोऽप्सरोगणैः ॥१३॥

अर्चिताय ब्राह्मणायार्चितं[6] वर्षातपवारणक्षमं[7] छत्रम् ॐ[8] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्ववत् ।

[9]ब्रह्मपुराणे :—

[10]उपानद्युगलं छत्रं शय्यासनमथापि वा[11] ।
ये प्रयच्छन्ति वस्त्राणि तथैवाभरणानि च ॥१४॥
ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाभ्यलङ्कृताः ।
धर्मराजपुरं दिव्यं[12] छत्रैः सौवर्णराजतैः ॥१५॥

अर्चिताय ब्राह्मणायार्चितं छत्रम्[13] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [14]ब्रह्म-पुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

नन्दिपुराणे :—

आतपत्रन्तु यो दद्याद्ब्राह्मणाय तपस्विने ।
स कल्पवृक्षच्छायासु[15] विश्रान्तो गच्छते सुखम् ।
[16][दूर्वावनैः ससलिलैर्दिव्यैः] पुष्पमनोरमैः ॥१६॥

---

1 A ॰तपत्राणं
2 A पूर्वंश्च
3 A तपोभवो for the bracketed portion
4 I. O. ॰द्रव्यस्य
5 A वारकमित्यर्थः
6 A omits अर्चितं
7 I. O. omits क्षमं
8 A omits ॐ
9 I. O. ब्राह्मपुराणे
10 A उपानद्द्युगलं
11 A च
12 A omits it
13 A omits it
14 I. O. ब्राह्मपुराणोक्त
15 A ॰च्छायायां
16 A दुर्वादनैः सवाजिनो दिव्यै for the bracketed portion

तपस्विने [1]व्रतोपवासशीलाय अर्चिताय ब्राह्मणाय[2] अर्चितं छत्रम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात्। नन्दिपुराणोक्त-तपस्विब्राह्मण-सम्प्रदानकातपत्रदानफलप्राप्तिकामोऽहमेतदातपत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

वस्त्रं यश्चार्थिने दद्याच्छत्रं वापि यदृच्छया।
स भवेद्धनवान् श्रीमान् बृहस्पतिपुरे वसेत् ॥१७॥

[3]यदृच्छया [4]स्वच्छन्दतया व्रतशीलादिविशेषमनपेक्ष्यार्थिने ब्राह्मणायेत्यर्थः। अर्चिताय ब्राह्मणाय छत्रार्थिने[5]ऽर्चितं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नन्दिपुराणोक्त-यदृच्छाच्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आदित्यपुराणे :—

छत्रं ये तु प्रयच्छन्ति [विप्राय गुरवे गृहम्][6]।
न तेषां पतते घोरम् अग्निवर्षं सुदारुणम् ॥१८॥

अर्चिताय ब्राह्मणाय गुरवे वा छत्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आदित्यपुराणोक्त-च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

शाम्बपुराणे :—

छत्रं द्विजाय यो दद्यात् स प्रेत्य सुखमेधते[7] ॥१९॥

अर्चिताय ब्राह्मणायार्चितं छत्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। शाम्बपुराणोक्त-[8]छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३११।५-६क) :—

छत्रं शतशलाकन्तु दत्त्वैवातपवारणम्।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते।
याम्यं मार्गं तता[9] याति सुखेन द्विजसत्तमाः ॥२०॥

अर्चिताय ब्राह्मणायार्चितम् [आतपवारणोचितवस्त्रमय][10]-शतशलाकच्छत्रम् ॐ अद्यादि

1 I. O. व्रतोपवासशीलाय, A व्रतो-वासशीलाय
2 I. O. तपःशालिने after ब्राह्मणाय
3 I. O. यदृच्छय
4 A च्छन्दतया
5 A छत्रार्थिने ब्राह्मणाय
6 I. O. गुरुष्वपि सुरेषु, च for the bracketed portion
7 A सुखमोदते
8 A उत्कृष्ट before छत्र
9 V. D. तथा
10 A आतपोनिवारणोचित for the b. p.

तुभ्यमहं सम्प्रददे इत्युक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-शतशलाक-[1]च्छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३११।४):—

वितानकप्रदानेन सर्वपापैः प्रमुच्यते।
छत्रदश्च तथा विप्रा नात्र कार्या विचारणा ॥२१॥

अर्चिताय ब्राह्मणायार्चितं छत्रम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इत्युक्त्वा दद्यात्। सर्वपाप-प्रमोचकत्व[2]-प्राप्तिकामोऽहमेतच्छत्रं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे छत्रदानावर्तः।

1 A omits च्छत्र

2 I. O. सर्वपापप्रमोचक, A ॰प्रशमन

अथोत्तानाङ्गिरोदैवतोपानद्दानावर्तः । (५४)

याज्ञवल्क्यः (१।२११) :—

[1]गृहधान्याभयो-[2]पानच्छत्रमाल्यानुलेपनम् ।

यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितउपानहौ दद्यात् । ॐ [3]अद्यामुकसगोत्रायामुकवेदा[4]-मुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमत्यन्त[5]-सुखप्राप्तिकामोऽहमेते उपानहौ ददानि । प्रतिग्रहीता[6] स्वस्तीत्युक्त्वा सावित्रीं पठित्वा उपानहावेते उत्तानाङ्गिरोदैवते इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[7] काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा उपानहावारोहेत[8] ।

विष्णुः :—

उपानत्प्रदानेनाश्वतरीयुत[9]-रथम् ॥२॥

प्राप्नोतीति शेषः । अर्चिताय ब्राह्मणायार्चितउपानहौ[10] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अश्वतरीयुतरथप्राप्तिकामोऽहमेतउपानहौ ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

बृहस्पतिः :—

असिपत्रवनं मार्गं क्षुरधारा[11]-समन्वितम् ।

तीक्ष्णातपञ्च तरति छत्रोपानत्प्रदो नरः ॥३॥

छत्रोपानत्प्रद इत्यत्र द्वन्द्वनिर्देशो यद्यप्युभयोः क्रियासम्बन्धमात्रेणैवोपपद्यते, तथापि चण्डातपजन्यक्लेशस्य [12]छत्रोपानद्युगाभ्यामेव वारयितुं शक्यत्वात् सहितयोरेव दानम् । अर्चिताय ब्राह्मणायार्चितं छत्रमुपानद्युगञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । बृहस्पत्युक्त-

1 A गृहधान्यन्तु यो
2 I. O. ०पन०
3 A अद्यादि अमुक०
4 A दाय for वेदा-
5 A अन्तमुक्त्वा दद्यात् for अत्यन्त
6 A प्रतिग्रहीता
7 A दक्षिणामि
8 A उपानहावारोहयेत
9 A omits युत
10 I. O. ०उपानहे, A ०र्चितायवोपानहौ
11 A ०धार०
12 A छत्रोपानहौ [illegible]

छत्रोपानद्दानफलप्राप्तिकामोऽहमेतच्छत्रोपानहौ ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा छत्रोपानहावेते प्रजापत्युत्तानाङ्गिरोदैवते इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। छत्रस्य दण्डग्रहणमुपानहारोपणञ्च स्वीकारः[1]।

महाभारते (अनु—९६।२०-२१) :—

दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ।
स्नातकाय महाबाहो संश्रिताय द्विजातये ॥४॥

स्नातकाय गुरुकुलान्निवृत्ताय। संश्रितायोपस्थिताय।

सोऽपि लोकानवाप्नोति दैवतैरपि पूजितान्।
गोलोके च मुदा युक्तो वसति प्रेत्य मानद ॥५॥

अर्चिताय यथोक्तरूपाय ब्राह्मणायार्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-दह्यमान-सम्प्रदानकोपानद्दान-फलप्राप्तिकामोऽहमेते उपानहौ ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा (Cf. अनु—९६।३ख) :—

यानं [2]रथोपानह्-सम्प्रदानात् ॥६॥

प्राप्नोतीति शेषः। अर्चिताय ब्राह्मणायार्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। यानप्राप्तिकामोऽहमेते उपानहौ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नरसिंहपुराणे :—

छत्रोपानद्दाता(?) च स्वर्गं यात्युपशोभनम् ॥७॥

अर्चिताय ब्राह्मणायार्चितं छत्रमुपानद्युगञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। उपशोभनाख्यस्वर्गप्राप्तिकामोऽहमेतच्छत्रोपानहौ ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा छत्रोपानहावेते प्रजापत्युत्तानाङ्गिरोदैवते इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। दक्षिणा पूर्ववत्। छत्रस्य दण्डग्रहणमुपानहोरारोहणञ्च स्वीकारः[3]।

वराहपुराणे (२०६।१४ख-१५क) चित्रगुप्तवाक्ये :—

उपानहौ महच्छत्रं[4] जलभाजनमेव[5] च।
असकृद् येन दत्तानि तस्मै[6] पूजां प्रयच्छथ ॥८॥

---

1 Supplied to complete the sense. I. O, and A omit it.
2 I. O. रथोपानह
3 Supplied. I. O. and A omit it.
4 Varāha P. च छत्रं च
5 Corrected from Varāha P. I. O. and A जलं भोजनमेव
6 Corrected from Varāha P. I. O. and A तस्मिन्

अर्चिताय ब्राह्मणायार्चितमुपानद्युगलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वराह-पुराणोक्तोपानद्दानफलप्राप्तिकामोऽहमेते उपानहौ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। असकृदिति पदश्रवणा-[1]देतद्दानमावृत्त्या देयम्।

[2]ब्रह्मपुराणे :—

उपानद्युगलं छत्रं शय्यासनमथापि वा।
ये प्रयच्छन्ति वस्त्राणि तथैवाभरणानि च ॥९॥
ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाभ्यलङ्कृताः।
धर्मराजपुरं दिव्यं छत्रैः सौवर्णराजतैः ॥१०॥

[3]ब्रह्मपुराण एव दारुमयपादुकादानस्य भेदेनोपादानादत्र चर्मोपानद्दानमपेक्षितम्। अर्चिताय ब्राह्मणायार्चितमुपानद्युगलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [4]ब्रह्मपुराणोक्त-चर्मोपानद्युगलदानफलप्राप्तिकामोऽहमेतच्चर्मोपानद्युगलं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

काष्ठपादुका[5]-यानानि पीठका[6]-न्यासनानि च।
यैर्दत्तानि द्विजातिभ्यस्तेऽध्वानं यान्ति वै सुखम् ॥११॥
सुवर्णमणिपीठेषु पादौ कृत्वोत्तमेषु च ॥
ते प्रयान्ति विमानैस्तु अप्सरोगणमण्डितैः ॥१२॥

द्विजातिभ्य इति बहुवचनं दातृबहुत्वापेक्षम्। अर्चिताय ब्राह्मणायार्चितं काष्ठघटित-पादुकायुगम्[7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [8]ब्रह्मपुराणोक्त-काष्ठमयपादुकादानफल-प्राप्तिकामोऽहमेतत् काष्ठपादुकायुग[9] ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आग्नेयपुराणे :—

दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ।
न तस्य [10]मनसो दाहः कदाचिदपि जायते ॥१३॥

1 I. O. ०मेत०
2 I. O. ब्राह्मपुराण
3 I. O. ब्राह्मपुराणे
4 I. O. ब्राह्मपुराणोक्त०
5 I. O. पादुक
6 I. O. पीठक
7 A काष्टघटिकापादुकायुगलं
8 I. O. ब्राह्मपुराणोक्त०
9 I. O. काष्ठदयपादुकायुग
10 A मानसो

[1]रथश्चाश्वतरीयुक्तं तस्य हेममयं शुभम् ।
उपतिष्ठति [2]विप्रर्षे सर्वरत्नविभूषितम् ॥१४॥

दह्यमानाय [3]सन्तप्तभूमिभ्रमणजातचरणदाहाय । अर्चिताय ब्राह्मणाय उक्तरूपाया-[4]र्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्तोपानद्दानफलप्राप्ति-कामोऽहमेते उपानहौ ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[नन्दिपुराणे :—

उपानहौ च यो दद्याद्ब्राह्मणाय प्रवासिने[5] ।
सगजैस्तु रथैर्याति याम्ये पथि महासुखम् ॥१५॥

अर्चिताय ब्राह्मणाय प्रवासिनेऽर्चिते उपानहौ ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दि-पुराणोक्तोपानद्दानफलप्राप्तिकामोऽहमेते उपानहौ ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।][6]

आदित्यपुराणे:—

अश्वं वा यदि वा युग्मं[7] शोभने वाथ पादुके ।
ददते याचमानेभ्यो ब्राह्मणेभ्यः सुसंयुताः ॥१६॥

ब्राह्मणेभ्य इति बहुवचनं दातृबहुत्वापेक्षम् ।

तेषां दिव्यानि यानानि [8]रथा ध्वजपताकिनः ।
दुष्टः पन्था न चैवेह भविष्यति कथञ्चन ॥१७॥

अर्चितायार्थिने[9] [10]ब्राह्मणायार्चितमुपानद्युगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यपुराणोक्तपादुकादानफलप्राप्तिकामोऽहमेते पादुके[11] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

शाम्बपुराणे :—

उपानहौ च यो दद्याच्छ्रद्दधे[12] [13]स्नेहसमन्विते ।
गोलोके स मुदा युक्तो वसति प्रेत्य मानवः[14] ॥१८॥

1 A यानधाश्वतरैयुक्तं
2 I. O. विप्रर्ष
3 I. O. सतप्त०, A विप्राय भूमिभ्रमण-जातचरणातद्दाहाय
4 A ०र्चितायमुपानद्युगः
5 I. O. तपस्विने
6 A omits the bracketed portion
7 A योग्यं
8 A रथध्वज०
9 A अर्चिताय तपस्विने
10 A ब्राह्मणायार्चितायमुपानद्युग
11 A पादुका
12 A [illegible]
13 A [illegible]
14 I. O. मानवे:

अर्चिताय ब्राह्मणायार्चितं तैलाभिषिक्तं[1] श्लक्ष्णमुपानद्युगलम्[2] ॐ अद्यादि तुभ्य-मन्तमुक्त्वा दद्यात्। [3]शाम्बपुराणोक्तोपानद्दानफलप्राप्तिकामोऽहमेते[4] उपानहौ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

विष्णुधर्मोत्तरे (३।३११।६ख—७) :—

उपानहौ तथा दत्त्वा श्लक्ष्णे स्नेहसमन्विते[5]।
रथमश्वतरीयुक्तं त्रिदिवे प्रतिपद्यते।
सर्वपापविनिर्मुक्तो याम्यं[6] मार्गं सुखं व्रजेत् ॥१६॥

अर्चिताय ब्राह्मणायार्चितं सुकुमारं घृतनवनीताद्यनुलिप्तं [7]चर्मपादुकायुगलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-सस्नेहोपानद्दान[8]-फलप्राप्तिकामोऽहमेते उपानहौ ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते [श्रीदानसागरे उपानद्दानावर्तः][9]।

1 A तैलाक्तयुक्तं
2 A ०युगं
3 I. O. नवि०
4 A ०मेतत्
5 A ०समन्वितः
6 I. O. and V. D. याम्यमार्गं
7 A धर्म०
8 I. O. omits दान
9 A श्रीदानदेयं for the bracketed portion

[1][अथ नानादैवतयानदानावर्तः । (५५)

आग्नेयपुराणे :—

> पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च ।
> ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये ॥१॥
> यानमश्वमनड्वाहं हेमं रूप्यं मणींस्तिलान् ।
> ये प्रयच्छन्यि पापेषु निरताः सर्वदा मुने ।
> न तेषां भैरवः पन्था दत्त्वैषां दानमित्युत ॥२॥

पापेषु निरताः सर्वदेति वचनादतिप्रचुरपापक्षयार्थमिदं देयम् । उक्तदिनानामन्यतमेऽर्चिताय ब्राह्मणाय प्रसिद्धानामन्यतममर्चितं यानं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमाग्नेयपुराणोक्त-यान-दानफलप्राप्तिकामोऽहमेतद्यानं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यानमिदं विष्णुदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा यानमारोहेत ।

आदित्यपुराणे :—

> तीर्थे तडागकूपादिनौकासेतुप्रदाश्च ये ।]
> स्कन्धेन तारयेद् यस्तु तृषार्तानां[2] जलप्रदः ॥३॥
> षष्टिकोटिसहस्राणि [3]अर्बुदानाञ्च वै त्रयम् ।
> क्रीडन्ति ते श्वेतपुरे एतदुक्तं[4] द्विजोत्तम ॥४॥

[अत्र सोपकरणां][5] नौकामुपकल्प्य[6] [7]नानासत्त्वेभ्यो जलदुर्ग[8]-सन्तरणायोत्सृज्य दद्यात् । ॐ [9]आदित्यपुराणोक्त-नौकादान[10]-फलप्राप्तिकामोऽहं नानासत्त्वेभ्यो[11] जलदुर्ग[12]-सन्तरणाय नौकां दास्ये ।

---

1 A omits the ... tion
2 A तृषार्त्तां मा
3 A अबुदानच
4 A एतदुक्त
5 A काष्ठायामेर् ... ted portion
6 A ०कल्प
7 I. O. मानां for
8 A ०दुग्ध
9 I. O. अद्यादित्य०
10 I. O. नौकादत्त
11 A नानात्व
12 A जलदुग्ध

[तथा :—

अश्वं वा यदि वा युग्मं शोभने वाथ पादुके ।
[ददते याचमानेभ्यो][1] ब्राह्मणेभ्यः सुसंयताः[2] ॥५॥
तेषां दिव्यानि यानानि रथा ध्वजपताकिनः ।
दुष्टः पन्था न चैवेह भविष्यति कदाचन ॥६॥

ब्राह्मणेभ्य इति बहुवचनं दातृबहुत्वापेक्षम् । [रथो गोयानम्][3] । [4]अलोकरूपमर्चितं यानमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आदित्यपुराणोक्त-युग्मदान-फलप्राप्तिकामोऽहमेतद्युग्मं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।][5]

नन्दिपुराणे :—

[योऽश्वं गजं रथश्चापि][6] ब्राह्मणे प्रतिपादयेत् ।
स शक्रस्य वसेल्लोके[7] यथा शक्रो युगान् दश ।
प्राप्यान्ते[8] [चाथ मानुष्यं][9] राजा भवति ऋद्धिमान्[10] ॥७॥

अर्चिताय ब्राह्मणायार्चितं रथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्त-रथदानफलप्राप्तिकामोऽहमेतं रथं ददानि । स्वस्तिसावित्रीपाठान्ते[11] रथोऽयं प्रजापति-दैवत इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादिकं पूर्ववत् । इशाग्रहणं स्वीकारः ।

विष्णुधर्मोत्तरे (३।३०६।३५-३६क) ।—

गोभिश्चतुर्भिः संयुक्तं रथं दत्त्वा द्विजातये ।
धान्यैर्वस्त्रैर्युतं शक्त्या शक्रलोकं व्रजन्ति ते ।
मानुष्यमासाद्य तथा भवन्ति वसुधाधिपाः ॥८॥

अर्चिताय ब्राह्मणायार्चितं यथाशक्ति धान्यवस्त्रसहितं वृषभचतुष्टययुक्तं रथम् ॐ

1 A ददाति यः प्रदानम्वा for the bracketed portion
2 A सुसंयतः
3 A रथद्गोयानं for the bracketed portion
4 A reads यद्वोक्त० and adds the following line just above it, स्वर्ग प्रत्येनतभावचचाफ्लावाधाना-परिच्छिन्नः
5 I. O. omits the bracketed portion
6 I. O. योऽश्वराजं रथश्चापि for the bracketed portion
7 A वसेल्लोके
8 I. O. प्राप्यास्ते
9 A मानुषं लोकं tor the b. p.
10 A निश्चितं
11 A पाठान्तर

अयादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तगोचतुष्टययुक्त-रथदानफलप्राप्ति-[कामोऽ][1]-हमे-[तं धान्य][2]-वस्त्रसहितं गोचतुष्टययुक्तं रथं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१२।१०ख-११क) :—

चतुर्भि-[3]स्तुरगैर्युक्तं सर्वोपकरणैर्युतम्।
रथं द्विजातये दत्त्वा[4] राजसूयफलं लभेत ॥९॥

अर्चिताय ब्राह्मणायार्चितं प्रसिद्धपताकाध्वजेशायुगरज्वादि[5]-रथोपकरणसहितमश्वचतुष्टय-युक्तं रथम् ॐ अयादि तुभ्यमन्तमुक्त्वा दद्यात्। राजसूयफलप्राप्तिकामोऽहमेतं तुरगचतुष्टय-युक्तं सर्वोपकरणयुतं रथं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१२।१४-१५) :—

चतुर्भिः कुञ्जरैर्युक्तं रथं दत्त्वा द्विजातये।
समग्रभूमिदानस्य फलं प्राप्नोत्यसंशयम् ॥१०॥
भूमिः [सशैला सवना][6] सतोया दत्ता हि लोके भवतीह तेन।
इष्टांश्च लोकान् पुरुषः प्रयाति [7]सम्पूज्यमानस्त्रिदशैर्महात्मा[8] ॥११॥

अर्चिताय ब्राह्मणायार्चितं कुञ्जरचतुष्टययुक्तं रथम् ॐ अयादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-रथदानफलप्राप्तिकामोऽहमेतं कुञ्जरचतुष्टययुक्तं रथं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा (३।३०६।३६ख-३७क) :—

शकटस्य प्रदानन्तु विना गोभिर्महाफलम्।
विशेषेण [9]महाभागास्तस्य गोभिर्युतस्य च ॥१२॥

गोभिर्युतस्येति बहुवचनाद्वृषचतुष्टययुक्तस्येत्यर्थः। अर्चिताय ब्राह्मणायार्चितं [10]गो-रहितं शकटम् ॐ अयादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-स्वरूपशकटदानफल-प्राप्तिकामोऽहमेतं शकटं[11] ददानि। स्वस्तिसावित्रीपाठानन्तरं शकटोऽयमुत्तानाङ्गिरोदैवत

1 A omits the bracketed portion
2 A तद्धान्यं for the bracketed portion
3 A omits स्तु
4 A द्विजाय दत्त्वा च
5 A युगन्धरादि०
6 A सर्वैन्यवग्रवषा for the bracketed portion
7 I. O. सपूज्यमान०
8 A. ०महात्मभिः
9 A महाभाग तस्य
10 I. O. गोवीहित, A गोरहित
11 A एतच्छकटं

इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । गोचतुष्टययुक्तशकटदाने तु विष्णुधर्मोत्तरोक्त-गोयुक्तशकटदान-[1]फलप्राप्तिकामोऽहमेतं गोचतुष्टययुक्तं शकटमिति दानवाक्ये विशेषः ।

तथा (३।३०६।३७ख) :—

सशस्यं शकटं दत्त्वा नाकलोके महीयते ॥१३॥

अर्चिताय ब्राह्मणायार्चितं धान्यादिशस्यसहितं शकटम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षनाकलोकप्राप्तिकामोऽहमेतं[2] सशस्यं शकटं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१२।१) :—

नृवाह्यं पुरुषो यस्तु द्विजे सम्यक् प्रयच्छति ।
अश्वमेधफलं तस्य कथितं द्विजसत्तमाः ॥१४॥

द्विजसत्तमा इति सम्बोधनम् । नृवाह्यं दोलां सम्यगित्युपधानादिसहितामित्यर्थः । अर्चिताय ब्राह्मणायार्चितामुक्तरूपां दोलाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अश्वमेधफलप्राप्तिकामोऽहमेतत् [सोपधानं नृवाह्यं][3] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत्[4] ।

तथा (३।३३१२।२क) :—

शिविकायाः प्रदानेन वह्निष्टोमफलं तथा ॥१५॥

कथितमिति सम्बन्धः । शिविका चतुर्दोलकम् । अर्चिताय ब्राह्मणायार्चितां शिविकाम्[5] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [6]वह्निष्टोमफलप्राप्तिकामोऽहमेतां शिविकां ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे यानदानावर्तः ।

1 A omits फल
2 I. O. ॰मेतत्
3 A नृवाह्यमुपधानादिसहितं for the bracketed portion
4 A adds शकटदानमिति वत् after this
5 A अर्चितमुक्तरूपां for अर्चितां शिविकाम्
6 A अग्नि॰

अथ प्रजापतिदैवतगजदानावर्तः । (५६)

नन्दिपुराणे :—

> योऽश्वं गजं रथं वापि [1]ब्राह्मणे प्रतिपादयेत ।
> [स शक्रस्य वसेल्लोके][2] यथा शक्रो[3] युगान् दश ।
> [4]प्राप्यान्ते चाथ मानुष्यं[5] राजा भवति ऋद्धिमान्[6] ॥१॥

अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितं गजं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं नन्दिपुराणोक्त-गजदानफलप्राप्तिकामोऽहमेतं गजं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा गजोऽयं प्रजापतिदैवत इत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत । ततः ॐ अद्य[7]कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा गजमारोहेत्[8] ।

विष्णुधर्मोत्तरे (३।३१२।१३) :—

> सुवर्णकम्बुं[9] मातङ्गं दत्त्वा विप्राय वै द्विजाः ।
> राजसूयाश्वमेधाभ्यां फलं विन्दत्यसंशयम् ॥२॥

[द्विजा इति सम्बोधनम् ।][10] स्वर्णमयकम्बुसहितं[11] गजमर्चितं[12]-मर्चिताय [13]ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [विष्णुधर्मोत्तरोक्त-सुवर्णकम्बु-मातङ्गदानफलप्राप्तिकामोऽहमेतं सुवर्णकम्बुं मातङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१२।१२) :—

> कुञ्जरस्य प्रदानेन मनुष्यः स्वर्गविच्युतः ।
> राजा भवति लोकेऽस्मिन् यशोविक्रमसंयुतः ॥३॥

---

1 A ब्राह्मणेभ्यः प्रदापयेत्
2 A शक्रलोके वर्तते स for the bracketed portion
3 I. O. यथाशक्ति
4 A संप्राप्य चाथ, I. O. प्राप्यान्ते चाथ
5 I. O. [illegible]
6 A वाङ्मान
7 A omits अथ
8 A °रोहयेत्
9 A °कक्षं
10 A omits the bracketed portion
11 A °कक्षासहितं
12 A omits अर्चितम्
13 A adds [illegible] before ब्राह्मणाय

ब्राह्मणायार्चितायार्चितं कुञ्जरम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।][1] विष्णुधर्मोत्तरोक्त-[2]स्वरूपकुञ्जरदानफलप्राप्तिकामोऽहमेतं कुञ्जरं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३१२।११ख) :—

प्रदाय करिणीं[3] [4]सम्यगेतदेव फलं लभेत् ॥४॥

[5]एतदेव फलमिति पूर्वोक्तं राजसूयफलम्।

तद् यथा (३।३१२।१०ख-११क) :—

चतुर्भिस्तुरगैर्युक्तं सर्वोपकरणैर्युतम्।
[6]रथं द्विजातये दत्त्वा राजसूयफलं लभेत् ॥५॥

[7]सम्यग् विधिना प्रदायेति पृष्ठास्तीर्णपटी-कम्बल-घण्टा-[8]कम्बूपकरणसहितां दत्त्वेत्यर्थः। तदेवं करिणीमुक्तरूपामर्चिता[9]-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। राजसूयफल[10]-प्राप्तिकामोऽहमेतामलङ्कृतां करिणीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे गजदानावर्तः।

1 A omits the bracketed portion
2 A सुरूप०
3 I. O. करिणीं
4 I. O. सम्यमेतदेव
5 A तदेव
6 A कथं
7 I. O. सम्यं
8 A कत्तामुपकरण०
9 A omits अर्चिताम्
10 A [illegible] फल

अथ यमदैवताश्वदानावर्तः । (५७)

मनुः (४।२३१) :—

अश्विसालोक्यमश्वदः ॥१॥

[1]प्राप्नोतीत्यनुषज्यते । अत्र यजमानोऽर्चिताय ब्राह्मणायार्चितमश्वं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमश्विसालोक्यप्राप्तिकामोऽहमेतमश्वं ददानि । [2]अत्र प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वाऽश्वोऽयं यमदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं[3] काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वाऽश्वं [4]कर्णे गृह्णीयात् ।

याज्ञवल्क्यः (१।२१०) :—

भूदीपाश्वान्नवस्त्राम्भस्तिलसर्पिःप्रतिश्रयान् ।
नैवेशिकस्वर्णरूप्यान्[5] दत्त्वा स्वर्गे महीयते ॥२॥

अर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतमश्वं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

महाभारते :—

यावन्ति [6]रोमाणि हये भवन्तीह [7]नरेश्वर ।
तावतो वाजिदा[8] लोकान् प्राप्नुवन्ति महीपते ॥३॥

लोकान् देवलोकान् । अत्र [9]फलोत्कर्षादुत्कृष्टाश्वदानम् । [10]तदलार्चितमुत्कृष्टमश्वमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-वाजिदानफलप्राप्तिकामोऽहमेतं वाजिनं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

स्कन्दपुराणे :—

[रथमश्वं गजं दासीं][11] कन्यां गृहमथापि वा ।
भूमिञ्च यः प्रयच्छेत्तु[12] स राजा भुवि जायते ॥४॥

---

1 A प्राप्नोत्यनुषज्यते, I. O. आम्नातीत्यनुयुज्यते
2 A omits अत्र
3 A एतत् for इदं
4 A omits कर्णे
5 A नैवेसिकर्नसयानदयान, Yāj. ०भूर्यान्
6 A हयरोमाणि
7 A नरेश्वरा:
8 I. O. वाजिनो
9 A फलोत्कर्षंप्रतिवत्कृष्टाश्वदानं
10 A omits तद्
11 I. O. रथमश्वराजं दासीं वा for the bracketed portion
12 A प्रयच्छेत

अर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। भूमिराज्य-प्राप्तिकामोऽहमेतमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

अश्वं [यस्तु प्रयच्छेत][1] हेमचित्रं सुलक्षणम्।
स तेन कर्मणा [देवि गान्धर्वं][2] लोकमश्नुते ॥५॥

अर्चिताय ब्राह्मणायार्चितं[3] सौवर्णाभरणभूषितं शोभनलक्षणयुक्त[4]-मश्वमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। गान्धर्वलोकप्राप्तिकामोऽहमेतं हेमचित्रमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

आदित्यपुराणे :—

अश्वं वा यदि वा युग्मं[5] शोभने [6]चाथ पादुके।
ददाति [यो वसेत् स्वर्गे][7] ब्राह्मणेभ्यः सुसंयतः[8] ॥६॥
तेषां दिव्यानि यानानि [9]रथा ध्वजपताकिनः।
दुष्टः पन्था न चैवेह भविष्यति कथञ्चन ॥७॥

ब्राह्मणेभ्य इति बहुवचनमश्वादिदेयबहुत्वापेक्षम् [10]एकस्याश्वस्य बहुभ्यो दानप्रतिषेधात्। सुसंयतोऽनृतभाषण-पतित-[11][चाण्डालादिभाषण]-वर्जितः। तदत्रोक्तरूपो यजमानोऽर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आदित्यपुराणोक्ताश्वदानफल-प्राप्तिकामोऽहमेतमश्वं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

नन्दिपुराणे :—

योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत्।
स शक्रस्य वसेल्लोके यथा शक्रो युगान् दश।
प्राप्यान्ते चाथ मानुष्यं [12]राजते धरणीतले ॥८॥

अर्चिताय ब्राह्मणायार्चितं यथाशक्त्युत्कृष्टमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।

1 I. O. यस्य प्रयच्छेत्तु for the bracketed portion
2 A देवि गान्धर्व्व and I. O. देवी गान्धर्वं for the bracketed portion
3 A omits अर्चितं
4 A omits युक्त
5 A अश्व
6 A वाथ
7 I. O. यत्प्रदानं वै for the bracketed portion
8 I. O. सुसंयताः
9 A रथ
10 A एकस्य only
11 I. O. चाण्डालाप for the bracketed portion
12 A [illegible] धरणीतले, I. O. राजा भवति ऋद्धिमान्

नन्दिपुराणोक्ताश्वदानफलप्राप्तिकामोऽहमेतमश्वं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

आग्नेयपुराणे :—

पुष्ये वा जन्मनक्षत्रे अयने विषुवेषु च ।
ग्रहणे च व्यतीपाते संक्रान्तौ च दिनक्षये ॥९॥
[1]यानमश्वमनड्वाहं हेमरूप्यमणींस्तिलान् ।
ये प्रयच्छन्ति [2]पापेषु निरताः सर्वदा मुने ।
न तेषां भैरवः पन्था दत्त्वैषां [3]दानमित्युत ॥१०॥

पापेषु निरताः सर्वदेत्यभिधानात् [4]बहुतरपापक्षयार्थमिदं [5]देयम् । तथा च गौतमेनाश्वस्य [6]पापनिष्क्रयणद्रव्यत्वमुक्तम् । उक्तसमयानामन्यतमेऽर्चिताय ब्राह्मणायार्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । आग्नेयपुराणोक्ताश्वदानफलप्राप्तिकामोऽहमेतमश्वं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३१२।६ख-८क) :—

दानानामुत्तमं दानं प्रदानं तुरगस्य तु[7] ।
[8]वडवायाः प्रदानञ्च तथा बहुफलं स्मृतम् ॥११॥
तुरगं ये प्रयच्छन्ति सूर्यलोकं व्रजन्ति ते ।
यावन्ति [9]तस्य रोमाणि तावद्वर्षशतानि च ॥१२॥

[10][विष्णुधर्मोत्तर एव] शुक्लतुरङ्गदाने फलविशेष-[11]श्रवणादयं शुक्लेतरस्तुरङ्गः । अर्चिताय ब्राह्मणायार्चितं शुक्लेतरमश्वम्[12] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तानलङ्कृत-[13]श्वेतेतरतुरगदानफलप्राप्तिकामोऽहमेतं तुरङ्गमं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । [14][वडवादानवाक्ये तु विष्णुधर्मोत्तरोक्त]-वडवादानफलप्राप्तिकामोऽह-[15][मेतां वडवामिति विशेषः] । [स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।][16]

1 A यानमश्वच गाश्चैव
2 A पापेभ्यो
3 A दानमिच्छता
4 A बहुतरपापानां पापक्षयार्थमिदं
5 A omits देयम्
6 I. O. पापनिःक्रमेपनद्रव्यमुक्त
7 A च
8 A वत्तराबा:
9 A यस्य
10 A विष्णुधर्मोत्तर विष्णुधर्मो परोक्त for the bracketed portion
11 I. O. श्रवणाद्देयं
12 A शुक्लेतरवर्णमश्वम
13 A श्वेत for श्वेतेतर
14 A omits the bracketed portion
15 I. O. मेतं तुरगं ददानि for the bracketed portion
16 A omits the bracketed portion

[1][तथा (३।३१२।८ख-९क) :—

> शुक्लं तुरङ्गमं दत्त्वा फलं दशगुणं भवेत् ।
> गौर्यथा कपिला श्रेष्ठा तथैव तुरगः स तु ॥१३॥

दशगुणं शुक्लेतरप्रदानफलं प्राप्नोतीत्यर्थः । अर्चिताय ब्राह्मणायार्चितं शुक्लमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-शुक्लतुरङ्गदानफलप्राप्तिकामोऽहमेतं तुरङ्गं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।]

तथा (३।३१२।९ख-१०क) :—

> तुरङ्गमं सपर्याणं सालङ्कारं प्रयच्छतः ।
> पुण्डरीकफलं प्रोक्तं नात्र कार्या विचारणा ॥१४॥

अर्चिताय ब्राह्मणाय घण्टिका-[चामरशंख][2]-मालिकासुवर्ण-[3]रचित-ग्रैवेयकतिलकान्वितं पर्याणादिना सज्जीकृतमर्चितमश्वम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पुण्डरीकफलप्राप्तिकामोऽहमेतं सपर्याणं सालङ्कारं तुरङ्गमं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे अश्वदानावर्तः ।

1 I. O. omits the bracketed portion

2 A चामरसंख्या for the bracketed porion

3 I. O. खचित॰

अथ [1]यमदैवतमहिषदानावर्तः । (५८)

आग्नेयपुराणे :—

[2]महिषीदानमाहात्म्यं कथयामि नृपोत्तम ।
पुण्यं पवित्रमायुष्यं सर्वकामफलप्रदम् ॥१॥
सूर्यचन्द्रग्रहे पुण्ये कार्तिक्यामयने तथा ।
शुक्लपक्षे चतुर्दश्यां सूर्यसंक्रान्तिवासरे ॥२॥
यदा वा[3] जीवितं वित्तं चित्तञ्च कुरुनन्दन ।
तदैव[4] देया महिषी संसारभयभीरुणा[5] ॥३॥
[6]सुपयोधरा सुश्रृङ्गी सुखुरा सुकटिस्तथा ।
प्रथमा तरुणी धेनुः सुशीला दोषवर्जिता ॥४॥

प्रथमा तरुणी धेनुः प्रथमप्रसूता धेनुरित्यर्थः । दोषवर्जिताऽव्यङ्गा ।

सुवर्णश्रृङ्गतिलका घण्टाभरणभूषिता ।
रक्तवस्त्रावृता[7] देया ताम्रदोहनकान्विता ॥५॥

सुवर्णश्रृङ्गतिलकेति[8] [9]सुवर्णश्रृङ्गी सुवर्णतिलका चेत्यर्थः । [10]घण्टाभरणभूषितेति घण्टया सौवर्णग्रैवेयकाभरणेन [11]च भूषितेत्यर्थः ।

पिण्याकपिटकोपेता सहिरण्या च शक्तितः ।
सप्तधान्ययुता [12]देया ब्राह्मणे वेदपारगे ॥६॥

पिण्याकपिटकोपेता [13]तिलखलीपूर्णपिटकयुता । सप्तधान्यानि परिभाषोक्तानि ।

पुराणपाठके तद्वत् सकुटुम्बे [14]सुखिदति ।
सहिरण्यां सवस्त्राञ्च [15]पुण्येऽह्नि विधिपूर्वकम् ॥७॥

---

1 A अथयमदैवतमहीषदानावर्तः
2 I. O. महिष॰
3 A च
4 A तदेव
5 A संसारभयमोचनी
6 A सुपयोधरा
7 A रक्तवस्त्रावृता
8 A सुवर्णशृङ्गतिलक इति
9 A omits सुवर्णशृङ्गी
10 A घण्टाभूषितेति
11 I.O. न च
12 A येता
13 I. O. तिलखलीपूर्णकण्डोलयुता
14 I. O. सुखीदति, A सुदीदति
15 A पुण्याह

सहिरण्यां सवस्त्रामिति पुनरभिधानं[1] वेदपारगव्यतिरेकेण सकुटुम्बदरिद्रपुराण-[2]पाठक-ब्राह्मणदानपक्षेऽपि हिरण्यवस्त्रयोरवश्य-[3]देयत्वार्थम् ।

दद्यान्मन्त्रेण राजेन्द्र पुराणविहितेन च ।
इन्द्रादिलोकपालानां [या राजन् [4]महिषी शुभा] ।
[5]तस्या दानं महाराज सास्तु मे सर्वकामदा ॥८॥
धर्मराजस्य [6][साहाय्ये यस्य पुत्रः प्रतिष्ठितः] ।
महिषासुरस्य जननी या सास्तु वरदा मम ॥९॥
दद्यात् सुदक्षिणां[7] तत्र ब्राह्मणाय पयस्विनीम् ।
प्रतिग्रहः स्मृतस्तस्याः पुच्छदेशे स्वयम्भुवा ॥१०॥

सुदक्षिणां[8] बहुदक्षिणाम् ।

एवं दत्त्वा विधानेन ब्राह्मणस्य गृहं नयेत् ।
क्षमापयेत्ततो विप्रं येन सन्तुष्टिमेयिवान् ॥११॥
अनेन विधिना दत्त्वा महिषीं[9] द्विजपुङ्गवे ।
सर्वकामानवाप्नोति इह लोके परत्र च ॥१२॥
[या स्त्री ददाति महिषीं सा राजमहिषी भवेत् ।][10]
यज्ञयाजी भवेद्विप्रः क्षत्रियो विजयी भवेत् ।
धनाधिपो भवेद्वैश्यः शूद्रः सर्वार्थसंयुतः[11] ॥१३॥
तस्मान्नरेण दातव्या महिषी विभवे सति ।
पितॄणां तारणार्थाय आत्मनः शुभमिच्छता ॥१४॥
[12]दशधेनुसमां राजन् महिषीं नारदोऽब्रवीत् ।
विंशत्समां तथा व्यासः सर्वदानोत्तमां कविः ॥१५॥
सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना ।
दत्त्वाश्विननवम्यान्तु समुपोष्य जगत्पते ।

---

1 A पुनरभिधानात्
2 A पठनकारक०
3 A दैयत्वं
4 A यावाजन्म महीतले for the b. p.
5 A तस्य
6 A देहस्य महिषी या प्रतिष्ठिता for the bracketed portion
7 and 8 I. O. प्रदक्षिणां
9 I. O. महिषा
10 I. O. omits the bracketed portion and A adds the following meaningless line after this, viz. तस्मौ सह सुखं लिभे इहलोके परत्र च
11 A सर्वार्थसम्पत:
12 A दशधेनुसमा

[1]दत्ताः सत्कृत्य विप्रेभ्यो महिष्यः सर्वकामदाः ॥१६॥
महिषीदानमाहात्म्यं यः शृणोति सदा नरः।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥१७॥

दुग्धाधिकान्तु महिषीं नवमेघवर्णां [2]संपुष्टपुत्रकवतीं [3]जघनाभिरामाम्।
दत्त्वा सुवर्णतिलकां द्विजपुङ्गवाय लोकद्वयं विजयतीह किमत्र चित्रम् ॥१८॥

अत्रोक्तसमयानामन्यतमे यजमानो मन्त्रब्राह्मणयोरध्येतारं[4] ब्राह्मणं सकुटुम्बं [5]दरिद्रं [6]पुराणस्य पाठकं वा ब्राह्मणं वस्त्र-[7]गन्धादिभिरभ्यर्च्य [8]तस्मै यथोक्तरूपामुक्तालङ्कारोपकरणयुतां महिषीमर्चिताम् इन्द्रादीत्युक्तमन्त्रद्वयं पठित्वा दद्यात्। ॐ [9]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमाग्नेयपुराणोक्त-नियतकालिक-महिषीदानफलप्राप्तिकामोऽहमेतां सुवर्णशृङ्गीं सुवर्णतिलकां घण्टाभरणभूषितां [10]रक्तवस्त्रावृतां ताम्रदोहनकान्वितां पिण्याकपिटकोपेतां सकाञ्चनां सप्तधान्ययुतां पुत्रकवतीं महिषीं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा [11]महिषीयं यमदैवतेत्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा महिषीं पुच्छे गृह्णीयात्। आश्विनशुक्लनवम्यान्तु [12]नवमीपूर्वतरदिने प्रातः कृतनित्यो घटिकाधिक-[13]प्रहरत्रये हविष्यं भुक्त्वाऽऽचम्य शुचौ देशे [14]उपविश्य पादौ प्रक्षाल्याचम्य[15] प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः ॐ सूर्यः सोमः यमः कालः पञ्च महाभूतानि [16]आग्नेयपुराणोक्तसोपवासमहिषीदानकर्म मया कर्तव्यमित्युक्त्वा उदङ्मुखो[17] गृहीतजलपूर्णताम्रपात्रः सङ्कल्पं कुर्यात्। [ॐ श्व][18]उपोष्यापरदिने [आग्नेयपुराणोक्त-महिषीदानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा अपरदिने कृतनित्य उपोष्यापरदिने][19] नवम्यां कृतनित्यो

---

1 A दत्वा
2 I. O. संपुष्टपुत्रकवतीं, A सं'पुष्ट-पुत्रकरतां
3 I. O. जघनाभिरामं, A जघनाभी-रामां
4 I. O. ०ध्येतारं०, A adds तारं after this
5 I. O. दारिद्रं
6 A पुराणपाठकं
7 I. O. ०गन्धादिभिरभ्यर्च्य
8 A omits तस्मै
9 A omits अद्य
10 A रक्तावस्त्रावृतां
11 I. O. महिषीं
12 A नमीपूर्वतरदिने
13 A ०प्रहरत्रये
14 I. O. उपवेश्य
15 A प्रक्षाल्य
16 I. O. आग्नेयपुराणोक्तं सोपवासं महिषीदानकर्म
17 A adds वा after this
18 A श्व for the bracketed portion
19 I. O. omits the b. p.

महिषीं पूर्ववद्दद्यात्। दानवाक्ये आग्नेयपुराणोक्ताश्विननवमीविहितमहिषदानफलप्राप्तिकामो-ऽहमिति विशेषः।

विष्णुधर्मोत्तरे (३।३०६।६०ख) :—

वारुणं लोकमाप्नोति दत्त्वा च महिषीं [1]ततः ॥१६॥

[2]एतदनलङ्कृतमहिषीदानमग्रेऽलङ्कृतमहिषीदानश्रुतेः। अर्चिताय ब्राह्मणायार्चितां महिषीम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। वारुणलोकप्राप्तिकामोऽहमेतां महिषीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०६।५६क) :—

अलङ्कृतान्तु तां दत्त्वा गोदानफलमाप्नुयात् ॥२०॥

तां महिषीमलङ्कृतां यथाशक्ति हेमतिलकादिभिः। अर्चिताय ब्राह्मणायार्चितामलङ्कृतां महिषीम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। गोदानफलप्राप्तिकामोऽहमेतामलङ्कृता[3]-महिषीं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३०६।६१क) :—

महिषस्य प्रदानेन [4]याम्ये लोके महीयते ॥२१॥

ब्राह्मणायार्चिताय [5]महिषमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्ष-याम्यलोकप्राप्तिकामोऽहमेतं महिषं[6] ददानि। स्वस्त्यादिस्वीकारान्तं[7] पूर्ववत्।

इति महाराजाधिराज निःशङ्क शङ्कर-श्रीमद्बल्लालसेनदेव-विरचिते
श्रीदानसागरे महिषदानावर्तः।

1 V. D. नरः
2 A एतदलङ्कृ[illegible]
3 A omits अलङ्कृता
4 A याम्यलोके
5 A महिषीमर्चितं
6 A महिषीं
7 A [illegible]कारान्त

अथारोग्यदानावर्तः । (५९)

नन्दिपुराणे :—

धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः ।
अतस्त्वारोग्यदानेन नरो भवति सर्वदः[1] ॥१॥
आरोग्यशालां कुर्वीत [2]महौषधिपरिच्छदाम् ।
[3]विदग्धवैद्यसंयुक्तां [4]भृत्यावसथसंयुताम् ॥२॥
वैद्यस्तु शास्त्रवित् प्राज्ञो दृष्टौषधपराक्रमः ।
औषधिमूलतत्त्वज्ञः[5] समुद्धरणकालवित् ॥३॥
[6][समुद्धरणकालवित्] औषधोत्पादन[7]-समयज्ञः ।
[8]रसवीर्यविपाकज्ञः [9]शालिमानौषधिगणे ।
योगिवद्देहिनां देहं यो [10]धिया प्रविशेद्बुधः ॥४॥
[11]धातुपथ्याशयज्ञश्च निदानविदतन्द्रितः[12] ।
व्याधीनां [13]पूर्वलिङ्गज्ञस्तदुत्तरविधानवित्[14] ॥५॥
देशकालविधानज्ञश्चिकित्सा-[15]शयवित्तथा ।
अष्टाङ्गायुर्वेदवेत्ता मुष्टियोगविधानवित् ॥६॥
एवंविधः [16]शुभो वैद्यो भवेद् यत्राभियोजितः ।
आरोग्यशालामेवन्तु कुर्याद् यो धर्मसंश्रयः[17] ।

1 I. O. सर्व्वतः
2 A महौषधपरिच्छदाम्
3 I. O. विदग्ध०
4 I. O. भृत्यावसथ०
5 I. O. औषधीमूलतत्त्वज्ञः, A औषधीमूलपथ्यज्ञः
6 A adds समुद्धरणं after the bracketed portion
7 A औषधोत्पादन०
8 A बल for रस
9 A शालिमामांसौषधीगणे
10 A वद्द प्रे विशेद् धः
11 A धातुपथ्यामयज्ञश्च
12 I. O. ०तन्वितः
13 I. O. सर्व्व for पूर्व
14 A ०विधानविधावित्
15 A ०मयवित्तथा
16 A शुभे
17 A धर्मसंश्रयः

[1]स पुमान् धार्मिको लोके स कृतार्थः स बुद्धिमान् ॥७॥
सम्यगारोग्यशालायामौषधैः स्नेहपावनैः[2] ।
व्याधितं निरुजीकृत्य अप्येकं[3] करुणायुतः ॥८॥
प्रयाति ब्रह्मसदनं कुलसप्तकसंयुतः ।
[4]आत्मवित्तानुसारेण दरिद्रः [5]फलभाग् भवेत् ॥९॥
दरिद्रस्य कुतः शाला आरोग्याय भिषक् तथा ।
अपि मूलेन केनापि मर्दनाद्यैरथापि वा ।
स्वस्थीकृत्य[6] लभेन्मर्त्यः पूर्वोक्तं लोकमक्षयम् ॥१०॥
[वातपित्तकफानाञ्च चयापचयभेदिनाम् ।][7]
यस्तु [8]स्वल्पाभ्युपायेन मोक्षयेद् व्याधिपीडितान् ।
सोऽपि याति शुभान् लोकानवाप्यान् यज्ञयाजिभिः ॥११॥

अत्र यजमानो यथाशक्ति इष्टकादिरचितां शालामौषधपावनादिशालाञ्च तदुपकरणताम्र-कटाह-कलसादिपात्र-परिच्छद- नानाविधव्याधि-शान्त्युचितौषधगण--यथोक्तलक्षणवैद्यनानाविध-[9]परिचारकयुतां विश्रामगृहसहितामारोग्यायोपकल्प्य[10] ब्राह्मणप्रमुखनानासत्त्वव्याधिशान्त्यर्थ-मुत्सृज्य दद्यात् । तद् यथा—नन्दिपुराणोक्तारोग्यशालादानफलप्राप्तिकामोऽहं[11] ब्राह्मण-प्रमुखानानासत्त्वेभ्यो व्याधिप्रतीकारार्थमेतां महौषधिपरिच्छदां नियुक्तवैद्यां भृत्यावसथसंयुक्ता-मारोग्यशालामुत्सृजे । ततस्तन्निर्वाहाय[12] धनं ताम्रपट्टादिलिखितां[13] वा भूमिं दद्यात् । आरोग्यशालाकरणासमर्थस्तु स्वल्पौषधदानमात्र[14]-मङ्गमर्दनादिभिश्च रोगिस्वस्थीकरणानुष्ठानमात्रं कुर्यात् ।

तथा च सम्बर्तः :—

औषधस्नेहमाहारं रोगिणां रोगशान्तये ।
[ददानो रोगरहितः][15] सुखी दीर्घायुरेव[16] च ॥१२॥

---

1 A स्वश्रेयान
2 A स्नेहपारगैः
3 A अप्येक
4 I. O. आढ्य०
5 A फलवान्
6 I. O. स्वस्तीकृते
7 A reads the bracketed portion as वातपित्तकफाभ्यां च या पचयतद्दिनाम्
8 A स्वप्राभ्युपायेन
9 I. O. ०परिवारयुतां
10 A ०आरोग्यशालामुपकल्प
11 I. O. adds एतं after this
12 A reads ततस्तन्निवाह and omits धनं
13 I. O. ०लिता
14 A मात्रदान for दानमात्र
15 A ददानो रोगरहितः for the b. p.
16 A दीर्घारेव

तथा च महाभारते :—

[1]अकल्पप्रतिचर्या च अङ्गसंवाहनादि[2] च ।
अत्रैकैकं नृपश्रेष्ठ गोशताद्व्यतिरिच्यते ॥१३॥

[3]अकल्पो रोगी ।

तथा स्कन्दपुराणे :—

व्याधितं यस्तु विप्रर्षे [दीनं मूढ][4]-मचेतनम् ।
उद्धरेच्च यथाशक्त्या स मुच्येद्ब्रह्महत्यया ॥१४॥

तथा च नन्दिपुराणे :—

अञ्जनं यो नरो दद्यादक्ष्णां व्याधिनिवृत्तये ।
विप्राय सुमना याति [सूर्यलोकं महाद्युतिम्][5] ॥१५॥
तत्रासौ युगसृष्ट्यन्ते[6] तुष्टो[7] जयति[8] भूतले ।
[9]अरोगनयनो दिव्यो [10]भवते सुभगो नरः ॥१६॥

तथा विष्णुधर्मोत्तरे (३।३०२।२६, ३।३११।१३क) :—

[11]व्याधितस्यौषधं दत्त्वा प्राणदानफलं लभेत् ।
[12][रोगार्तं परिचर्याथ प्राणदानफलं लभेत्] ॥१७॥
[13]तथौषधप्रदानेन रोगनाशमुपाश्नुते ॥१८॥

[14]तदेवं यथालाभं रोगिपरिचर्या तदङ्गमर्दनादिकम् । [15]चक्षूरोगिब्राह्मणेभ्यश्च यथालाभमञ्जनदानम् । रोगिभ्यश्च यथायथमौषधतैलघृतादिदानमाहारदानं[16] [17][प्रत्यासन्नमृत्युव्याधिविद्यातपःसम्पन्नब्राह्मणस्य च] यथाशक्ति प्रतीकारकरणञ्चानुष्ठानमात्रम् । तत्तत्फलार्थी यथेष्टकालं यथालाभं[18] कुर्यात् ।

1 I. O. अकल्प०
2 I. O. अङ्गसम्वाहनादि, A अङ्ग-सम्वहनानि
3 I. O. अकल्यो
4 I. O. दीनमूढ for the bracketed portion
5 I. O. सूर्यलोके महामतिः for the bracketed portion
6 I. O. युगसृष्ट्यन्ते, A युगषष्ट्यन्ते
7 A तृप्तो
8 I. O. जयति
9 A आरोगनयनो
10 A भवति
11 A व्याधितस्यौषधं
12 I. O. omits the bracketed portion
13 I. O. तथैवौषधदानेन
14 A तदेव च
15 A चक्षू only, I. O. चक्षुरोगि०
16 A वदानं for दानं
17 I. O. प्रत्यासन्नमृत्युव्याधितविद्यात[पः]सम्पन्नब्राह्मणस्य च and A प्रत्यास[न्न] व्याधिता--विद्यातपःसम्पन्न--ब्राह्मण[स्य] for the bracketed portion
18 A यथाचिखित

विष्णुधर्मोत्तरे (३।३१६।२१ख) :—

आतुरेभ्यो धनं दत्त्वा दानं बहुफलं भवेत् ॥१६॥

[1]रोगिप्रतीकारार्थं [2]धनमुत्सृज्य दद्यात्। [3]ॐ विष्णुधर्मोत्तरोक्तातुर[4]-प्रतीकारार्थं धनदानफलप्राप्तिकामोऽहमातुरेभ्यो दातुं[5] धनमेतदुत्सृजे[6]। ततो यथेच्छं[7]-कालं यथाशक्ति रोगिभ्यो धनं दद्यात्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे आरोग्यदानावर्त्तः।

---

1 A गोरिप्र० for रोगि०
2 A धनमुत्सृजेत् । दद्यात
3 A omits ॐ
4 A omits ०तुर
5 A omits दातुं
6 A ०सृजेत्
7 A यथेष्ट०

[1]अथाभयदानावर्त्तः । (६०)

विष्णुः :—

सर्वदानाधिकमभयप्रदानं[2] [तत्प्रदानेनाभीष्टं लोकमाप्नोति][3] ॥१॥

सम्बर्त्त

भूताभयप्रदानेन सर्वकामानवाप्नुयात् ।

दीर्घमायुश्च लभते सदा च सुसुखी[4] भवेत् ॥२॥

[5]मनुः (४।२३२) :—

[6]ऐश्वर्यमभयप्रदः ॥३॥

याज्ञवल्क्यः (१।२११) :—

गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।

यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं[7] सुखी भवेत् ॥४॥

यमः :—

दत्त्वा [8]प्रतिश्रयं लोके तथा दत्त्वैव चाभयम् ।

तथा दत्त्वा क्षितिं [9]विप्रे ब्रह्मलोके महीयते ॥५॥

महाभारते :—

[10]लोभाद्द्वेषाद्भयाद्वापि यस्त्यजेच्छरणागतम् ।

ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः ॥६॥

प्राणिनं वध्यमानं हि यः शक्तः समुपेक्षते[11] ।

स याति नरकं घोरमिदमाहुर्मनीषिणः ॥७॥

चतुःसागरपर्यन्तां यो दद्यात् पृथिवीमिमाम् ।

सत्त्वेभ्यो ह्यभयं दत्ते[12] तयोरभयदोऽधिकः[13] ॥८॥

---

1 A omits it
2 A reads दानं for प्रदानं and सर्व......दानं twice
3 A तत्प्रदानेनाभीष्टलोकप्राप्नोतीत्यर्थः
4 I. O. सुखिनो
5 A omits it
6 I. O. चतुर्थ for ऐश्व
7 A दत्त्वा चैवं
8 A परिश्रमं, I. O. प्रतिभयं
9 A लोके
10 A लोभान्मोहाद० I. O. लोभाद्द्वेषाद०
11 A समुपेक्ष्यते
12 A दत्त्वा
13 A परमधर्मोऽधिकः

रामायणे (V. 93. 11 and 13, N. W.) :—

विनष्टः[1] पश्यतो यस्य रक्षितुः शरणागतः ।
आदाय सुकृतं तस्मात् सर्वं गच्छत्यरक्षितः ॥९॥
सुपर्याप्तविसृष्टस्य[2] नाश्वमेधस्य तत्फलम् ।
यत्फलं [3]जातसन्त्रासे रक्षिते शरणागते ॥१०॥

नन्दिपुराणे :—

महतां सूक्ष्मदेहानां[4] तथा च व्याधितात्मनाम् ।
[हिंस्राणां सौम्यमूर्त्तीणां][5] सर्वथा ह्यभवत् फलम् ॥११॥
वरमेकस्य सत्त्वस्य जीविताभयदक्षिणा ।
न तु विप्रसहस्रस्य गोसहस्रं सदक्षिणम्[6] ॥१२॥

तथा :—

अभयं पुरुषो[7] दत्त्वा [8]रक्षामन्विष्य देहिनः ।
[9]प्रयाति शक्रसालोक्यं [10]निश्चयात्मा नरोत्तमः ॥१३॥
न दानं तादृशं लोके विद्यते ह्यपरं भुवि ।
यादृशं ह्यभयं दानं सर्वभूतेषु गीयते ॥१४॥
न तपोभिर्महाघोरै-[र्न यज्ञैर्बहुदक्षिणैः][11] ।
प्राप्यन्ते गतयो दिव्या यथाभयधृतव्रतैः ॥१५॥

तथा :—

आत्मानं [दुःखितं दृष्ट्वा][12] तृणमात्रे चलत्यपि ।
मृत्युतश्च भयं घोरमभयं दानमाश्रयेत् ॥१६॥
तस्मादभयमेवादौ दद्याद् भूतेषु[13] सर्वदा ।
परलोकगतावास्तामभयेन[14] शुभोदयः ।
इहैव प्राप्यते सर्वमभयेन विपश्चितैः ॥१७॥

---

1 I. O. विनंचुः
2 A सपर्याापरिहृष्टस्य
3 A यातसन्त्रासे
4 A महता सूत्त्मवेदानां
5 A विश्वासोत्र सुहृत्तीनां for the bracketed portion
6 A सदाक्षिणा
7 I. O. वपुषो
8 A रक्षां मानुष्यदेहिनः
9 I. O. स याति
10 A विश्वपात् स
11 A यंज्ञैर्बहुसुदक्षिणैः for the bracketed portion
12 A क्षि क्षितं मत्वा
13 I. O. द्वषेषु
14 I. O. ०नभयेन

तथा :—

यस्मादभ्युदयावाप्तिर्यस्माद्धर्मस्य[1] साधनम् ।
आश्रयेत् सर्वभूतानां दानं तदभयस्य तु ॥१८॥
सम्बाध्य तु पथि श्रान्तं[2] भीतं संरक्ष्य मानवम् ।
धर्मस्य पुरमायाति सर्वकामगुणोज्ज्वलम् ॥१९॥

नरसिंहपुराणे :—

निर्मलं [3]स्वर्गमाप्नोति तथा[4] भूतहिते रतः ॥२०॥

वराहपुराणे (२०६।१३-१४क) :—

भूतानुकम्पको[5] [6]ह्येष क्रियतामस्य चार्चनम् ।
वर्षाणामयुतं [7]चाद्धं [8]दिवि [9]तिष्ठेत [10]देववत् ।
[11][जायते च ततः] पश्चान्मानुषः सर्वपूजितः[12] ॥२१॥

तथा :—

अभयस्य प्रदानेन [13]सर्वकामानवाप्नुयात् ॥२२॥

विष्णुधर्मोत्तरे (३।३०२।६-१६, २१-२८) :—

अभयस्य प्रदानेन नरः स्यात् सर्वकामदः ।
अश्वमेधफलं तस्य यो रक्षेच्छरणागतम् ॥२३॥
शरणागतन्तु संत्यज्य नृशंसः पुरुषाधमः ।
बहून्यब्दसहस्राणि नरकं प्रतिपद्यते ॥२४॥
[14][नरकाच्च तथा मुक्त]-स्तिर्यग्योनिषु जायते ।
तत्रापि च तथाप्नोति [15]वधं बन्धाननेकशः ॥२५॥
[16]दैवान्मानुष्यमासाद्य चण्डालत्वमवाप्नुयात् ।
व्याधिबन्धवधैर्घोरैस्तत्रापि च स [17]युज्यते ॥२६॥

1 I. O. ०धर्म्मोऽस्य, A यस्मदर्थस्य
2 I. O. श्राद्धं
3 A खोक०
4 A सर्व्व
5 I. O. भूतानुकम्पको
6 A ह्येतत्
7 A चार्द्धं, Varāha P. चार्यं
8 Varāha P. तत्र
9 I. O. and Varāha P. तिष्ठत
10 Corrected from Varāha P. A वैरितः, I. O. वेदवित्
11 A यायते च ततः and Varāha P. जायते तु ततः for the bracketed portion
12 Varāha P. पश्चात् सर्व्वमानुषपूजितः
13 A सर्व्वान कामानवाप्नुयात्
14 A नरकाच्छत मुक्ता for the bracketed portion
15 A and V. D. वध
16 A दैवान्मानुष्यमासाद्य च
17 A युज्यते

परित्राणन्तु यः कुर्याद् भीतस्य शरणैषिणः ।
स एकः पुरुषो लोके सर्वधर्मभृतां वरः ॥२७॥
वधभीतस्य यः कुर्यात् परित्राणं नरोत्तमः ।
शक्रलोकः स्मृतस्तस्य यावदिन्द्राश्चतुर्दश ॥२८॥
तमःप्रवेशभीतस्य परित्राणेन मानवः ।
ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा ॥२९॥
वधादपि परं पापं [1]चक्षुषा तु वियोजनम् ।
पार्थिवेन न तत् कार्यं कदाचिदपि कस्यचित्[2] ॥३०॥
तमःप्रवेशनं कृत्वा परेषां पुरुषाधमः ।
[3][अन्धत्वं ध्रुवमाप्नोति कल्पशेषमिति श्रुतिः] ।
अपि कल्पसहस्राणि तमसा न वियुज्यते[4] ॥३१॥
अङ्गच्छेदनभीतस्य कृत्वा त्राणमनिन्दिताः[5] ।
रुद्रलोकमवाप्नोति कल्पशेषमिति श्रुतिः ।
[6][कल्पादिसर्गे भवति ज्ञानयुक्तो] नरस्ततः ॥३२॥
कृत्वा बन्धनभीतस्य परित्राणं नरोत्तमः ।
सर्वबन्धविनिर्मुक्तो भृगूणां लोकमश्नुते ॥३३॥
विवासनाच्च भीतस्य कृत्वा त्राणं तथा नरः ।
सर्वदुःखविनिर्मुक्तः साध्यानां लोकमाप्नुयात् ॥३४॥
ताडनाद् यस्तु भीतस्य[7] परित्राणं समाचरेत् ।
[8][सर्वदुःखविनिर्मुक्तः साध्यानां लोकमाप्नुयात्[9] ॥३५॥
धनापहारभीतस्य त्राणं कृत्वा नरोत्तमः ।
[10]दानपुण्यमवाप्नोति लोकं धानदमेव च ॥३६॥

1 Corrected from V. D. I. O. रक्षप्राप्तवियोजनं, A रक्षयात्तविजाजनं
2 A कस्य च
3 A गन्धर्वं ध्रुवमाप्नोति यत्र यत्राभिजायते for the bracketed portion
4 A विपद्यते
5 A °निन्दितः
6 A कल्पादिषत-कृतभातथा for the bracketed portion
7 A भीतस्तु
8 A omits the bracketed portion
9 I. O. reads the present line and the preceding one twice
10 The present line and the following one are not found in V. D.

अवमानाच्च भीतस्य त्राणं कृत्वा नरोत्तमः।
स्वर्गलोकमवाप्नोति पूजां देवगणात्तथा ॥३७॥
नरः कृतपरित्राणः पुण्यं किञ्चिद् यदाचरेत्।]
[1]भागी तस्य [2]परित्राता नरः पुण्यस्य कर्मणः ॥३८॥
पशूनाञ्च मृगाणाञ्च पक्षिणाञ्च तथा द्विजाः।
तृणद्रुमलतानाञ्च त्राणाद्भवति नाकभाक् ॥३९॥
बधकस्य गतं हस्ते [पशुं क्रीत्वा][3] नरोत्तमः।
नाकलोकमवाप्नोति सुखी सर्वत्र जायते ॥४०॥
यावन्ति [4]पशुरोमाणि तावद्वर्षाणि मानवः।
स्वर्गलोकमवाप्नोति यस्य त्राणं[5] करोत्यसौ ॥४१॥
अपि कीटपतङ्गस्य त्राणात् स्वर्गमुपाश्नुते[6]।
बहून्यब्दसहस्राणि नात्र कार्या विचारणा ॥४२॥
चौरग्रस्तं [7][नृपग्रस्तं रिपुग्रस्तं] विमोचयेत्।
[8]व्यालग्रस्तं तथा विप्राः सोऽश्वमेधफलं लभेत् ॥४३॥
विषमे तु तथा दुर्गे [9]सलिले वा हुताशने।
निमग्नं यः परित्रायेत् सोऽश्वमेधफलं लभेत् ॥४४॥

सुव्यक्त एवायं ग्रन्थः। [10]सर्वथाऽविहितप्राणिवधो न कर्तव्यः। परेभ्यो वध-बन्धन-ताडन-[11]विवासनाङ्गच्छेदन-[12]धनापहारावमानादिभीताः प्रथमं [13]वाचा [14]समाश्वस्य यथाशक्ति

1 I. O. भागी
2 A त्राता
3 I. O. मत्स्यं क्रीत्वा for the b. p.
4 A पशुरोमाणि
5 I. O. त्राणो
6 A स्वर्गमुपस्थितं
7 A नृपग्रस्तं विग्रस्तं for the bracketed portion
8 I. O. व्यालग्रस्तं
9 A सलि
10 A सर्वथाविहित:, I. O. सर्वथा-विहित॰
11 A विवासाङ्गच्छेदन
12 A धनापहारवादिभीता
13 A वा
14 I. O. समाश्वास्य

[1]तत्तदुक्तापद्भ्यो रक्षणीयाः। [2]पशुपक्ष्यादयश्च वधहस्तगताः क्रीत्वा मोचनीयाः। तस्मान्नेदं दानमनुष्ठानमात्रम्[3]। ततश्च सर्वदैवत्यमभयं महाभ्युदयहेतुरिति[4] बुद्धिस्थीकृत्याभयं दातव्यम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरेऽभयदानावर्त्तः।

1 I. O. तथा [illegible]
2 I. O. and A पशुपक्ष्यादयश्च
3 A [illegible]
4 A ०हेत्वाविति

[1][अथ वारदानावर्तः । (६१)

यमः :—]

आदित्यवारे विप्राय सहिरण्यं सदैव तु ।

यः [2]प्रयच्छत्यपूपन्तु तस्य तुष्यति वै [3]यमः ॥१॥

अत्र यजमानो ब्राह्मणायार्चिताय[4] सुवर्णसहितमपूपमर्चितं दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं यमोक्तापूपदानफलप्राप्तिकामोऽहमेतं [5]सहिरण्यमपूपं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वाऽपूपोऽयं प्रजापतिदैवत इत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वाऽपूपं स्पृशेत् । अत्र सदेति पदश्रवणाद् यथेच्छमावृत्त्या[6] दानम् ।

विष्णुधर्मोत्तरे व्याधिनाशकदानानुवृत्तौ :—

[7]शरीररोगनाशाय सततं [8]सूर्यवासरे ।

गुडाज्यलवणोपेतं सहिरण्यं द्विजातये ॥२॥

दद्यादपूपं [9][धर्मेण प्रीणयेच्च] दिवाकरम् ।

आरोग्यमेतेनाप्नोति कामं वा [10]मनसेप्सितम् ॥३॥

ब्राह्मणायार्चिताय गुडघृतलवणसुवर्णसहितमपूपमर्चितम् ॐ अद्यादि तुभ्यमन्त[11]-मुक्त्वा दद्यात् । अमुककामोऽहमेतं गुडाज्यलवणहिरण्य[12]-सहितमपूपं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । अत्र सततमिति श्रवणाद् यथेच्छमावृत्त्या दानम् ।

तथा (३।३१७।१६) :—

लवणाज्यगुडोपेतमपूपं सूर्यवासरे ।

सहिरण्यं नरो दत्त्वा न रोगैस्त्वभिभूयते[13] ॥४॥

1 A omits the bracketed portion, I. O. तथा for अथ
2 I. O. प्रयच्छेत्यपूपन्तु
3 I. O. यम:
4 A अर्चिताय ब्राह्मणाय
5 A हिरण्यं
6 A ०वृत्त, I. O. ०ह्रता
7 I. O. शारीरारोगस्तु नाशाय
8 A सूर्य्यवत्सरे
9 A धर्मश्च प्रथमेव for the bracketed portion
10 I. O. मनसे प्सितं
11 I. O. मन्त twice
12 I. O. omits हिरण्य
13 A रोगैरभिभूयते

सूर्यवारे ब्राह्मणायार्चिताय [1]लवणाज्यगुडसुवर्णयुक्तमपूपमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। रोगानभिभवप्राप्तिकामोऽहमेतं लवणाज्यगुडहिरण्यसहितमपूपं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

[2]तथा (३।३१७।१७क) :—

एवंविधं चेन्दुदिने दत्त्वा सौभाग्यमाप्नुयात् ॥५॥

एवंविधं पूर्वोक्तमपूपम्। अत्र दानवाक्ये सौभाग्यप्राप्तिकामोऽहमिति विशेषः। अपरं समानम्।

तथा :—

सर्वतो दिवसे चान्द्रे स्नानमभ्यङ्गपूर्वकम्।
यः प्रयच्छति विप्राय सोऽपि रोगैर्विमुच्यते ॥६॥

विद्यातपःशालिने ब्राह्मणायार्चि-[तायाभ्यङ्गार्थं तैलं स्नानार्थं माषचूर्णादिकं चार्चितम्][3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। रोगविमुक्तिकामोऽहमेतदभ्यङ्गसहितं स्नानं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते[4] स्नानमिदं विष्णुदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। अत्र सर्वत[5] इति पदश्रवणाद् यथेच्छमावृत्त्या[6] दानम्।

तथा (३।३१७।१७ख) :—

[7]काष्ठदानाद् भौमदिने शत्रुनाशमवाप्नुयात् ॥७॥

अत्र शत्रुनाशप्राप्तिकामोऽहमेतानि काष्ठानीति दानवाक्ये काष्ठानीमानि विष्णुदैवतानीति प्रतिग्रहीतृवचने च[8] विशेषः। सर्वमपरं तुल्यम्।

तथा (३।३१७।१८क) :—

बौधे क्रीडनकानाञ्च दानं बाले प्रशस्यते ॥८॥

क्रीडनकानां बालक्रीडोचितकन्दुकादीनाम्। अत्र बहुभ्यो दानम्। दानवाक्ये ॐ अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं बुधवारविहित-क्रीडनकदानफलप्राप्तिकामोऽहमेतानि क्रीडनकानि प्रतिग्रहीतृवचने क्रीडनकान्येतानि विष्णुदैवतानि दक्षिणावाक्ये च सम्प्रदानबहुत्वं विशेषः। अपरं तुल्यम्[9]।

1 I.O. लवणाद्यष्टत and A लवणगुडघृतं for लवणाज्यगुड
2 A omits तथा
3 A तमभ्यङ्गतैलस्नानं मासपूर्णादिकं मर्चितं for the bracketed portion
4 A स्वस्तीत्युक्त्वा सावित्रीपाठानन्तरं
5 I. O. सर्व्वत्र
6 I. O. and A °वृत्त
7 A काष्ठदानात, I. O. काष्ठदाना
8 A omits च
9 A प्रयच्छति[illegible]

तथा (३।३१७।१८ख) :—

जीवाहि वस्त्रदानेन परां पुष्टिमुपाश्नुते[1] ॥९॥

अत्र दानवाक्ये परमपुष्टिप्राप्तिकामोऽहमेतद्वस्त्रं प्रतिग्रहीतृवाक्ये वस्त्रमिदं बृहस्पतिदैव[illegible] मिति वस्त्रस्य दशाग्रहणपूर्वकं परिधानं स्वीकरणमिति विशेषः। [2]अपरं प्रथमदा[illegible] तुल्यम्।

तथा (३।३१७।१९क) :—

सर्वत्र रतिमाप्नोति [3]शुक्रे दत्त्वा रतिं स्त्रियः[4] ॥१०॥

रतिं स्त्रिय[5] इति स्त्रीरत्युचितसुगन्धिताम्बूलवस्त्रादि। अत्र दानवाक्ये सर्वतोर[illegible] प्राप्तिकामोऽहमेतानि रत्युचितद्रव्याणि [प्रतिग्रहीतृवाक्ये च रत्युचितद्रव्याणि][6] एता[illegible] विष्णुदैवतानि इति विशेषः। अपरं प्रथमदानवत्।

तथा (३।३१७।१९ख) :—

अभ्यङ्गं[7] सौरिदिवसे दत्त्वा जीवितमाप्नुयात् ॥११॥

अभ्यङ्गमभ्यङ्गार्थं [तैलं घृतादि][8]। अत्र दानवाक्ये दीर्घायुःप्राप्तिकामोऽहं[illegible] मभ्यङ्गं[9] प्रतिग्रहीतृवाक्ये अभ्यङ्गोऽयं विष्णुदैवत इति[10] विशेषः।

तथा :—

शनैश्चरदिने दत्त्वा तैलं विप्रेषु शक्तितः।

नित्यमेव महाभाग रोगनाशमवाप्नुयात् ॥१२॥

यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्यस्तैलमर्चितम् ॐ अद्यादि [11]युष्मभ्यमन्तमुक्त्वा दद्या[illegible] रोगनाशप्राप्तिकामोऽहमेतत्तैलं ददानि। प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तैलमिदं वि[illegible] दैवतमिति वदेयुः। कामस्तुत्यादि पूर्ववत्। अत्र नित्यमिति पद[12]-श्रवणाद् यथेच्छमावृत्त[illegible] दानम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे [14]वारदानावर्तः।

1 I. O. पुष्टिमुपश्नुते, A पुष्टिमुपाश्नुते
2 I. O. अपरं
3 A शुक्रे
4 A स्त्रियाः
5 A स्त्रिया
6 A omits the bracketed protion
7 I. O. अभ्य
8 A घृतत्वादि for the b. p
9 A •मेतदभ्यङ्गं
10 I. O. विष्णुदैवतमिति
11 A तुभ्य•
12 A and I. O. omit पद
13 A •त्त
14 A omits वार

अथ नानादैवत-मासोप-[लक्षित-नियतदिनदानावर्तः][1] । (६२)

वामनपुराणे (६४।२३ख-२४क) :—

माघे मासि तिलाः शस्तास्तिलधेनुश्च दानव ।

[इध्मेन्धनादयश्चान्ये माधवप्रीणनाय तु][2] ॥१॥

[3]इध्मं होमोपयोगि दारु । इन्धनमग्निज्वलनोचितम् । आदिशब्देन शीतहरतैलतूल-पटीकम्बलाः[4] परिगृहीताः । अत्र [5]माघमासिकयथेष्टदिने यजमानोऽर्चिताय ब्राह्मणायार्चितान्[6] तिलान् दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुक[7]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं माधवप्रीतये एतांस्तिलान् ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा तिला एते प्रजापतिदैवता इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य कृतैतद्दान-प्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा तिलमुष्टिं[8] गृह्णीयात् । तिलधेनुर्धेनुदानावर्तस्थ[9]-मत्स्यपुराणोक्त-तिलधेनुदानविधिना[10] देया । अत्र कामनायां माधवप्रीतय इति विशेषः । इध्मादिदाने तु वाक्ये तिलपदस्थाने इध्मादीना-मन्यतमपदस्य [निवेशो विशेषः][11] । एतानि विष्णुदैवतानीन्धनानि एष बृहस्पतिदैवतः कम्बलः एषा[12] बृहस्पतिदैवता तूलपटी एतद्विष्णुदैवतं तैलमिति स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीता ब्रूयात् । कामस्तुत्यादि पूर्ववत् । धेनोः पुच्छग्रहणमिध्मेन्धनयोः स्पर्शः कम्बलतूलपट्योर्दशाग्रहणपूर्वकं परिधानं [13]तैलस्य स्पर्शनञ्च स्वीकारः । एतानि चैकैकदिने प्रत्येकमेकैकस्मै[14] देयानि । एकस्मिन्नेव वा दिने प्रतिद्रव्यं वाक्यं कृत्वा बहुभ्यो दद्यात् । एकैकस्मै वा समुदितानि । तत्र च दानवाक्ये एतांस्तिलान् एतां तिलधेनुं-तूलपटीमेतत्तैलमिति निवेशो विशेषः[15] ।

1 A रक्षितनियतद्दानावर्तः for the bracketed portion
2 Vāmana P. reads the b. p. as इन्धनानि च देयानि माधवः प्रीयतामिति
3 A इध्म होमोपयोगी
4 A क for कम्बलाः
5 A omits माघ
6 A ब्राह्मणाय
7 A omits वेदामुक
8 A तिलानमुष्टीं
9 A तिलधेनुदानावर्त्तेषु for तिल...वर्तस्थ
10 I. O. विटपा for विधिना
11 A निवेषः for the bracketed portion
12 A एष
13 I. O. तैलस्पर्शनञ्च
14 A एकस्मै
15 A adds विशो before विशेषः

प्रतिग्रहीतृवाक्यं पूर्ववत्। एवं वक्ष्यमाणमासोप-[1]लक्षितेषु मुद्गादिदानेष्वपि बोद्धव्यम्। [2]अशक्त उक्तानामेकमपि दद्यात्।

तथा (६५।२४ख-२५क) :—

फाल्गुने व्रीहयो मुद्गा[3] वस्त्रं कृष्णाजिनादिकम्।
गोविन्दप्रीणनार्थाय[4] दातव्यं पुरुषर्षभ[5] ॥२॥

आदिशब्देन कृष्णेतरमृगचर्मग्रहणम्। फाल्गुनमासिकाभीष्ट[6]-दिने अर्चिताय ब्राह्मणायार्चितानि षष्टिकादिधान्यानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। गोविन्दप्रीतये एतान् व्रीहीन् ददानि। [स्वस्तिसावित्रीपाठान्ते व्रीहय एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्][7]। कामस्तुत्यादि पूर्ववत्।

[8]व्रीहीणां [मुष्टिग्रहणञ्च स्वीकारः। मुद्गादिदानवाक्ये व्रीहिपदस्थाने मुद्गादीनामन्यतमपदस्य निवेशो विशेषः। एते प्रजापतिदैवता मुद्गा एतद् बृहस्पतिदैवतं वस्त्रमेतत् प्रजापतिदैवतं कृष्णाजिनमेतद्विष्णुदैवतं मृगाजिनमिति [9]स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्][10]।

मुद्गानां मुष्टिग्रहणं वस्त्रस्य दशाग्रहणपूर्वकं परिधानं शेषयोः पुच्छग्रहणं स्वीकरणम्।

तथा (६५।२५ख-२६क) :—

चैत्रे [11]चित्राणि वस्त्राणि शयनान्यासनानि च।
विष्णोः प्रीत्यर्थमेतानि देयानि ब्राह्मणेष्वथ[12] ॥३॥

ब्राह्मणेष्विति बहुवचनं देयबहुत्वापेक्षम्। चैत्राभीष्टदिने अर्चिताय ब्राह्मणायार्चितानि [13]विचित्रवस्त्राणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुप्रीतये एतानि विचित्रवस्त्राणि ददानि। [14]स्वस्तिसावित्रीपाठान्ते वस्त्राण्येतानि बृहस्पतिदैवतानि इति

1 A ॰लक्षितो मुद्गादि॰, I. O. ॰लक्षितेष्वेकादशसु
2 A असक्तानामेकमपि देयं
3 A मुद्ग, I. O. मद्गा, Vāmana P. वस्त्रं तथा for मुद्गा वस्त्रं
4 A ॰प्रीणनयैव, Vāmana P. ॰प्रीणनार्थं च
5 Vāmana P. पुरुषर्षभे:
6 A omits ट
7 I. O. स्वस्तिसावित्रीपाठान्त प्रतिग्रहीतृवाक्यं for the bracketed portion
8 Supplied by conjecture
9 A omits स्वस्ति
10 I. O. omits the bracketed portion
11 Vāmana P. विचित्र
12 Vāmana P. ब्राह्मणेषु च
13 I. O. चित्र॰
14 A स्वस्त्यादि for स्वस्ति

प्रतिग्रहीतृवाक्यम्[1]। कामस्तुत्यादि पूर्ववत्। [दशाग्रहणपूर्वकं परिधानञ्च स्वीकारः। शयनादिदानवाक्ये [2]विचित्रवस्त्रपदस्थाने [3]शयनासनयोरन्यतरपदस्य निवेशो विशेषः। एतानि प्रजापतिदैवतानि शयनानि स्वस्तिसावित्रीपाठानन्तरं प्रतिग्रहीतृवाक्यम्[4]। कामस्तुत्यादि पूर्ववत्।][5] शयनासनयोः[6] स्पर्शः स्वीकारः।

तथा (६५।२६ख-२७क) :—

> [गन्धानि माल्यानि [7]तथा][8] वैशाखे सुरभीनि च।
> देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥४॥

द्विजमुख्येभ्यो [9]विद्यातपःसम्पन्नेभ्यः। [10]वैशाखाभीष्टदिने ब्राह्मणेभ्योऽर्चितेभ्यश्चन्दना-गुरुकुङ्कुम-[11][कर्पूरकस्तूरिका]-काकलीयकानामन्यतममर्चितं दद्यात्। ॐ अद्यामुकामुकस-गोत्रेभ्योऽमुकामुकवेदामुकामुक[12]-शाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो[13] युष्मभ्यं मधुसूदन-तुष्टये एतान् गन्धान् ददानि। स्वस्तिसावित्रीपाठान्ते गन्धा एते गन्धर्वदैवता इति प्रति-ग्रहीतृवाक्यम्[14]। कामस्तुत्यादि पूर्ववत्। स्पर्शश्च स्वीकारः। माल्यदाने गन्धपदस्थाने एतानि माल्यानीति निवेशो विशेषः। स्वस्तिसावित्रीपाठान्ते एतानि माल्यानि विष्णुदैवता-नीति प्रतिग्रहीतृवाक्यम्[15]। कामस्तुत्यादि पूर्ववत्। स्पर्शश्च स्वीकारः।

तथा (६५।२७ख-ग)

> [[16]उदकुम्भश्च [17]धेनुश्च][18]तालवृन्तं सचन्दनम्।
> त्रिविक्रमस्य प्रीत्यर्थं दातव्यं साधुभिः सदा ॥५॥

सदेति [संवत्सरापेक्षं प्रति][19]-संवत्सरं जैष्ठे देयमित्यर्थः। अत्र वैशाखानन्तरोक्तत्वात्ति-

1 I. O. ०वाच्यं
2 I. O. चित्र०
3 I. O. शयनासनयो०
4 I. O. ०वाच्यं
5 A omits the bracketed portion
6 A शयनासनयो
7 A omits तथा
8 Vāmana P. गन्धमालीनि वस्तूनि for the b. p.
9 A विद्याने for विद्या
10 I. O. वैशाखाभीष्टदिने
11 A कर्पूर and I. O. कस्तूरिका for the bracketed portion
12 A वेदामुक for वेदामुकामुक
13 A ०मुकदेवशर्मभ्यो, I. O. ०मुका-मुकशर्मभ्यो
14 I. O ०वाच्यं, A प्रतिगृहीवाक्यं
15 I. O. ०वाच्यं
16 A उदककुम्भाश्च
17 A and I. O. धेनुश्च
18 Vāmana P. उदकुम्भाद्यधेनुं च for the b. p.
19 I. O. omits the bracketed portion

त्रिक्रमनामकल्याणानुकम्पैप्रग्रहणम्। अर्चिताय ब्राह्मणायार्चितानुदकुम्भान्[1] ॐ अद्यादि तुभ्यमहमुक्त्वा दद्यात्। [2]त्रिविक्रमप्रीत्यर्थमेतानुदकुम्भान्[3] ददानि। स्वस्तिसावित्रीपाठान्ते [उदकुम्भा एते वरुणदैवता इति][4] प्रतिग्रहीतृवाक्यम्[5]। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः। इतरदानवाक्ये [6]उदकुम्भपदस्थाने धेनु-सचन्दनतालवृन्तपदयोरन्यतरस्य निवेशो विशेषः। एषा रुद्रदैवता धेनुः एतद्विष्णुदैवतं सचन्दनं तालवृन्तमिति प्रतिगृहीतृवाक्यम्[7]। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणं स्पर्शनञ्च यथाक्रमं स्वीकारः।

तथा (६५।३८) :—

उपानद्युगलं छत्रं [8][नवकम्बलकानि च]।
आषाढे वामनप्रीत्यै दातव्यानि [9][तु भक्तितः] ॥६॥

नवकम्बलकानि तु[10] नूतनकम्बलाः। [11]आषाढाभीष्टदिने ब्राह्मणायार्चिताय उपानद्युगलमर्चितम् ॐ अद्यादि तुभ्यमहमुक्त्वा दद्यात्। वामन-[प्रीत्यै एतदुपानद्युगलं ददानि। स्वस्तिसावित्रीपाठान्ते उपानद्युगलमिदमुत्तानाङ्गिरोदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। आरोहणञ्च स्वीकारः। छत्रादिदानवाक्ये उपानद्युगलपदस्थाने छत्रनवकम्बलपदयोरन्यतरस्य निवेशो विशेषः। एतत् प्रजापति][12]-दैवतं छत्रमेते बृहस्पतिदैवता [13]नवकम्बला इति प्रतिग्रहीतृवाक्यम्[14]। कामस्तुत्यादिकञ्च पूर्ववत्। दण्डग्रहणं [15]दशाग्रहणपूर्वकाङ्गस्पर्शनञ्च यथाक्रमं[16] स्वीकारः।

तथा :—

घृतञ्च क्षीरकुम्भाश्च घृतधेनुः फलानि च।
श्रावणे श्रीधरप्रीत्यै दातव्यानि विपश्चितेः[17] ॥७॥

1 A ०दककुम्भान्
2 A त्रिविक्रमस्य for त्रिविक्रम
3 A ०दककुम्भान्
4 A वरुणदैवत इति for the bracketed portion
5 I. O. ०वाक्यं
6 A उदककुम्भ०
7 I. O. ०वाक्यं
8 Vāmana P. नवकामककादिकम् for the b. p.
9 Vāmana P. विपश्चिता for the b. p.
10 I. O. omits तु
11 A आषाढेभीष्टदिने
12 A omits the bracketed portion
13 A कम्बला
14 I. O. ०वाक्यं
15 A दशाग्रहणं पूर्वमङ्गस्पर्शनञ्च
16 I. O. omits it
17 I. O. विपश्चितैः

[1]श्रावणाभीष्टदिने अर्चिताय ब्राह्मणायार्चितं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। श्रीधरप्रीत्यै एतद्घृतं ददानि। स्वस्तिसावित्रीपाठान्ते घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्[2]। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः। [3]अपरदानवाक्ये घृतपदस्थाने क्षीरकुम्भादिपदाना[4]-मन्यतमस्य [5]निवेशो विशेषः। एते विष्णुदैवताः क्षीरकुम्भाः एषा विष्णुदैवता घृतधेनुः एतानि[6] वनस्पतिदैवतानि फलानि इति प्रतिग्रहीतृवाक्यम्[7]। कामस्तुत्यादि पूर्ववत्। [स्पर्शनं पुच्छग्रहणं स्पर्शनञ्च यथाक्रमं][8] स्वीकारः। घृतधेनुदानं मत्स्यपुराणोक्तविधिना।

तथा (६५।३६) :—

मासि भाद्रपदे दद्यात् पायसं मधुसर्पिषा[9]।
हृषीकेशप्रीणनार्थं लवणं [10]सगुडौदनम् ॥८॥

[11]भाद्रपदाभिमतदिने ब्राह्मणायार्चिताय घृतमधुयुक्तं पायसमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। हृषीकेशप्रीणनार्थमेतत्सर्पिर्मधुसहितं पायसं ददानि। स्वस्तिसावित्रीपाठान्ते [12]पायसमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्[13]। कामस्तुत्यादि पूर्ववत्। [स्पर्शनञ्च स्वीकारः।][14] [15]सगुडौदनलवणदानवाक्ये [16]एतत् गुडौदनसहितलवण-[मिति व्यूहनीयम्][17]। स्वस्तिसावित्रीपाठानन्तरं लवणमिदं सोमदैवतमिति प्रतिग्रहीतृवाक्यम्[18]। [19][पूर्ववत् कामस्तुत्यादिकम्]। [20]स्पर्शनञ्च स्वीकारः।

1 A श्रावणेभीष्टदिने
2 I. O. ०वाक्यं
3 A क्षीर for अपर
4 I. O. दानानाम् for पदानाम्
5 A निवेशन
6 A एता
7 I. O. ०वाक्यं
8 I. O. स्पर्शनपुच्छग्रहणं for the bracketed portion
9 Vāmana P. ०सर्पिषी
10 A सगुडोदनम्
11 I. O. भाद्रपदाभिमतदिने, A भाद्रपदान्यतमदिने
12 I. O. पायसं प्रजा...मिति, A पायसोऽयं प्रजापतिदैवत इति
13 I. O. ०वाक्यं
14 A omits the bracketed portion
15 A सगुडोदन०
16 I. O. एतत् सगुडोदन०, A सगुडोदनसहितं
17 A मित्यूहनीयं for the b. p.
18 I. O. ०वाक्यं
19 A कामस्तुत्यादि पूर्ववत् for the bracketed portion
20 A पूर्ववत् before स्पर्शनञ्च

तथा (६५।४०) :—

[1]तिलांस्तुरङ्गं वृषभं दधिताम्रायसादिकम् ।
प्रीत्यर्थं पद्मनाभस्य [देयमाश्वयुजे नरैः][2] ॥६॥

आदिशब्देन पित्तलकांस्ययोर्ग्रहणम् । आश्विनाभिमतदिने ब्राह्मणायार्चिताय तिलानर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । पद्मनाभप्रीत्यर्थमेतांस्तिलान् ददानि । स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्[3] । कामस्तुतिर्दक्षिणा च पूर्ववत् । [4]मुष्टिग्रहणञ्च स्वीकारः । अपरदानवाक्ये तिलपदस्थाने तेषामन्यतमपदस्य [5][निवेशो विशेषः] । एष यमदैवतस्तुरङ्गः एष विष्णुदैवतो वृषभः एतद्विष्णुदैवतं [दधि एतदग्निदैवतं][6] ताम्रं अयः पित्तलं[7] कांस्यं वेति स्वस्तिसावित्रीपाठान्ते[8] यथायथं [9]प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । अश्वस्य [10]कर्णग्रहणं [11]वृषभस्य [12]पुच्छग्रहणं स्पर्शन[13]ञ्चेतरद्रव्याणां स्वीकारः ।

तथा (६५।४१) :—

रजतं कनकं [14]दीपं मणिमुक्ताफलादिकम् ।
दामोदरस्य प्रत्यर्थं दद्याद्वै[15] कार्त्तिके नरः ॥१०॥

आदिशब्देन प्रवालराजपट्टयोर्ग्रहणम् । कार्त्तिकाभिमतदिने ब्राह्मणायार्चिताय रजतमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । दामोदरप्रीत्यर्थमेतद्रजतं[16] ददानि । स्वस्तिसावित्रीपाठान्ते [17]रजतमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।

1 Vāmana P. मौञ्जं तुरङ्गं
2 Corrected from Vāmana P. I. O. देयान्यश्वमनोभवैः and A देयाश्विनदिने नरैः for the bracketed portion
3 I. O. ०वाक्यं
4 A मुष्टिग्रहणं
5 A निवेशः for the bracketed portion
6 A omits the bracketed portion
7 A पित्तलं
8 I. O. स्वस्तिसावित्रीपाठान्तं, A स्वस्तिसावित्रीपाठे तु
9 I. O. ०वाक्यं
10 A कर्णं ग्रहणं
11 I. O. वृषस्य
12 A पुच्छं ग्रहणं
13 A ०ञ्चेति०
14 A दीप, I. O. दीपा, Vāmana P. दीपान्
15 A दद्यात् . Vāmana P. प्रदद्यात्
16 A ०रजतं
17 I. O. रजतमिति अग्नि०

स्पर्शनञ्च स्वीकारः। अपरदानवाक्ये रजतपदस्थाने तेषामन्यतमपदस्य निवेशो विशेषः। [एतदग्निदैवतं कनकमेते विष्णुदैवता[1] दीपा एतद्विष्णुदैवतं [2]मुक्ताफलमेष विष्णुदैवतो राजपट्ट एतद्विष्णुदैवतं प्रवालमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। सर्वेषां स्पर्शनं स्वीकारः।

तथा (६५।४२) :—

खरोष्ट्राश्वतरान्नागान्शकटाद्यमजाविकम्[3]।
दातव्यं केशवप्रीत्यै मासि मार्गशिरे[4] नरैः ॥११॥

खरो गर्दभः अश्वतरो×इति प्रसिद्धः। मार्गशीर्षेऽभिमतदिने ब्राह्मणायार्चिताय खरमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। केशवप्रीत्यै एतं खरं ददानि। स्वस्तिसावित्रीपाठान्ते खर एष यमदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। कर्णग्रहणं स्वीकारः। अपरदानवाक्ये खरपदस्थाने तेषामन्यतमपदस्य निवेशो विशेषः।][5] एष निर्ऋतिदैवत उष्ट्रः एष विष्णुदैवतोऽश्वतरः एष प्रजापतिदैवतो गज एष उत्तानाङ्गिरोदैवतः शकटः एषप्रजापतिदैवतो रथः[6] एषोऽग्निदैवतोऽजः एष वरुणदैवतोऽ[7]विरिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। उष्ट्रारोहणम् अश्वतरपुच्छग्रहणं गजारोहणं[8] शकटारोहणं रथस्येशाग्रहणम् अजस्य कर्णग्रहणमवेः[9] पुच्छग्रहणं स्वीकारः।

तथा (६५।४३) :—

प्रासादनगरादीनि गृहप्रावरणादिकम्।
[10]नारायणस्य तुष्ट्यर्थं पौषे देयानि [11]शक्तितः ॥१२॥

प्रथमेनादिशब्देन [12]ग्रामखर्वटयोर्ग्रहणम्। द्वितीयेन शय्यायाः प्रावरणमुत्तरीयवस्त्रम्। पौषाभीष्टदिने[13] ब्राह्मणायार्चिताय प्रासादमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नारायणतुष्ट्यर्थमेतं[14] प्रासादं ददानि। स्वस्तिसावित्रीपाठान्ते प्रासादोऽयं विष्णुदैवत

1 A विष्णुदैवतं
2 A ऋक्ताफल
3 The entire line corrected from Vāmana P. I. O. and A have lacunæ here
4 Corrected from Vāmana P. I. O. and A ०शीर्षे
5 I. O. omits the bracketed portion
6 A ब्रह्मः
7 I. O. अरिरिति
8 A omits it
9 I. O. ०ग्रहणं हरे
10 Vāmana P. वामनस्य च
11 Vāmana P. भक्तितः
12 I. O. ग्रामकर्कटयोर्ग्रहणं, A ग्रामकवटग्रहणं
13 A पौषाभीष्टदिने
14 A दुष्ट्यर्थं again after this

इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । प्रवेशश्च स्वीकारः । अपरदानवाक्ये प्रासादपद[1]-स्थाने [2]तेषामन्यतमपदस्य निवेशो विशेषः । [एतद्विष्णुदैवतं नगरम्][3] एष विष्णुदैवतो ग्रामः एष विष्णुदेवतः खर्वटः[4] एतद्विष्णुदैवतं गृहम् [5]एतद्बृहस्पतिदैवतं प्रावरणम् [6]एषा प्रजापतिदैवता शय्येति स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । नगरग्रामखर्वटानां[7] [8]प्रदक्षिणकरणं गृहस्य प्रवेशो वस्त्रस्य दशाग्रहणपूर्वकं परिधानं [शय्यायाः स्पर्शनं स्वीकरणम्][9] ।

महाभारते (अनु—६६।८) :—

माघे मासि तिलान् यस्तु ब्राह्मणेभ्यः प्रयच्छति ।
सर्वसत्त्व[10]-समाकीर्णं नरकं स न पश्यति[11] ॥१३॥

[12]माघे मास्यभिमतदिने ब्राह्मणेभ्योऽर्चितांस्तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-माघमासिकतिलदानफलप्राप्तिकामोऽहमेतांस्तिलान् ददानि । स्वस्त्यादि-स्वीकारान्तं पूर्वोक्ततिलदानवत् ।

तथा (अनु—६६।६२) :—

कौमुदे शुक्लपक्षे तु योऽन्नदानं करोति हि ।
स सन्तरति दुर्गाणि [13]प्रेत्य चानन्त्यमश्नुते ॥१४॥

कौमुदे कार्तिके कार्तिकाभिमतशुक्लतिथौ अन्नमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-कौमुदविहितान्नदानफलप्राप्तिकामोऽहमेतदन्नं ददानि । स्वस्तिसावित्रीपाठान्ते अन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [14]स्पर्शश्च स्वीकारः ।

पद्मपुराणे :—

रसधेनुं तथा दत्त्वा कार्तिके मासि पार्थिव ।
सर्वान् कामानवाप्नोति नित्यं सुगतिभाग् भवेत् ॥१५॥

1 I. O. omits पद
2 A प्रासादमन्यतरपदस्य
3 A omits the bracketed portion
4 I. O. खर्वट:, A खकट:
5 A एतद्विष्णुदैवतं
6 A एष प्रजापतिदैवत॰
7 I. O. ॰खर्वटानां, A ॰खवटानां
8 I. O. प्रदक्षिण॰
9 A शय्यास्पर्शनं स्वीकारः for the bracketed portion
10 I. O. and A ॰सत्व
11 A गच्छति
12 A माघ
13 A बालकबालेन्त्य॰
14 A स्पर्शनञ्च

[1]पार्थिवेति सम्बोधनम् । तथा दत्त्वेति पद्मपुराणोक्तरसधेनुपरिग्रहः । [2]कार्तिकमासिकाभिमतदिने धेनुदानविधिना[3] रसधेनुं दद्यात् मत्स्यपुराणपद्मपुराणयोर्विधानसाम्यात् । दानवाक्ये तु कामनायाममुककामोऽहमिति विशेषः ।

विष्णुधर्मोत्तरे (३।३१७।६ख) :—

तिलप्रदानान्माघे तु याम्यं लोकं न गच्छति ।

[4]माघमासिकाभीष्टदिने [5]ब्राह्मणायार्चिताय तिलानर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । यमलोकानुपसर्पणप्राप्तिकामोऽहमेतान् तिलान् ददानि । स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । मुष्टिग्रहणञ्च स्वीकारः ।

तथा (३।३१७।१०क) :—

प्रियङ्गुं [6]फाल्गुने दत्त्वा प्रियो भवति भूतले ॥१६॥

[प्रियङ्गुः काउनीति][7] । [8]फाल्गुनमासिकाभिमतदिने अर्चिताय ब्राह्मणायार्चितां प्रियङ्गुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तफाल्गुनविहितप्रियङ्गुदानफलप्राप्तिकामोऽहमेतां प्रियङ्गुं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१७।१०ख) :—

चैत्रे चित्राणि वस्त्राणि [सौभाग्यं महदश्नुते][9] ।

दत्त्वेति सम्बन्धः । चैत्रमासिकाभिमतदिने अर्चिताय ब्राह्मणायार्चितानि [10]विचित्रवस्त्राणि ॐ [अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्][11] । महासौभाग्य-[12]प्राप्तिकामोऽहमेतानि [13]विचित्रवस्त्राणि ददानि । स्वस्तिसावित्रीपाठान्ते वस्त्राणीमानि बृहस्पतिदैवतानि इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । दशाग्रहणपूर्वकपरिधानं[14] स्वीकारः ।

तथा (३।३१७।११क) :—

अपूपानां प्रदानेन वैशाखे स्वर्गमश्नुते ॥१७॥

1 A प्राथिवेति
2 I. O. कार्त्तिके०
3 I. O. धेनुदानविषया
4 A माघे०
5 A ब्राह्मणायार्चिताम तिलान्
6 I. O. भाल्गुणे
7 A कामानां for the bracketed portion
8 A फाल्गुने मासिकाभिमतं दिने
9 A सौभाग्यमहमश्नुते for the bracketed portion
10 I. O. चित्र०
11 A स्वस्त्यादिस्वीकारान्तं पूर्ववत् for bracketed portion
12 A ०फलप्राप्तिकामो
13 I. O. omits विचित्र
14 I. O. ०पूर्वकं परिधानं

अपूपा पूया[1] इति प्रसिद्धाः । [2]वैशाखमासिकाभीष्टदिने [3]ब्राह्मणायार्च्चितायापूपानर्च्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । स्वर्गप्राप्तिकामोऽहमेतानपूपान् ददानि । स्वस्तिसावित्रीपाठान्ते अपूपा एते प्रजापतिदेवता इति[4] प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । स्पर्शनञ्च स्वीकारः ।

तथा (३।३१७।११ख) :—

छत्रदानात्तथा ज्यैष्ठे सर्वकामानुपाश्नुते[5] ।

[6]ज्यैष्ठमासिकाभीष्टदिने [ब्राह्मणायार्च्चिताय छत्रमर्च्चितम्][7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [8]अमुकप्राप्तिकामोऽहमेतच्छत्रं ददानि । स्वस्तिसावित्रीपाठान्ते छत्रमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । दण्डग्रहणञ्च स्वीकारः ।

तथा (३।३१७।१२ग) :—

दत्त्वा चोपानहौ [9]स्वर्गमाषाढे ध्रुवमश्नुते ॥१८॥

आषाढमासिकाभिमतदिने ब्राह्मणायार्च्चितायार्च्चिते उपानहौ[10] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [विष्णुधर्मोत्तरोक्ताषाढविहितोपान-][11]द्दानफलप्राप्तिकामोऽहमेते उपानहौ ददानि । स्वस्तिसावित्रीपाठान्ते उपानहावेत उत्तानाङ्गिरोदैवत इति[12] प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । आरोहणं[13] स्वीकारः ।

तथा (३।३१७।१२क) :—

श्रावणे वस्त्रदानस्य कीर्तितं सुमहत् फलम् ।

[14]श्रावणमासिकाभिमतदिने [15]ब्राह्मणायार्च्चितायार्च्चितं वस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तश्रावणविहितवस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि । स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । दशाग्रहणपूर्वकञ्च [16]परिधानं स्वीकारः ।

1 A पूपा
2 A वैशाखे मासि अभीष्टदिने, I. O. वैशाखे मासिकाभीष्टदिने
3 A ब्राह्मणायार्चितायापूपान्
4 A दैवतानि for देवता इति
5 A सर्वकाममुपाश्नुते, I. O. सर्वकामानपाश्नुते
6 I. O. and A ज्येष्ठे for ज्यैष्ठ
7 A ब्राह्मणायार्चितं for the bracketed portion
8 A adds ॐ here
9 A स्वर्गं आषाढे ध्रुवमश्नुते
10 I. O. adds ददानि after उपानहौ
11 I. O. विष्णुधर्मोक्ताषाढविहितौ for the bracketed portion
12 I. O. दैवते for दैवत इति
13 A आरोहणञ्च
14 A and I. O. श्रावणे for श्रावण
15 A ब्राह्मणायार्चितायार्चितं
16 I. O. omits it

तथा (३।३१७।१२ख) :—

प्रौष्ठपदे [तथा मासि][1] प्रदानात् फाणितस्य तु[2] ॥१६॥

कीर्तितं सुमहत्फलमित्येतेन सम्बन्धः। फाणितं [खण्डशालुकमिति प्रसिद्धम्][3]। [4]भाद्रमासिकाभिमतदिने ब्राह्मणायार्चितायार्चितं फाणितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तप्रौष्ठपदविहितफाणितदानफलप्राप्तिकामोऽहमेतत् फाणितं ददानि। स्वस्तिसावित्रीपाठान्ते फाणितमिदं [5]सोमदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा (३।३१७।१३क) :—

आश्विने घृतदानेन रूपवानभिजायते ॥२०॥

[6]आश्विनमासिकाभिमतदिने [7]ब्राह्मणायार्चितायार्चितं घृतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [8]उत्कृष्टरूपप्राप्तिकामोऽहमेतद्घृतं ददानि। स्वस्तिसावित्रीपाठान्ते घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा (३।३०६।६४ख-६५क) :—

तक्रमाश्वयुजे मासि यस्तु दद्याद्द्विजातिषु।
आरोग्यं महदाप्नोति यत्र यत्राभिजायते ॥२१॥

[9]तक्रं चतुर्थभागजलप्रक्षेपमथितं दधि। आश्विनमासिकाभिमतदिने ब्राह्मणेभ्योऽर्चितेभ्यस्तक्रमर्चितम् ॐ[10]अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्ताश्विनविहिततक्रदानफलप्राप्तिकामोऽहमेतत्तक्रं ददानि। स्वस्तिसावित्रीपाठान्ते[11] तक्रमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। तक्रस्पर्शनञ्च स्वीकारः।

तथा (३।३१७।१३ख) :—

कार्तिके दीपदानेन सर्वलौज्ज्वल्यमाप्नुयात्।

1 I. O. मासे for the bracketed portion
2 A and V. D. च
3 A खण्डशालुकीति प्रसिद्धं and I. O. खण्डशालुकं for the bracketed portion
4 A भाद्रपद for भाद्र
5 A विष्णु for सोम
6 I. O. आश्विने मासिका...दिने, A आश्विनमासिकाभीष्टदिने
7 A ब्राह्मणार्चितं
8 A ॐ तत: अद्य for उत्कृष्ट
9 A तक्रञ्च विभाग॰
10 A omits ॐ
11 A adds च here

कार्तिकमासाभिमतदिने अर्चिताय ब्राह्मणायार्चितं दीपं यथाशक्ति पित्तलताम्रलोहकाष्ठ-[1]मृत्तिकायष्टीनामन्यतमयष्टिस्थं[2] ज्वालयित्वा [3]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [4]सर्वसौज्ज्वल्यप्राप्तिकामोऽहमेतं दीपं ददानि। प्रतिग्रहीता [5]स्वस्तिसावित्रीपाठान्ते दीपोऽयं विष्णुदैवत इति वदेत्। कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः। अत्रानुक्तमपि पित्तलयष्ट्यादिकं फलबाहुल्याद् यथाशक्ति ग्रहीतव्यम्।

तथा (३।३१७।१४क):—

लवणं मार्गशीर्षे तु दत्त्वा सौभाग्यमश्नुते[6]।

मार्गशीर्षाभिमतदिने अर्चिताय ब्राह्मणायार्चितं लवणम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सौभाग्यप्राप्तिकामोऽहमेतल्लवणं[7] ददानि। [8]स्वस्तिसावित्रीपाठान्ते लवणमिदं सोमदैवतमिति प्रतिग्रहीतृवाक्यम्। [9]कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा (३।३१७।१४ख):—

पौषे कनकदानेन परां पुष्टिं तथैव च ॥२२॥

[10]अश्नुत इत्यनुवर्तते। पौषमासिकाभिमतदिने ब्राह्मणायार्चितायाभिमतपरिमाण-मर्चितं कनकम् ॐ अद्यादि [तुभ्यमन्तमुक्त्वा दद्यात्। अतिशयितपुष्टिकामोऽहमेतत् कनकं ददानि। स्वस्तिसावित्रीपाठान्ते [11]कनकमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि][12]पूर्ववत्। स्पर्शनञ्च स्वीकारः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
दानसागरे [13]मासोपलक्षितनियतदिनदानावर्तः।

---

1 I. O. मृत्तिकायस for मृत्तिका
2 A ॰यष्टिना
3 A omits ॐ
4 A सर्व्वसौज्ज्वल्यप्राप्तिकामो
5 A स्वस्त्योमित्युक्त्वा for स्वस्ति
6 A सौभाग्यमाप्नुयात्
7 I. O. ॰मेतं लवणं
8 A स्वस्त्याद्यादि for स्वस्ति
9 A कामस्तुत्यादिकं
10 A आप्नुत
11 A कनकमग्निदैवतमिति
12 A repeats the bracketed portion
13 I. O. मासोपलक्षिताभिमतदिनदानावर्त्तः; A मासोपलक्षितनियत-दानावर्त्तः

[1][अथ नानादैवतानियतमासिक[2]-तिथिदानावर्तः]। (६३)

विष्णुधर्मोत्तरे (३।३१७।२७ख—३१क) :—

प्रतिपद्यथ पुष्पाणां द्वितीयायां घृतस्य च।

तृतीयायान्तु वस्त्राणां चतुर्थ्यां कनकस्य तु।

पञ्चम्यान्तु फलानां वै षष्ठ्यां स्नानस्य मानदाः[3] ॥१॥

स्नानस्य स्नानीयतैलामलकादेः[4]।

[5]सप्तम्याञ्च ह्यपूपानामष्टम्याञ्च गुडस्य च।

कुन्माषस्य नवम्यान्तु दशम्यां रजतस्य च ॥२॥

कुन्माषो राजमाषः[6]।

एकादश्यां सुवर्णस्य द्वादश्यां वसनस्य च।

त्रयोदश्यां सुगन्धानां सितायास्तदनन्तरम् ॥३॥

सुगन्धाश्चन्दनादयः[7] [8]सिता शर्करा।

दानञ्च परमान्नस्य पञ्चदश्यां महाफलम् ॥४॥

परमान्नं पायसम्[9]। दानं[10] महाफलमिति सर्वत्रानुषङ्गो बोद्धव्यः। अत्र विशेषाश्रवणादिच्छया[11] शुक्ले कृष्णे वा[12] पक्षे दानम्। तदत्र यजमानः प्रतिपदि[13] पुष्पाण्यर्चितान्यर्चिताय[14] ब्राह्मणाय दद्यात्। ॐ अद्यामुकसगोत्रायामुकवेदामुक[15]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णुधर्मोत्तरोक्त-[प्रतिपद्विहित-पुष्प][16]-दानफलप्राप्तिकामोऽहमेतानि

1 A omits the bracketed portion
2 I. O. ०मासक०
3 A मानदः
4 A स्नौनीयतैलानामलकादेः
5 A सप्तम्याश्चापूपानां, I. O. सप्तम्याश्च ह्यपूपानाम्
6 A पश्चिमदेशे राजमासप्रसिद्धो व्रीहिविशेषः
7 A देशाः for दयः
8 A श्रित
9 A पायसः, I. O. पायस
10 A omits it
11 A विशेषभावादिच्छया
12 A च
13 I. O. प्रदिपदि
14 A पुष्पाण्यर्चिताय
15 A omits वेदामुक
16 A प्रतिपद्विविहितपुष्प and I. O. प्रतिपद्विहित for the bracketed portion

पुष्पाणि ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पुष्पाण्येतानि वनस्पति-दैवतानीत्युक्त्वा यथाशास्त्रं कामस्तुतिं पठेत्। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा पुष्पाणि स्पृशेत्। तथा द्वितीयायां घृतदानवाक्ये विष्णुधर्मोत्तरोक्तद्वितीयाविहित-घृतदानफलप्राप्तिकामोऽहमेतद्घृत-मिति निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। तृतीयाया वस्त्रदानवाक्ये विष्णुधर्मोत्तरोक्ततृतीया-विहित-वस्त्रदानफलप्राप्तिकामोऽहमेतानि वस्त्राणीति निवेशनीयम्। स्वस्तिसावित्रीपाठा-नन्तरं वस्त्राणीमानि बृहस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः। चतुर्थ्यां कनकदानवाक्ये विष्णुधर्मोत्तरोक्त-चतुर्थी-विहित-कनकदानफलप्राप्तिकामोऽहमेतत् [1]कनकमिति निवेशनीयम्। [स्वस्तिसावित्रीपाठा-नन्तरं कनकमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम्][2]। [कामस्तुत्यादि पूर्ववत्।][3] पञ्चम्यां फलदानवाक्ये[4] विष्णुधर्मोत्तरोक्त-पञ्चमीविहित-फलदान[5]-फलप्राप्तिकामोऽहमेतानि फलानीति[6] निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं[7] फलानीमानि[8] वनस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। षष्ठ्यां स्नानीयद्रव्यदानवाक्ये विष्णुधर्मोत्त-रोक्त-षष्ठीविहित-[9]स्नानीयद्रव्यदानफलप्राप्तिकामोऽहमेतत् [10]स्नानीयद्रव्यमिति [11]निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं [12]स्नानीयमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। सप्तम्यामपूपदानवाक्ये विष्णुधर्मोत्तरोक्त-सप्तमीविहितापूपदानफलप्राप्तिकामोऽहमेतान-पूपानिति[13] निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरमपूपा एते प्रजापतिदैवता इति प्रति ग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। अष्टम्यां गुडदानवाक्ये विष्णुधर्मोत्तरोक्ताष्टमी-विहित[14]-गुडदानफलप्राप्तिकामोऽहमेतं[15] गुडमिति निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं गुडोऽयं सोमदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। नवम्यां राजमाषदानवाक्ये

---

1 A काञ्चनं इति

2 A काञ्चनमिदं अग्निदैवतमिति स्वस्तिसावित्रीपाठान्ते प्रतिग्रहीता वदेत् for the bracketed portion

3 A omits the bracketed portion

4 I. O. कनकादिफलदानादिवाक्ये

5 A omits फलदान

6 A एतत् फलमिति for एतानि फलानीति

7 A ०पाठानन्त

8 A फलानीमा

9 I. O. स्नान for स्नानीयद्रव्य

10 I. O. स्नान for स्नानीयद्रव्य

11 I. O. निवेश्य

12 I. O. स्नान for स्नानीय

13 I. O. एतान्यपूपानीति

14 A विष्णुधर्मोत्तरोक्त अष्टमीविहित

15 A ०मेतां

विष्णुधर्मोत्तरोक्तनवमीविहित कुन्माषदानफलप्राप्तिकामोऽहमेतं कुन्माषमिति निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं कुन्माषोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [1]मुष्टिग्रहणञ्च स्वीकारः। दशम्यां रजतदानवाक्ये विष्णुधर्मोत्तरोक्त-दशमीविहित-रजतदानफल[2]-प्राप्तिकामोऽहमेतद्रजतमिति निवेशनीयम्[3]। स्वस्तिसावित्री-पाठानन्तरं[4] [5]रजतमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। एकादश्यां सुवर्णदानवाक्ये विष्णुधर्मोत्तरोक्तैकादशीविहितसुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णमिति निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं सुवर्णमिदमग्निदैवतमिति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। द्वादश्यां वस्त्रदानवाक्ये विष्णुधर्मोत्तरोक्तद्वादशी-विहित-वसनदानफलप्राप्तिकामोहऽमेतद्वसनमिति निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरं वसनमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहण-[6]पूर्वकं परिधानं स्वीकारः। त्रयोदश्यां चन्दनादीनामन्यतमसुगन्धद्रव्यस्य दानवाक्ये विष्णुधर्मोत्तरोक्तत्रयोदशीविहितसुगन्धदानफलप्राप्तिकामोऽहमेतान् सुगन्धानिति निवेश-नीयम्। स्वस्तिसावित्रीपाठानन्तरं सुगन्धा इमे गन्धर्वदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। चतुर्दश्यां शर्करादानवाक्ये विष्णुधर्मोत्तरोक्तचतुर्दशीविहित[7] सितादानफलप्राप्तिकामोऽहमेतां[8] सितामिति निवेशनीयम्। स्वस्तिसावित्रीपठानन्तरं सितेयं सोमदैवतेति प्रतिग्रहीतृवाक्यम्। [9]कामस्तुत्यादि पूर्ववत्। पञ्चदश्यां पायसदानवाक्ये विष्णुधर्मोत्तरोक्तपञ्चदशीविहितपरमान्नदानफल[10]-प्राप्तिकामोऽहमेतत् [11]परमान्नमिति निवेशनी-यम्। स्वस्तिसावित्रीपाठानन्तरं परमान्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

कूर्मपुराणे (२।२६।२६-३०) :—

> कृष्णाष्टम्यां विशेषेण धार्मिकाय द्विजातये।
> स्नात्वाभ्यर्च्य यथान्यायं [12]पादप्रक्षालनादिभिः ॥५॥

1 A स्वस्तीग्रहणञ्च
2 A omits फल
3 I. O. निवेश्यं
4 A ०पाठानन्तं
5 A रजतमिदं चन्द्रदैवतामिति
6 A ०पूर्वकपरिधानं
7 I. O. ०विहि०
8 A ०मेतं
9 A कामस्तुत्या
10 A omits फल
11 I. O. परमान्नं
12 I. O. पादप्रक्षालनादिभिः

प्रीयतां मे महादेवो दद्यादद्रव्यं स्वकीयकम् ।
सर्वपापविनिर्मुक्तः प्राप्नोति परमां गतिम् ॥६॥

स्वकीयमिति [1]सद्वृत्त्यार्जितं न रणादिना [2]परस्यापकृतमित्यर्थः । कृष्णाष्टम्यां शङ्करमुद्दिश्य पादप्रक्षालन-सुखोपवेशन-गन्धपुष्पधूपवस्त्रादिभिः [3]शिववत्तपःशालिनं ब्राह्मणमभ्यर्च्य तस्मै न्यायार्जितं द्रव्यम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इत्युक्त्वा दद्यात् । सर्वपापविनिर्मुक्ति-[4]पूर्वक-[5]परमगतिप्राप्तिकामोऽहमेतदमुकं ददानि । [6]प्रीयतां मे महादेवः । ततः स्वस्तिसावित्रीपाठानन्तरम् [7]अमुकमिदम् अमुकदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [8]प्रतिग्रहविध्युक्तश्च स्वीकारः ।

तथा :—

यस्तु कृष्णचतुर्दश्यां स्नात्वा देवं पिनाकिनम् ।
[9]आराधयेद्द्विजमुखं न तस्यास्ति पुनर्भवः ॥७॥

आराधयेद्द्विजमुखमिति[10] ब्राह्मणं शिवरूपं ध्यायन् [11]पाद्यार्घ्य-सुखोपवेशन-गन्धमाल्यधूपदीप[12]-वस्त्रादिभिः शिववत् पूजयित्वा तस्मै [13]स्वेष्टद्रव्यं [14]दद्यादित्यर्थः अष्टमीदाने[15] तथा श्रवणात् । स्नातः शिवमुद्दिश्य पाद्यादिभिरर्चिताय ब्राह्मणायार्चितमभिमतद्रव्यम्[16] ॐ अद्यादि तुभ्यमहं सम्प्रददे इत्युक्त्वा दद्यात् । अपुनर्भवप्राप्तिकामोऽहमेतदमुकं ददानि । पिनाकी प्रीयताम् । स्वस्तिसावित्रीपाठानन्तरम् [17]अमुकमिदममुकदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [18]प्रतिग्रहविध्युक्तश्च स्वीकारः ।

तथा :—

अमावास्यामनुप्राप्तां[19] ब्राह्मणाय तपस्विने ।
यत्किञ्चिद्देवदेवेशं दद्यादुद्दिश्य शङ्करम् ॥८॥

1 A स्ववृत्त्यार्जितं
2 I. O. परस्याकृतमिति
3 I. O. शिववते यः शालिनं
4 A सर्वपापविमुक्ति०
5 A परमा०
6 A प्रीयतामिहादेवः
7 I. O. परमाप्नमिदं
8 I. O. प्रतिग्रहविधुक्तम्. A प्रतिग्रहश्च
9 I. O. omits the entire line
10 I. O. ०मुखेति
11 I. O. पाद्यार्घ०
12 A ०दीपा०
13 A दृष्टद्रव्यं
14 I. O. पद्यादित्यर्थः
15 A adds तु here
16 A ब्राह्मणायार्चितमेतद्रव्यं
17 A omits अमुकमिद
18 A प्रतिग्रहविध्युक्तः
19 A ०प्राप्तं

ज्ञात्वेति शेषः।

प्रीयतामीश्वरः सोमो महादेवः सनातनः।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥९॥

शङ्करमुद्दिश्य तपःशालिने अर्चिताय ब्राह्मणायाभिमतं यत्किञ्चिद्द्रव्यमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सप्तजन्मकृतपापक्षयकामोऽहमेनदमुकं ददानि। [1][प्रीयता-मीश्वरः सोमो महादेवः सनातनः। स्वस्तिसावित्रीपाठानन्तरममुकमिदममुकदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।] प्रतिग्रहविध्युक्तश्च स्वीकारः।

स्कन्दपुराणे :—

तिलपात्राणि यो दद्याद्विप्रेभ्यः शुद्धमानसः।
अमावास्यां समासाद्य कृष्णानां सुसमाहितः ॥१०॥

कृष्णानामिति तिलविशेषणम्।

स्वपितॄंस्तर्पयित्वा तु अक्षयं नरपुङ्गवः।
पितृलोकं समाप्नोति चिरञ्च सुखमेधते ॥११॥

[2]अथेष्टामावास्यायामर्चितेभ्यो [3]ब्राह्मणेभ्यस्त्रीणि कृष्णतिलपूर्णान्यर्चितानि पात्राणि दद्यात्। ॐ [4]अद्यामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुकशाखाध्यायिभ्योऽमुकामुकदेवशर्मभ्यो युष्मभ्यं स्कन्दपुराणोक्ततिलपात्रदानफलप्राप्तिकामोऽहमेतानि तिलपात्राणि ददानि। स्वस्ति-सावित्रीपाठानन्तरं तिलपात्राणीमानि [5]विष्णुदैवतानीति [6]प्रतिग्रहीतृवाक्यम्। कामस्तु-त्यादि पूर्ववत्।

महाभारते :—

द्वादश्यां पौर्णमास्याञ्च[7] मासि मासि [8]घृताक्षतम्।
ब्राह्मणेभ्यः प्रयच्छेद्यस्तस्य [9]धर्मं निबोधत ॥१२॥
सोमश्च वर्धते तेन समुद्रश्च महोदधिः।
अश्वमेधचतुर्भागं फलं सृजति वासवः ॥१३॥

1 A omits the bracketed portion
2 A बथेष्टामारास्यायमर्चितेभ्यो
3 I. O. ब्राह्मणेभ्यः स्त्री
4 A omits अद्युकसगोत्रेभ्यो
5 A विष्णुदैवतानि
6 I. O. प्रतिग्रहीतृणां वाक्यं
7 A पौर्णमास्याम्वा
8 A घृताक्तं
9 A धर्मांश्च बोधत, I. O. धर्मं निबोधित

ब्राह्मणेभ्य इति बहुवचनं मासि मासीति श्रवणात् [1]प्रयोगबहुत्वापेक्षम्। पौर्णमास्युप-[2]संहारात् द्वादश्यपि[3] शुक्ला ग्राह्या। यथेच्छकालं प्रतिमासिकशुक्लद्वादशीपञ्चदश्योरर्चिताय ब्राह्मणायार्चितान् यवान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [महाभारतोक्तघृताक्षतदानफलप्राप्तिकामोऽहमेतं घृताक्षतं ददानि। स्वस्तिसावित्रीपाठानन्तरं घृताक्षतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।][4] [5]मुष्टिग्रहणाश्च स्वीकारः।

इति महाराजाधिराजनिःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते दानसागरेऽनियत-[6]मासिकतिथिदानावर्तः।

1 A बहुत्वापेक्षं
2 I. O. ०सम्पादनात्
3 A द्वादश
4 A omits the bracketed portion
5 I. O. मुष्टिग्रहणाच्च
6 A and I. O. ०मासक०

अथ नानादैवत-मासनियत-तिथिदानावर्तः। (६४)

आग्नेयपुराणे :—

यो ददाति द्विजेभ्यस्तु[1] तृतीयायामुपानहौ।
वैशाखशुक्लपक्षे तु सच्छत्रकरकान्विते ॥१॥

द्विजेभ्य इति बहुवचनं प्रयोगबहुत्वापेक्षम्।

न तस्य मनसो [दाहो मर्त्ये][2]-लोके हि जायते।
सर्वव्याधिविनिर्मुक्तः श्रियं पुत्रांश्च विन्दति ॥२॥
कालादिह [3]यदा याति [4]यमलोकाद्द्विजोत्तमः।
यानञ्चाश्वतरीयुक्तं सर्वहेमविभूषितम्[5] ॥३॥
दिव्याङ्गनाभिराकीर्णं [6]सर्वरत्नमयं शुभम्।
उपतिष्ठति विप्रेन्द्र सर्वकामफलप्रदम् ॥४॥

अत्र यजमानो वैशाखशुक्लतृतीयायां ब्राह्मणायार्चिताय छत्रकमण्डलुसहितमुपानद्युग[7]-मर्चितम् [8]दद्यात्। [9]ॐ अद्यामुकसगोत्रायामुकवेदामुक[10]-शाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमाग्नेयपुराणोक्त-च्छत्र-[11]करकान्वितोपानद्युगदानफल[12]-प्राप्तिकामोऽहमेतच्छत्रकरकान्वित-मुपानद्युगं[13] ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा उपानद्युग[14]-मिदमुक्त्वा-नाङ्गिरोदैवतमित्युक्त्वा यथाशाखं कामस्तुतिं पठेत्। तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा [सावित्रीं पठित्वा][15] उपानद्युगं[16] परिदध्यात्।

1 A द्विजेभ्यश्च
2 I. O. देहो मृत्यु for the bracketed portion
3 A समायाति
4 A यमलोका
5 A सर्वहेममयं शुभं
6 A सर्वरत्नविभूषितं
7 A °उपानद्युगल°
8 I. O. omits it
9 A omits ॐ
10 A omits वेदामुक
11 I. O. °करकान्वितो°
12 A omits फल
13 A °करकान्वित उपानद्युगलं
14 A उपानद्युगल°
15 A omits the bracketed portion
16 A उपानद्युगलं

विष्णुः :—

वैशाखे मासि तृतीयायामुपोषितोऽक्षतैर्वासुदेव-[1][मभ्यर्च्य तानेव हुत्वा दत्वा च] पापेभ्यः पूतो भवति । [2]यच्च तस्मिन्नहनि प्रयच्छति [3]तदक्षय्यमवाप्नोति ॥५॥

वैशाखशुक्लप्रतिपदि[4] कृतनित्यो घटिकाधिकप्रहरत्रयोपरि हविष्यं भुक्त्वाऽऽचम्य शुचौ देश उपविश्य पादौ प्रक्षाल्याऽऽचम्य प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः ॐ सूर्य्यः सोमो यमः कालः पञ्च महाभूतानि [5]विष्णूक्त-वैशाखशुक्लतृतीयाविहित-सोपवासवासुदेवार्चन-होमयवदानकर्म मया कर्त्तव्यमित्युक्त्वा गृहीतोदकपूर्णताम्रपात्र[6] उदङ्मुखः सङ्कल्पयेत् । ॐ [7]श्व उपोष्यापरदिने[8] विष्णूक्त-शुक्लतृतीयाविहित-वासुदेवार्चन-होमयवदान-कर्माहं करिष्ये । ततो नियमेन सुप्त्वा [9]द्वितीयायामुपोष्य तृतीयायां[10] प्रातः स्नात्वा यवैर्भगवन्तं वासुदेवं पूजयित्वा यवानेव वासुदेवाय स्वाहेत्यग्नौ[11] हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा ब्राह्मणायार्चितायार्चितान् यवान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णूक्ताक्षतदानफलप्राप्तिकामोऽहमेतानक्षतान् ददानि । स्वस्तिसावित्रीपाठान्तेऽक्षता एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [12]मुष्टिग्रहणञ्च स्वीकारः । वस्त्वन्तरदाने [13]तु[14]तत्तद्वस्तुनाम तत्तद्दैवतोत्कीर्त्तनं [15]स्वीकारश्चोन्नेयः । अक्षयतृतीया चैषा ।

विष्णुधर्मोत्तरे (३।३१७।३१ख-३२क) :—

[16]वैशाखे शुक्लपक्षे तु तृतीयायां द्विजोत्तमाः[17] ।
[18]यद्ददाति [19]नरश्रेष्ठास्तत्तदक्षयमुच्यते ॥६॥

अतएवाक्षयतृतीयेयं प्रसिद्धा ।

विशेषेण तथा [20]दानमक्षतानां महाफलम् ॥७॥ (३।३१७।३२ख)

[21]ब्राह्मणायार्चितायार्चितानक्षतान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त-

1 A भयवन् बहुत्वाच for the b. p.
2 A यच्च तस्मिन्नहनि, I. O. तृतीयास्मिन्नहनि
3 A तदक्षयमवाप्नोति, I. O. तदक्षय्यमाप्नोति
4 I. O. ॰प्रतिपदि, A वैशाखशुक्लतृतीयापूर्वतरदिने
5 A विष्णुधर्मोत्तरोक्त॰
6 A and I. O. ॰पात्रं
7 A श्वः, I. O. श्व
8 A उपोष्य परेऽहनि
9 A तृतीयायाम्॰
10 A adds तिथौ here
11 A आहुत्यग्नौ
12 A मुष्टिग्रहणं
13 I. O. omits तु
14 I. O. तद्द्वस्तुनाम, A तद्वस्तुनाम
15 A स्वीकारस्तोन्नेयः, I. O. स्वीकारस्तून्नेयः
16 A वैशाख
17 A द्विजोत्तम
18 I. O. यद्दानि
19 I. O. नरश्रेष्ठस्तत्तदक्षयमश्नुते, A नरश्रेष्ठास्तदक्षयमुच्यते
20 A दान॰
21 A ब्राह्मणायार्चितायाक्षतान्

शुक्लतृतीयाविहिताज्ञतदानफलप्राप्तिकामोऽहमेतानज्ञतान् ददानि। स्वस्त्यादिस्वीकारान्तं [1]पूर्ववत्। वस्त्वन्तरदाने तु [2]तत्तद्द्रव्यनाम तत्तद्देवतोत्कीर्त्तनं [3]स्वीकारश्चोन्नेयः।

तथा (३।३१७।३४) :—

मासि भाद्रपदे शुक्लनवम्यां द्विजपुङ्गवाः।

[4]गोधूमभक्तान् सगुडान् दत्त्वा पुण्यमवाप्नुयात् ॥८॥

अर्चिताय ब्राह्मणायार्चितं[5] सगुडं गोधूमभक्तम्[6] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। पुण्यप्राप्तिकामोऽहमेतत्[7] सगुडं गोधूमभक्तं ददानि। प्रतिग्रहीता स्वस्तिमाविलोपाठान्ते गोधूमभक्तमिदं प्रजापतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। [8]स्पर्शनं स्वीकारः।

[9]यमः :—

कार्त्तिकस्य तमिस्रे तु [10]माघस्य नवमीतिथौ।

अहोरात्रोपितः स्नात्वा धर्मराजाय भोजयेत्।

विधिवद् ब्राह्मणान् शक्त्या [11]स्वर्गलोके महीयते ॥९॥

शक्त्येत्यभिधानाद् यथेष्टं [ब्राह्मणानां बहुत्वमत्र][12] विवक्षितम्। कार्त्तिककृष्णनवम्यां माघकृष्णनवम्यां वा दानम्। [13]तत्र दानदिनपूर्वतरदिने [14]पूर्ववद्धविष्यभोजनादि कृत्वा सूर्य्यादिदेवताभ्य उपवासपूर्वकयमोक्त-कार्त्तिककृष्णनवमीविहित-ब्राह्मणभोजनकर्म मया कर्तव्यमिति निवेद्य ॐ श्व उपोष्योपरदिने धर्मराजोद्देशेन ब्राह्मणान् भोजयिष्यामीति सङ्कल्पयाष्टम्यामुपोष्य नवम्यां धर्मराजोद्देशेन यथाशक्त्युपस्थापितब्राह्मणेभ्योऽर्चितेभ्यो[15]ऽर्चितानि भोजनानि दद्यात्। ॐ [16]अद्यामुकसगोत्रेभ्योऽमुकवेदामुकशाखाध्यायिभ्योऽ[17]मुकदेवशर्मभ्योऽर्चितेभ्यो[18] युष्मभ्यं सोत्कर्षस्वर्गप्राप्तिकामोऽहमेतान्युपकरणसहितानि भोजनानि

1 I. O. अनन्तरोक्तदानवत्
2 A तद्वस्तुनाम तत्तद्देवताकीर्तनं
3 I. O. स्वीकाराश्चोन्नेयाः, A स्वीकारस्वोन्नेयः
4 I. O. गोधूमभक्तान्
5 A ब्राह्मणाय
6 A adds अर्चितं here
7 A ॰मेतं
8 A स्पर्शनम्
9 I. O. omits this
10 I. O. माघादि
11 A स्वर्गलोक
12 A ब्राह्मणानामत्वमत्र for the bracketed portion
13 I. O. तत्र दानपूर्वतरदिने, A तद्दाने दिनपूर्वतरदिने
14 A हविष्यभोजनादि
15 A omits अर्चितेभ्यो
16 A अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदा॰
17 A ऽमुकामुकदेवशर्मभ्यो
18 A omits अर्चितेभ्यो

ददानि । धर्मराजः प्रीयताम् । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते [1]भोजनानीमानि प्रजापतिदैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । [सम्प्रदानबहुत्वञ्च बहुवचनोहेन][2] । दक्षिणा पूर्ववत् । [3]स्पर्शः स्वीकारः । एवं माघ-[4]कृष्णनवम्यामपि दद्यात् । तत्र च निवेदनवाक्ये कार्त्तिकपदस्थाने माघपदनिवेशो विशेषः ।

विष्णुः :—

पौष्यां समतीतायां कृष्णपक्षद्वादश्यां सोपवासस्तिलैः [5][स्नातः तिलोदकं] दत्त्वा[6] तिलै-र्वासुदेवमभ्यर्च्य [7]तानेव हुत्वा दत्त्वा [8]भुक्त्वा च सर्वपापेभ्यः पूतो भवति ।१०॥

पौषपौर्णमासीमतिक्रम्य या कृष्णद्वादशी तस्याः पूर्वतरदिने पूर्ववद्धविष्यभोजनादि कृत्वा सूर्य्यादिदेवताभ्यो [9]विष्णूक्तसोपवास-[10]कृष्णद्वादशीविहिततिलस्नानतिलतर्पण-तिलद्रव्यकवासु-देवार्चन[11]-तिलहोम[12]-[तिलदानतिलभोजनकर्म मया कर्त्तव्यमिति निवेद्य श्व उपोष्यापरदिने तिलस्नान-तिलतर्पण-तिलद्रव्यकवासुदेवार्चन-तिलहोम-तिलदान][13]-तिलभोजनान्यहं करिष्ये इति सङ्कल्पं कुर्यात् । ततो नियमेन सुप्त्वा [14]एकादशीदिन उपोष्य द्वादश्यां प्रातस्तिलैः स्नात्वा पितॄं-स्तिलैस्तर्पयित्वा तिलैर्वासुदेवमर्चयित्वा वासुदेवाय स्वाहेति तिलानग्नौ हुत्वा [शूद्रो ब्राह्मणद्वारा कारयित्वा][15] अर्च्चिताय ब्राह्मणायार्च्चितान् तिलान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [16][सर्वपापपूतत्वप्राप्तिकामोऽहमेतांस्तिलान् ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेत ।] कामस्तुत्यादि पूर्ववत् । [17]मुष्टिग्रहणञ्च स्वीकारः । ततो भोजनं तिलैः कुर्य्यात् ।

यमः :—

माघान्धकारद्वादश्यां तिलैर्हुत्वा हुताशनम् ।
तिलान् दत्त्वा च विप्रेभ्यः सर्वपापैः प्रमुच्यते ॥११॥

---

1 A भोजनानी
2 I. O. संप्रदानबहुवचनोहेन for the bracketed portion
3 A स्पर्शनञ्च
4 A omits कृष्ण
5 A स्नाततिलोदकं for the bracketed portion
6 I. O. हुत्वा
7 A तामव
8 A omits भुक्त्वा
9 A विष्णुविष्णु०
10 A omits कृष्ण
11 A ०वासुदेवपूजा
12 A तिलहोम twice
13 A omits the bracketed portion
14 A एकादशीदिनम्
15 A ब्राह्मणद्वारा for the bracketed portion
16 I. O. omits the bracketed portion
17 A स्वस्तिग्रहणञ्च

माघकृष्णद्वादश्यां [1]कृतनित्यो [2]यथाविध्यग्निमुपसमाधाय [3]ॐ प्रजापतये स्वाहेति तिलान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा[ऽर्चितेभ्यो यथेष्टसंख्यब्राह्मणेभ्य][4]-स्तिलानर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [5][सर्वपापप्रमोचकत्व]-प्राप्तिकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादि-[स्वीकारान्तमनन्तरोक्त][6]-तिलदानवत्।

[7][कूर्मपुराणे (२।२६।२५) :—

माघमासे[8] [तमिस्रे तु][9] द्वादश्यां समुपोषितः।
शुक्लाम्बरधरः कृष्णैस्तिलैर्हुत्वा हुताशनम् ॥१२॥
[प्रदद्याद् ब्राह्मणेभ्यस्तु [10]तिलानेव समाहितः।][11]
जन्मप्रभृति यत् पापं सर्वं तरति वै द्विजः ॥१३॥

माघकृष्णद्वादश्याः पूर्वतरदिने [12]पूर्ववद्धविष्यभोजनादि[13] कृत्वा सूर्यादिदेवताभ्यः कूर्मपुराणोक्तसोपवास-तिलदानकर्म मया कर्तव्यमिति निवेद्य ॐ[14] श्व उपोष्य द्वादश्यां तिलहोमपूर्वकतिलदानकर्माहं करिष्य इति सङ्कल्प्य नियमेन सुप्त्वा [15]परदिने कृत्यनित्य [16]उपोष्यापरदिने तथाविध्यग्निमुपसमाधाय प्रजापतये स्वाहेति तिलान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्यस्तिलानर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। जन्मप्रभृतिकृतपापतरणकामोऽहमेतान् तिलान् ददानि। स्वस्त्यादिस्वीकारान्तं पूर्वतिलदानवत्[17] ।]

---

1 A कृतकृत्यो
2 A अग्निमुपसमाधाय
3 I. O. omits ॐ
4 A ऽर्चिताय ब्राह्मणेभ्यो for the bracketed portion
5 A यमः। सर्व्वपापप्रशमन for the bracketed portion
6 A स्वीकारान्तं मनन्तरोक्त for the bracketed portion
7 I. O. reads the bracketed portion twice
8 A माघे मासि
9 K. P. तु विप्रस्तु for the b. p.
10 A तिलानि
11 I. O. omits this line in the second and more correct reading of the previously indicated bracketed portion but reads it in the first and less correct reading of the same.
12 A omits पूर्ववत्
13 I. O. ०भोजनादिष
14 I. O. omits ॐ in both the readings
15 A अपरदिने
16 A उपोष्य परदिने
17 A पूर्ववत्

आग्नेयपुराणे :—

जलधेनुं प्रवक्ष्यामि सर्वकिल्विषनाशिनीम्[1] ।
[2]दत्ता या प्रीतये राजन् जलशायिजगत्पतेः[3] ॥१४॥
जलकुम्भं सभृङ्गारं सुवर्णरूप्यसंयुतम् ।
गर्भस्थानानि [4]रत्नानि दत्त्वा च सप्त मुख्यतः[5] ॥१५॥

सप्तरत्नानीति परिभाषोक्त-[नवरत्नमध्ये बहुमूल्यसप्तरत्नग्रहणम् ।

सप्तधान्ययुतं तद्वद् गुडधेनुर्यथा पुरा ।
सितवस्त्रयुगच्छत्रं [7]दूर्वापल्लवशोभितम् ॥१६॥

सप्तधान्यानि परिभाषोक्तानि ।][8] गुडधेनुर्यथा पुरेति आग्नेयपुराणोक्त-गुडधेन्वलङ्कारोपकरणग्रहणम्[9] ।

गन्धपात्रैर्युतं [10][दिक्षु सित]-यज्ञोपवीतिनम् ।
सच्छत्रं [11]सहोपानत्कं विष्टरैः परिवारितम् ॥१७॥

गन्धपात्रैर्गन्धयुतैः[12] पात्रैश्चतुर्भिः ।

चत्वारि तिलपात्राणि [13]खदिरौदुम्बराणि च ।
[14]दधिपात्रेण संयुक्तं [15]घृतक्षीरवता मुखे ॥१८॥

औदुम्बराणि ताम्रमयानि ।

द्वादश्यां शुक्लपक्षे तु आषाढस्य नृपोत्तम ।
उपोषितः समभ्यर्च्य केशवं जलशायिनम् ॥१९॥
गन्धपुष्पोपहारैश्च यथाविभवविस्तरात् ।
सङ्कल्प्य जलधेनुञ्च पूजयेद्वत्सकं तथा[16] ॥२०॥

1 A ०नाशिनी, I. O. ०नाशनम्
2 I. O. and A दत्तया
3 I. O. जलशायीजगत्पतिः, A जलसायीजगत्पतिः
4 A पात्राणि
5 I. O. सप्तमुखतः, A सप्तमुख्यातः
6 A सप्तपात्राणीति
7 I. O. पूर्वा०
8 A omits the bracketed portion
9 I. O. ०गुडधेन्वलङ्कारोपग्रहणं, A ०गुडधेनोरलङ्कारोपकरणं
10 A दिक्षयित for the bracketed portion
11 I. O. सोपानत्कं, A स उपानत्व
12 I. O. गन्धयुक्तैर्गन्ध for गन्धयुतैः
13 I. O. खदिरौदुम्बराणि
14 A दोग्धपात्रे
15 A घृतक्षीरवतामने
16 I. O. omits it

[1]वत्सकं [2]जलकुम्भचतुर्थभागनिर्मितं गुडधेनौ तथा दर्शनात् ।
सितवस्त्रधरः शान्तो वीरो विगतमत्सरः ।
दद्यादनेन मन्त्रेण प्रीतये जलशायिनः ॥२१॥
जलशायी जगद्योनिः प्रीयतां मम केशवः ।
[3]पयोमेधी [4]पयोवासो पयसा शयनं हरेः ॥२२॥
पयोधरासि मे देवि इह लोके परत्र च ।
[5][इति मत्वा] जगन्नाथं विप्राय प्रतिपादयेत् ।
[6][अपक्वान्नेन तिष्ठेत] अहोरात्रमतः परम् ॥२३॥
अनेन विधिना दत्त्वा जलधेनुं [7]यतव्रतः ।
सर्वान् कामानवाप्नोति ये दिव्या ये च मानुषाः ॥२४॥
कदा शरीरे [8][न व्याधिमाप्नोति] [9]पुरुषो नृप ।
[10]दत्त्वा [11]जलमयीं धेनुं [12]विष्णुलोकञ्च गच्छति ॥२५॥

आषाढे शुक्लद्वादश्याः पूर्वतरदिने पूर्ववद्धविष्यभोजनादि कृत्वा सूर्य्यादिदेवताभ्य आषाढ-शुक्लद्वादशीविहित-[13]जलशायिपूजापूर्वक-जलधेनुदानकर्म[14] मया कर्तव्यमिति निवेद्य सङ्कल्पयेत् । [15]ॐ श्व उपोष्यापरदिने [16]जलशायिपूजापूर्वकजलधेनु-[17][दानकर्माहं करिष्ये] । ततो नियमेन सुप्त्वा [18]परदिन उपोष्य द्वादश्यां यथाशक्ति गन्धमाल्योपहारैः[19] केशवाय जलशायिने नम इति मन्त्रेण केशवं[20] जलशायिनं सम्पूज्य गोमयोपलिप्तभूभागे कुशानास्तीर्य्य तत्रोपरि कृष्णाजिनमास्तीर्य्य तथैव स्वल्पकृष्णाजिनं प्रसार्य्य चतुर्हस्ताजिने जलशायिने[21]

1 I. O. and A omit it
2 I. O. जल । कुम्भ०
3 A पयोमयी, I O. पयोमया
4 I. O. पयोवर्त्ता
5 A omits the bracketed portion
6 A अपक्वान्नवतिष्ठेत् for the bracketed portion
7 A यत: व्रत:
8 I. O. नोपाधामाप्नोति and A नोवाधामाप्नोति for the bracketed portion
9 I. O. पुरुषोत्तम
10 A जत्वा
11 I. O. and A जलमयी
12 A विष्णुलोकं स
13 I. O. and A जलशायी०
14 A omits कर्म
15 I. O. omits ॐ
16 A जलशायी०
17 A दानमहं करिष्यामि for the bracketed portion
18 I. O. परदिने, A अपरदिन
19 A पुष्पोपहारैः
20 A केशव
21 I. O. omits it

जलकुम्भमयी[1]-[2]मत्र यथोक्तोपकरणयुतां [3]धेनुदानावर्तस्थाग्नेयपुराणोक्त-गुडधेन्ववयवा-लङ्कारोपकरणयुतां धेनुचतुर्थभागजलनिर्मितैवंरूपवत्स[4]-सहितां जलधेनुमर्चिता[5]-मर्चिताय ब्राह्मणाय जलशायी जगद्योनिरित्यादि सार्द्धश्लोकं पठित्वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्ताषाढ--शुक्लद्वादशीविहितजलधेनुदान[6]--फलप्राप्तिकामोऽहमेतां[7] लघ्वेण--काजिनस्थापितकुम्भस्थधेनुचतुर्थांशजलमय--सभृङ्गार--सुवर्णरौप्य--सप्त--[रत्न-सप्त][8]--धान्ययुत-शुक्तिकर्णेक्षुपाद-[9]शुचिमुक्ताफलेक्षणसितसूत्रसिराल[10]-सितकम्बल-ताम्रपात्र[11]--पृष्ठ--सितचामर-रोमकविद्रुमौष्ठयुगल[12]-नवनीतस्तनक्षौमपुच्छकांस्योपदोहेन्द्रनीलतारक नानाफलसमायुक्त-[13]गन्ध-करण्डकघ्राण सितवस्त्रयुगच्छन्न[14]--[15]दूर्वापल्लवशोभित-गन्धपात्रसहित-सितयज्ञोपवीति-[16]सच्छ-त्रोपानत्क---विष्टर---तिलपूर्णताम्रपात्रचतुष्टययुत---घृतक्षीरदधिपूर्णपात्रयुत--[17]मुखवत्ससहितां कृष्णाजिनस्थजलकुम्भमयीं भृङ्गारसुवर्णरौप्य-सप्त-[18]रत्न-सप्तधान्ययुतां शुक्तिकर्णामिक्षुपादां मुक्ताफलेक्षणां सितसूत्रसिरालां सितकम्बलगलकम्बलां[19] ताम्रपात्रपृष्ठां[20] सितचामररोमिकां विद्रुमौष्ठयुगां[21] नवनीतस्तनीं क्षौमपुच्छां कांस्योपदोहामिन्द्रनीलतारकां नानाफलसमायुक्तां गन्धकरण्डघ्राणां सितवस्त्रयुगच्छन्नां [22]दूर्वापल्लवशोभितां [23]गन्धपात्रचतुष्टययुतां सितयज्ञो-पवीतिनीं [24]सच्छत्रोपानत्कां [25]विष्टरतिलपूर्णताम्रपात्रचतुष्टययुतां दधिघृतक्षीरपूर्णपात्र-[26]संयुक्तमुखीं जलधेनुं ददानि। स्वस्तिसावित्रीपाठान्ते जलधेनुरियं विष्णुदैवतेति

---

1 A जलकुम्भं मयं
2 A अत्र यथोक्तोपकरणमुद्रां, I. O. अत्रत्यक्तोपकरणयुतां
3 A धेनुदानावर्त्तीयं पुराणोक्त०
4 A ०निर्मितवत्स०
5 A omits अर्चिताम
6 A ०दाना०
7 A ०मेतं
8 A रत्न for the bracketed portion
9 I. O. वि for शुचि
10 A सितराल for सिराल
11 A omits पात्र
12 I. O. ०विद्रुमौष्ठयुग
13 A गन्धकघ्राण, I. O. गन्धकरण्डक-घ्राण
14 A ०च्छत्र
15 A दूर्व्व०
16 A च्छत्रोपानह०
17 A मुखवत्सासहितं
18 A रत्न०
19 I. O. सितकम्बलगलकम्बल
20 I. O. ताम्रकपात्रपृष्ठा, A ताम्रपात्र-कपृष्ठां
21 A विद्रुमौष्ठयुतां
22 A सर्व्वा०
23 A omits it
24 A च्छत्रोपानत्क
25 I. O. विस्तरतिलपूर्णं०, A reads [illegible] and omits [illegible]
26 I. O. ०समायुक्तमुखीं

प्रतिग्रहीता वदेत्। कामस्तुतिर्दक्षिणा च पूर्ववत्। पुच्छग्रहणं स्वीकारः। [ततो दान-दिने अपक्वान्नाशी[1] भवेत्।][2]

विष्णुधर्मे[3] :—

श्रावणे शुक्लपक्षे तु द्वादश्यां प्रीयते नृप।
गोप्रदानेन देवेशो[4] यत् पूर्वं कथितं तव ॥२६॥

यत् पूर्वं कथितमिति विष्णुधर्मोक्तालङ्कृतगवीदानग्रहणम्। ब्राह्मणायार्चितायालङ्कृत-गवीदानावर्तस्थ[5] विष्णुधर्मोक्त-गोविन्दस्नपनपूर्वकगोदानविधिना गामर्चितां दद्यात्।

तथा :—

पौषशुक्ले तु तद्वच्च द्वादश्यां घृतधेनुकाम्।
घृतार्चिः-प्रीणनार्थाय[6] प्रदद्यात फलदायिनीम् ॥२७॥

तद्वच्चेति विष्णुधर्मोक्त-घृतधेनुपरिग्रहः। ब्राह्मणायार्चिताय धेनुदानावर्तस्थ[7]-विष्णु-धर्मोक्त[8]-घृत[9]-धेनुदानविधिना[10] घृतधेनुमर्चितां दद्यात्।

[तथा :—

तथैव माघद्वादश्यां प्रदत्ता तिलगौर्नृप।
केशवं प्रीणयत्याशु सर्वकामांश्च[11] यच्छति ॥२८॥

अत्रापि तथैवेति विष्णुधर्मोक्ततिलधेनुग्रहणम्। ब्राह्मणायार्चिताय धेनुदानावर्तस्थ-विष्णुधर्मोक्ततिलधेनुदानविधिना तिलधेनुमर्चितां दद्यात्।][12] दानवाक्ये अमुककामोऽहमिति विशेषः।

तथा :—

ज्यैष्ठे मासि सिते पक्षे द्वादश्यां जलधेनुकाम्[13]।
[14]दत्त्वा यथावद्विधिना प्रीणयत्यम्बुशायिनम्[15] ॥२९॥

---

1 A अपक्वान्नासी
2 I. O. omits bracketed portion
3 A adds तु after this
4 A देवेशौ
5 A omits स्थ
6 A घृताचिःप्रीणनायेनं
7 A omits स्थ
8 A विष्णुधर्मोत्तरोक्त
9 I. O. omits घृत
10 I. O. विधया, A विधाय
11 I. O. सर्वकामां
12 A omits the bracketed portion
13 I. O. जलधेनुदः
14 I. O. दत्ता
15 A °शायिनं

यथावद्विधिनेति विष्णुधर्मोक्त[1]-जुलधेनुविधि[2]-ग्रहणम् । ब्राह्मणायार्चिताय धेनु-दानावर्तस्य[3]-विष्णुधर्मोक्त जलधेनुमर्चितां दद्यात् ।

विष्णुधर्मोत्तरे (३।३१६।२६-३१) :—

द्वादश्यां चैत्रशुक्लस्य चित्रवस्त्रप्रदो नरः ।
अक्षय्यं फलमाप्नोति नाकलोकञ्च गच्छति ॥३०॥
वैशाखमासद्वादश्यां [4]रुक्मदानात्तथैव च ।
छत्रोपानहयोर्दानाज्ज्यैष्ठे मासि द्विजोत्तमाः ॥३१॥

तथैव चेति प्रथममासोक्त-फलानुषङ्गः[5] ।

[6][आस्तीर्णं शयनं दत्त्वा प्रीणयेद्भोगिशायिनम् ।]
आषाढशुक्लद्वादश्यां श्वेतद्वीपे महीयते ॥३२॥

[7][आस्तीर्णं शयनं दत्त्वा श्वेतद्वीपे महीयते] [इति सम्बन्धः ।][8]

श्रावणे वस्त्रदानेन विष्णुलोके महीयते ।
गोदः प्रयाति गोलोकं मासि[9] भाद्रपदे द्विजाः ॥३३॥
प्रीणयेदश्वशिरसमश्वं[10] दत्त्वा तथाश्विने ।
विष्णुलोकमवाप्नोति कुलमुद्धरति स्वकम् ॥३४॥
सरोमवस्त्रदानेन कार्त्तिके दिवमाप्नुयात् ।
प्रदानं लवणानान्तु मार्गशीर्षे महाफलम्[11] ॥३५॥

[सरोमवस्त्रमित्यनेन तूलपटीकानां ग्रहणम्[12] ।][13]

तथा (३।३१६।३२) :—

[14][धान्यानाञ्च तथा] पौषे [15]दारूणां चाप्यनन्तरे ।
फाल्गुने सर्वगन्धानां नात्र कार्य्या विचारणा ॥३६॥

---

1 A विष्णुधर्मोत्तरोक्त
2 A जलधेनुविधि०
3 A omits स्य
4 A पूपदानात्तथैव
5 A फलानुषङ्गः, I. O. फलानुकर्षः
6 A reads the bracketed portion as स्वास्तीर्णसंशयं दत्वा प्रीण-येज्जलशायिनं
7 A omits the bracketed portion
8 I. O. omits the bracketed portion
9 I. O. मासे
10 A 'अन्नं' for 'अश्वं'
11 A शुभप्रदे
12 I. O. तूलपटीकाभ्यानाञ्च
13 A omits the bracketed portion
14 Supplied from V. D. I. O. and A omit it
15 I. O. and A दारुणां

[1][अनन्तरे माघे] दानं महाफलमित्यनुषज्यते[2]। अत्र यत्रापि द्वादश्युल्लेखो नास्ति तत्रापि समभिव्याहारात् द्वादश्योन्नेया[3]।

चैत्रशुक्लद्वादश्यां यथाशक्ति नानावर्णवस्त्रमर्चित[4]-मर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-द्वादशीविहितार्चित[5]-वस्त्रदानफलप्राप्तिकामोऽहमेतदर्चित[6]-वस्त्रं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानञ्च[7] स्वीकारः। वैशाखशुक्ल-द्वादश्यां काञ्चनदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-रुक्मदानफलप्राप्तिकामोऽहमेतद्रुक्म-मिति निवेश्यम्[8]। स्वस्तिसावित्रीपाठानन्तरं [9]रुक्ममिदमग्निदैवतमिति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शश्च स्वीकारः। [10]ज्येष्ठशुक्लद्वादश्यां छत्रोपानद्-युग[11]-दानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-छत्रोपानद्युग[12]-दानफलप्राप्तिकामोऽहमेत-च्छत्रोपानद्युगमिति[13] निवेशनीयम्। स्वस्तिसावित्रीपाठानन्तरमेतच्छत्रोपानद्युगे प्रजा-पत्युत्तानाङ्गिरोदैवते[14] इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। छत्रदण्डग्रहण-मुपानद्युगारोहणञ्च[15] स्वीकारः। आषाढशुक्लद्वादश्यां खट्वोपरि-तूलिकादिविरचित[16]-शयनीय-दानवाक्ये सोत्कर्षश्वेतद्वीपप्राप्तिकामोऽहमेतच्छयनीयमिति[17] निवेश्यम्[18]। वाक्यानन्तरं प्रीयतां भोगिशायीति वदेत्। स्वस्तिसावित्रीपाठानन्तरम् एतच्छयनं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शश्च[19] स्वीकारः। श्रावणशुक्लद्वादश्यां वस्त्रदानवाक्ये सोत्कर्षविष्णुलोकप्राप्ति-[20]कामोऽहमेतद्वस्त्रमिति [21]निवेश्यम्। स्वस्तिसावित्री-

1 A अनन्तमाघे for the b. p.
2 A दानं महाफलमित्यनुसज्यते, I. O. omits महाफलम्
A अत्र यत्रापि... तत्रापि स before पौषे in the 1st line of V. 36 above and अत्र यत्रापि द समभि...न्नेया॥ here, the two together making up the present sentence.
4 A omits अर्चितम्
5 A °विर्चित्र
6 A °चित्रं
7 A °पूर्वकं परिधानं
8 A निवेशनीयं
9 I. O. रुक्मं for रुक्म
10 A ज्यैष्ठे
11 A युगल for युग
12 A युगल for युग
13 A °पानद्दयुगे इति
14 A उत्तानाङ्गीरसोदैवते
15 A छत्रोपानद्युगारोहणञ्च for उपानद्...णञ्च
16 A °विरचित
17 A °च्छयनमिति
18 I. O. reads निवेश्य and omits वाक्यानन्तरं...वदेत्, A निवेशनीयम्
19 A स्पर्शनञ्च
20 A कामनया for कामोऽहम्
21 A निवेशनीयम्

पाठानन्तरं वस्त्रमेतद्बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । [1][दशाग्रहणपूर्वकं परिधानं] स्वीकारः । [2][भाद्रपदशुक्लद्वादश्यां गोदानवाक्ये गोलोकप्राप्तिकामोऽहमेतां गामिति निवेश्यम्[3] । स्वस्तिसावित्रीपाठानन्तरं गौरियं[4] रुद्रदैवतेति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । पुच्छग्रहणं स्वीकारः ।] आश्विनशुक्लद्वादश्यामश्वदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहिताश्वदानफलप्राप्तिकामोऽह-[5]मेतमश्वमिति निवेश्यम्[6] । वाक्यानन्तरञ्च[7] प्रीयतामश्वशिरा इति[8] वदेत् । स्वस्तिसावित्रीपाठानन्तरमश्वोऽयं यमदैवत इति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । कर्णग्रहणं[9] स्वीकारः । कार्त्तिकशुक्लद्वादश्यां तूलपटो[10]-दानवाक्ये स्वर्गप्राप्तिकामोऽहमेतत्सरोमवस्त्रमिति[11] निवेश्यम्[12] । स्वस्तिसावित्रीपाठानन्तरं वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । [दशाग्रहणपूर्वकं परिधानं][13] स्वीकारः । [मार्गशीर्ष[14]-शुक्लद्वादश्यां सैन्धव-साम्भरि-कर्कचाख्यलवणानामन्यतमदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहितान्येतानि[15] लवणान्यहं ददानि । स्वस्तिसावित्रीपाठान्ते लवणान्येतानि समुद्रदैवतानीति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् ।][16] [17]पौषशुक्लद्वादश्यां धान्यदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-धान्यदानफलप्राप्तिकामोऽहमेतद्धान्यमिति[18] निवेश्यम् । स्वस्तिसावित्रीपाठानन्तरं[19] धान्यमिदं[20] प्रजापतिदैवतमिति[21] प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । [22][मुष्टिग्रहणं[23]स्वीकारः।] माघशुक्लद्वादश्यां दारुदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित-

1 I. O. स्पर्श and A दशाग्रहणपूर्व्वकञ्च for the bracketed portion
2 I. O. omits the bracketed portion
3 A निवेश्य
4 A गौरीयं
5 I. O. ॰मेतदश्वमिति
6 A निवेशनीयम्
7 A वाक्यान्तरञ्च
8 I. O. शिरामिति
9 A कर्णग्रहणञ्च
10 A तूलपट्टो॰
11 I. O. ॰सरोमयमिति, A ॰सरोमवस्त्र
12 A निवेशनीयं
13 A omits परिधानं, I. O. स्पर्शनं for the b. p.
14 A मार्गशुक्ल॰
15 A ॰विहितमेतानि
16 I. O omits the bracketed portion
17 A पौषधान्यदान्यदानवाक्ये
18 A एतानि धान्यानीति for एतद्धान्यमिति
19 A ॰पाटान्ते
20 A एतानि धान्यानि
21 A दानस्पत्यानि इति
22 A omits the bracketed portion
23 I. O. स्वस्तिग्रहणं

दारुदानफलप्राप्तिकामोऽहमेतानि दारूणीति निवेश्यम्[1]। स्वस्तिसावित्रीपाठानन्तरं दारूण्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शनं[2] स्वीकारः। फाल्गुनशुक्लद्वादश्यां परिभाषोक्त-[सर्वगन्धदानवाक्ये विष्णुधर्मोत्तरोक्त-द्वादशीविहित][3]-सर्वगन्धदानफलप्राप्तिकामोऽह-[मेतानि सर्वगन्धानीति निवेश्यम्। स्वस्तिसावित्रीपाठानन्तरं सर्वगन्धा एते गन्धर्वदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शनं स्वीकारः। सर्वश्चैतन्निवेशनं विष्णुधर्मोत्तरोक्त-द्वादशीविहित-चित्रवस्त्रदानफलप्राप्तिकामोऽह][4]मेतच्चित्रवस्त्रमिति स्थाने कार्य्यम्। एतास्वेव द्वादशीषु[5] तत्तदुक्त-[6]नक्षत्रयुक्तासु तत्तदुक्तद्रव्यदाने[7] फलाधिक्यम्।

तथा हि[8] (३।३१६।३३-३७) :—

[9]भाग्यर्क्षसंयुता चैत्रे द्वादशी स्यान्महाफला।

[10]भाग्यर्क्षं पूर्वफल्गुनी। महाफलेत्यनन्तरोक्त-द्वादशीविहित-[11][तत्तद्दानफलान्येवात्र] महान्ति भवन्तीत्यर्थः[12]।

हस्तयुक्ता च वैशाखे जैष्ठे च स्वातिना[13] तथा।

[प्रौष्ठपदे तथाषाढे][14] मूलोपेता च वैष्णवे ॥३७॥

वैष्णवे[15] श्रावण इत्यर्थः।

तथा भाद्रपदे मासि[16] [17]श्रवणेन च संयुता।

[18][आश्विने द्वादशी पुण्या भवत्याजर्क्षसंयुता ॥३८॥

आजर्क्षं पूर्वभाद्रपदा।

कार्त्तिके रेवतीयुक्ता सौम्ये कृत्तिकया तथा।

1 A निवेशनीयं
2 A स्पर्शनञ्च
3 A omits the bracketed portion
4 A मेतं सर्व्वगन्ध for the bracketed portion
5 A द्वादशीयुत
6 A ०नक्षत्रयुक्तास्वतदुक्तद्रव्य०
7 I. O. दान
8 A तथा च
9 A भाग्याख्यसंयुता
10 A भाग्यं

11 A तद्दानफलप्राप्तिकामोऽहं एतानि for the bracketed portion
12 I. O. भवतीत्यर्थः
13 A स्वाति
14 A पौष्ठपदे तदाषाढे and I. O. आषाढे for the bracketed portion
15 A omits it
16 A मासे
17 A श्रावणेन तु
18 A omits the bracketed portion

सौम्यो मार्गशीर्षः ।

पौषे मृगशिरोपेता माघे चादित्यसंयुता ॥३६॥]

[1]आदित्यं पुनर्वसु ।

फाल्गुने पुष्यसहिता द्वादशी [2]पावनी परा ।
नक्षत्रयुक्तास्वेतासु तथा दानमुपोषितम् ।
सर्वं महाफलं ज्ञेयमनन्तं द्विजसत्तमाः ॥४०॥

तथा दानमुपोषितमिति [3]यथालोक्तद्रव्याणां दानं महाफलं [4]तथोपवासोऽपि महाफलः । तान्येव तत्तदानोक्तानि [5]फलान्यत्यर्थं ददातीत्यर्थः । एवञ्च [6]सङ्कल्पमपि कुर्य्यात् । द्रव्यदाने तु विष्णुधर्मोत्तरोक्त-पूर्वफल्गुनीयुक्त-द्वादशीविहित-[7]चित्रवस्त्रदानफलप्राप्तिकामोऽहमेतच्चित्रवस्त्रं ददानि । तथा विष्णुधर्मोत्तरोक्त-हस्तानक्षत्रयुक्त-द्वादशीविहित-रुक्मदानफलप्राप्तिकामोऽहमेतद्रुक्ममिति विशेषः । एवं ज्यैष्ठादिष्वपि मासेषु [8]तत्तन्नक्षत्र-[युक्तत्वेन वाक्यरचनोहनीया][9] ।

महाभारते(अनु-६८।१६क-२०क) :—

वैशाख्यां पौर्णमास्याञ्च तिलान् [10][दद्याद् द्विजातिषु] ।
तिला भक्षयितव्याश्च सदा [11]त्वालभनञ्च तैः ।

सदेति प्रत्यब्दमित्यर्थः ।

कार्य्यं सततमिच्छद्भिः [12]श्रेयः सर्वात्मना गृहे ॥४१॥

यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्यो[13]ऽर्चितांस्तिलान्[14] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-वैशाखपौर्णमासीविहित-[15]तिलदानफलप्राप्तिकामोऽहमेतांस्तिलान् ददानि । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेयुः । कामस्तुत्यादि पूर्ववत् । मुष्टिग्रहणञ्च स्वीकारः । यजमानेन [16]तद्दिने तिलैरुद्वर्तनं[17] तिलभक्षणञ्च कार्य्यम् ।

1 A आदित्य
2 I. O. यावनी
3 A यथाप्रोक्तं द्रव्याणां
4 A उपवासोपि
5 A फलानि
6 I. O. सङ्कल्पोपवासमपि
7 A omits चित्रवस्त्र
8 I. O. तन्नक्षत्रं
9 A युक्ता for the bracketed portion, I. O. ०वाख्य वचनो०
10 A दद्यात् द्विजादिषु, I. O. दत्वा द्विजातिभि:
11 A त्वालोभनञ्च
12 A सदा
13 A omits अर्चितेभ्यो
14 A अर्चिताय तिलान्
15 A omits तिल
16 A तद्दिने, I. O. omits it
17 I. O. तिलै वोद्वर्तनं

जावालः :—

> [1]शृतान्नमुदकुम्भञ्च वैशाख्यान्तु विशेषतः ।
> निर्दिश्य धर्मराजाय [2]गोदानफलमाप्नुयात् ॥४२॥

[3]शृतान्नं पक्वान्नम् । वैशाख्यां पौर्णमास्यां [4]धर्मराजायार्चिताय [5]शृतान्नमुदकुम्भं चार्चितं [6]दद्यात् । ॐ अद्य गोदानफलप्राप्तिकामोऽहं [धर्मराजाय शृतान्नोदकुम्भं][7] ददानि । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं [8]भगवते धर्मराजाय दक्षिणामेतत् काञ्चनं ददानि ।

तथा :—

> सुवर्णतिलयुक्तैस्तु ब्राह्मणान् सप्त पञ्च वा[9] ।
> तर्पयेदुदपात्रैस्तु[10] ब्रह्महत्यां व्यपोहति ॥४३॥

अत्र प्रकरणाद्वैशाख्यामेव यथोक्तसंख्यब्राह्मणेभ्योऽर्चितेभ्यस्तावत्संख्यार्चितयथोक्तोदपात्रदानम्[11] । ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । जावालोक्त-सुवर्णतिलसहितोदपात्रदानफलप्राप्तिकामोऽहमेतानि सुवर्णतिलसहितानि उदपात्राणि ददानि । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते उदपात्राण्येतानि[12] वरुणदैवतानीति वदेयुः । [13]स्पर्शनं स्वीकारः ।

यमः :—

> वैशाख्यामेव विधिवद् भोजयेद् ब्राह्मणान् दश ।
> त्रिरात्रमुषितः स्नात्वा कृषरं प्रयतः शुचिः ॥४४॥
> गौरान् वा यदि वा कृष्णान् तिलान् क्षौद्रेण संयुतान् ।
> दत्त्वा दशसु विप्रेषु तानेव स्वस्ति वाचयेत् ॥४५॥

1 A घृतान्नमुदकुम्भन्तु
2 A गोदाने for गोदान
3 A घृतान्नं
4 A धर्मराजार्चिताय
5 A घृतान्न०
6 A omits it
7 A धर्मराजफलप्रीत्यर्थं उदकुम्भं for the bracketed portion
8 A भगवते वा
9 I. O. and A पञ्चधा
10 A ०पात्रैश्च
11 I. O. ०यथोक्तोदपात्रं दानं, A ०यथोक्त उदकपात्रदानं
12 A उदपात्राण्येति
13 A स्पर्शनम्

[1][स्वस्ति वाचयेत्] प्रतिग्रहविधिं कारयेदित्यर्थः ।

प्रीयतां धर्मराजेति [2]पितॄन् देवांश्च तर्पयेत् ।
यावज्जीवकृतं पापं [3]तत्क्षणादेव नश्यति ॥४६॥

[4]पितॄन् देवांश्च तर्पयेदित्यनेन पार्वणश्राद्धं कुर्य्यादित्युक्तम् ।

[5]अयुतायुतश्च तिष्ठेत स्वर्गलोके न संशयः ।
मामेव तु न पश्येत्तु न च पापेन लिप्यते ॥४७॥

पौर्णमास्याः पूर्वे [6]पञ्चमदिने [7]कृतैकभक्तादिः पूर्ववत् सूर्य्यादिदेवताभ्यस्त्रिरात्रोपवास-[8][पूर्वक-यमोक्त]-वैशाखपौर्णमासी-विहित-मधुतिलदान-ब्राह्मण-[9]कृषरभोजन-[10][कर्म मया कर्तव्यमिति निवेद्य सङ्कल्पयेत् । ॐ श्व आरभ्य] त्रिरात्रमुपोष्यापरेऽहनि[11] पौर्णमास्यां दशभ्यो [12]ब्राह्मणेभ्यो मधुयुक्तांस्तिलान्[13]-चितान् ॐअद्यादि [14]युष्मभ्यमन्तमुक्त्वा दद्यात् । यमोक्तदश-ब्राह्मण सम्प्रदानक-मधु-[15]युक्ततिलदानफलप्राप्तिकामोऽहमेतान् [16]सक्षौद्रान् तिलान् ददानि । प्रीयतां धर्मराजः । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेयुः । कामस्तुत्यादि पूर्ववत् । [मुष्टिग्रहणञ्च स्वीकारः ।][17] ततो [18]यत्रतस्तानेव ब्राह्मणान् कृषरं भोजयेत् । [19]ततः पार्वणविधिना [20]श्राद्धं समधुतिलैरेव कुर्य्यात् । [21]एतत्तु दानं ब्राह्मणक्षत्रिययोरेव [22]वैश्यशूद्रयोस्त्रिरात्रनिषेधात् ।

तथा च महाभारते :—

चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते[23] ।
त्रिरात्रन्तु न [24]धर्मज्ञैरीरितं ब्रह्मवादिभिः ॥४८॥

---

1 A omits the bracketed portion
2 A पितृं
3 I. O. तत्क्षणादेव
4 I. O. पितॄन् देवांस्तर्प०, A पितृं देवांश्च तर्प०
5 A अयुतायुतं
6 I. O. पञ्चदिने
7 A कृतैकभक्तादि
8 A पूर्वोक्त for the bracketed portion
9 A omits कृषर
10 I. O. त्रिरात्र इति सङ्कल्प्य for the bracketed portion
11 I. O. omits अपरेऽहनि
12 A omits it
13 A omits तिलान्
14 I. O. तुभ्यं for युष्मभ्यम्
15 A हृत for युक्त
16 A हृतक्षौद्र
17 A omits the bracketed portion
18 A यत्र स्थाने
19 A तत्र
20 A श्राद्धं
21 A तत्त
22 A वैश्यवैश्यशूद्रयो त्रिरात्रं निषेधात्
23 A विधीयते
24 I. O. धर्मशास्त्रविहित

तथा :—

वैशाख्यां पौर्णमास्याश्च[1] ब्राह्मणान् सप्त [2]पञ्च वा ।
चौद्रयुक्तैस्तिलैः कृष्णैर्वार्चयेद्[3] यदि वेतरैः[4] ॥४६॥

[5]इतरैः श्वेतैस्तिलैः । [6]कृष्णैर्वार्चयेदिति तिलांस्तेभ्यो दत्त्वा [प्रीयतां धर्मराजेति तानर्चयेदित्यर्थः ।][7]

[8]प्रीयतां धर्मराजेति यद्वा मनसि वर्त्तते ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥५०॥

यद्वा मनसीति इष्टदेवताप्रीतये[9] वा । तदा चामुकदेवता प्रीयतामिति [10]प्रतिवचनम् । वैशाख्यां पौर्णमास्यां सप्तभ्यः पञ्चभ्यो [ब्राह्मणेभ्योऽर्चितेभ्यो][11]ऽर्चितान् समधुतिलान् ॐ अद्यादि[12]युष्मभ्यमन्तमुक्त्वा दद्यात् । यावज्जीवकृतपापक्षयप्राप्ति[13]-कामोऽहमेतान् [14]सक्षौद्रान् तिलान् ददानि । प्रीयतां धर्मराजेति [अमुकदेवता इति][15]वा ब्रूम [16][इति ब्राह्मणान् वदेत् । प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इत्युक्त्वा यथाशाखं कामस्तुतिं पठित्वा प्रीयतां धर्मराज इति अमुकदेवता इति वा ब्रूयुः ।] दक्षिणा पूर्ववत् । [17]मुष्टिग्रहणञ्च स्वीकारः ।

[18]विष्णुः :—

अथ वैशाख्यां पौर्णमास्यां कृष्णाजिनं सखुरं मुक्तालाङ्गूलभूषितं कृत्वा आविके वस्त्रे प्रसारिते [प्रसारयेत्ततस्तिलैः][19]प्रच्छादयेत् । [20]सुवर्णनाभत्वं कुर्य्यात । [21][अहतेन

A पौर्णमास्यान्तु
A पञ्चधा
I. O. and A वाचयेद्
I, O. वेतनैः
A omits it
I. O. क्र वाचयेद्दिति
I. O. omits it, A प्रियता धर्मराजेति तान्वाचयेद्दित्यर्थः for the b. p.
8 A प्रियतां
9 A •प्रीतिर्वा
10 1. O. वाचनम्
11 A omits the bracketed portion
12 A युष्मम् and I. O. तुभ्यम् for यष्मभ्यम्
13 A omits प्राप्ति
14 A सक्षौद्रतिलान्
15 A omits the bracketed portion
16 A omits the bracketed portion
17 I. O. स्वस्तिग्रहणञ्च
18 A omits it
19 A तिलैः for the bracketed portion
20 I. O. सुवर्णनाभित्वं
21 A आहतेन वासयुगेन for the bracketed portion
22 A चेति for

वासोयुगेन] प्रच्छादयेत् । सर्वरत्नगन्धैश्चालङ्कुर्य्याच्चतसृषु[22] दिक्षु चत्वारि तैजसानि पात्राणि क्षीरदधिमधुसर्पिःपूर्णानि [1]निधायाहिताग्नये ब्राह्मणाय [2]वासोयुगप्रच्छादिताय दद्यात ॥५१॥

अत्र च [3]गाथा भवन्ति :—

यस्तु कृष्णाजिनं दद्यात् सखुरं शृङ्गसंयुतम् ।
तिलैः प्रच्छाद्य वासोभिः सर्वरत्नैरलङ्कृतम् ॥५२॥
ससमुद्रगुहा तेन सशैलवनकानना ।
चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः ॥५३॥

वैशाख्यामाहिताग्नये ब्राह्मणायार्चिताय वस्त्रयुगेनाच्छादिताय शृङ्गखुरयुक्तं मुक्ताभूषित-लाङ्गूलं[4] कम्बलोपरि प्रसार्य्य यथोक्तोपकरणयुक्तं कृष्णाजिनमभ्यर्च्य ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णूक्त-वैशाखपौर्णमासीविहित-कृष्णाजिनदानफलप्राप्तिकामोऽ-हमेतन्मुक्ताभूषितलाङ्गूलमाविकवस्त्रस्थं[5] तिलप्रच्छादितं [6]सुवर्णनाभमहत[7]-वासोयुगप्रच्छादितं सर्वरत्नसर्वगन्धक्षीरदधिमधु[8]-सर्पिःपूर्णतैजस[9]-पात्रचतुष्टययुतं कृष्णाजिनं ददानि । प्रति-ग्रहीता स्वस्तिसावित्रीपाठान्ते कृष्णाजिनमिदं प्रजापतिदैवत-[मिति वदेत् ।][10] कामस्तुत्यादि पूर्ववत् । पुच्छग्रहणं स्वीकारः ।

वैशाखाधिकारे वशिष्ठः :—

कृष्णाजिने तिलान् दत्त्वा[11] हिरण्यं मधुसर्पिषम्[12] ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥५४॥

वैशाखपौर्णमास्यां जन्मसंस्कारविद्यायुक्ताय ब्राह्मणायार्चिता-[13]योक्तोपकरणयुतं कृष्णा-जिनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । समस्तदुष्कृतनिस्तार[14]-प्राप्तिकामोऽहमेत-त्तिलाच्छादितं[15] हिरण्यमधुसर्पिर्युतं[16] कृष्णाजिनं ददानि । स्वस्त्यादिस्वीकारान्तमनन्तरोक्त-दानवत् ।

1 A विधायाहिताग्नये
2 A वासः प्रच्छादिताय
3 A शाखा
4 A मुक्तासाङ्गुलं
5 A ०वस्त्रस्थ
6 I. O. सुवर्णनाभि०
7 A आहत for अहत
8 A omits मधु
9 I. O तिल for तैजस
10 I. O. मित्युक्त्वा for the bracketed portion
11 A कृत्वा
12 A मधुसर्पिषी
13 I. O. ०योक्त उपकरणयुतं, A ०योक्तपकरणयुतं
14 A ०तरण
15 I. O. ०च्छादित
16 A ०सर्पियुक्तं

तथा वैशाखाधिकारे :—

सुवर्णनाभं कृत्वा तु सखुरं कृष्णमार्गकम् ।

तिलैः प्रच्छाद्य यो दद्यात्तस्य पुण्यफलं[1] शृणु ॥५५॥

ससमुद्रगुहा तेन सशैलवनकानना ।

चतुरन्ता[2] भवेद्दत्ता पृथिवी नात्र संशयः ॥५६॥

वैशाख्यां पौर्णमास्यां ब्राह्मणायार्चिताय कृष्णाजिनमुक्तरूपमुक्तोपकरणमर्चितम्[3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वशिष्ठोक्त-सुवर्णनाभकृष्णमृगाजिनदानफलप्राप्तिकामोऽह-मेतत् सुवर्णनाभं तिलप्रच्छादितं कृष्णमार्गकं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

कूर्मपुराणे (२।२६।२३) :—

[4]शृतान्नमुदकुम्भञ्च [5]वैशाख्याञ्च विशेषतः ।

निर्दिश्य धर्मराजाय विप्रेभ्यो मुच्यते भयात् ॥५७॥

यथेच्छसंख्यब्राह्मणेभ्योऽर्चितेभ्यो[6]ऽर्चितानुदकुम्भान् [7]शृतान्नानि [8]चार्चितानि ॐ अद्यादि [9]युष्मभ्यमन्तमुक्त्वा दद्यात । [10]भयमुक्तिकामोऽहमेतानि [11]शृतान्नानि एतानुदकुम्भान् ददानि । [12]धर्मराजः प्रीयताम् । ततः स्वस्तिसावित्रीपाठानन्तरं [13]शृतान्नमिदं प्रजापति-दैवतमुदकुम्भोऽयं[14] वरुणदैवत इति प्रत्येकं प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् । [15]स्पर्शः स्वीकारः ।

तथा (२।२६।१९-२१) :—

वैशाख्यां पौर्णमास्याञ्च[16] ब्राह्मणान् सप्त पञ्च वा ।

उपोष्य विधिना शान्तान्[17] [शुचिः प्रयतमानसः][18] ॥५८॥

पूजयित्वा तिलैः कृष्णैर्मधुना च विशेषतः ।

[19][गन्धादिभिः समभ्यर्च्य वाचयेद्वा स्वयं वदेत् ॥५९॥]

---

1 A फलं for पुण्यफलं
2 A चतुरन्ता
3 I. O. दुक्तं for मर्चितम्
4 A घृतञ्च and K. P. कृतान्न for भृतान्न
5 A वैशाख्याञ्च
6 A अर्चिते for अर्चितेभ्यो
7 A घृतान्नानि
8 A omits चार्चितानि
9 A युष्मभ्यमुक्त्वा
10 I. O. उभययुक्त for भयमुक्ति
11 A घृतान्नानि
12 A धर्मराज
13 A घृतान्नमिदं
14 A उदकुम्भो for उदकुम्भोऽयं
15 A स्पर्शश्च
16 K. P. ०स्तु
17 Supplied from K. P. I. O. प्रशान्तान्, A शेम
18 K. P. शुचीन् प्रयतमानसाः for the b. p.
19 Supplied from K. P, I. O. and A omit it

प्रीयतां धर्मराजेति यद्वा[1] मनसि वर्तते ।
[2]यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥६०॥

यद्वा मनसि [वर्तत इत्यभीष्ट][3]-देवताप्रीतये वा। वैशाखपौर्णमास्याः पूर्वतरदिने [4]कृतैक-भक्तादिः पूर्ववत् सूर्य्यादिदेवताभ्य उपवासपूर्वक-[5]कूर्मपुराणोक्त-समधुतिलदानकर्म मया कर्तव्य-मिति निवेद्य सङ्कल्पं कुर्य्यात्। ओँ श्व उपोष्य पञ्चदश्यां [6]पूजापूर्वकसमधुतिलदान-कर्माहं करिष्ये। ततो नियमेन सुप्त्वाऽपरदिने उपोष्यापरदिने स्नातः शुचिः शान्तमनाः स्वेच्छया सप्त पञ्च वा शान्तान् [7]ब्राह्मणानभ्यर्च्य तेभ्यो ब्राह्मणेभ्यो[8] मधुसहितान् कृष्णतिलान् ओँ अद्यादि [9]युष्मभ्यमन्तमुक्त्वा दद्यात्। यावज्जीवकृत-पापक्षयकामोऽहमेतान् [10]समधून् तिलान् ददानि। [11][धर्मराजः प्रीयताम् अमुकदेवो वा प्रीयताम्।] प्रति-ग्रहीतारः स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति वदेयुः। कामस्तुत्यादि पूर्ववत्। [12]मुष्टिग्रहणं स्वीकारः।

आदित्यपुराणे :—

ज्यैष्ठे मासि तिलान् दत्त्वा पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यत् पुण्यं तत् प्राप्नोति न संशयः ॥६१॥

ज्यैष्ठपौर्णमास्यां ब्राह्मणायार्चितायार्चितान् तिलान्[13] ओँ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अश्वमेधफलप्राप्तिकामोऽहमेतांस्तिलान् ददानि। प्रतिग्रहीता स्वस्तिसावित्री-पाठान्ते एते तिलाः प्रजापतिदैवता इति वदेत्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणञ्च स्वीकारः।

आग्नेयपुराणे :—

एतच्छ्रुत्वाम्बरीषोऽपि वशिष्ठं प्रत्यभाषत ।
कथं [वृषे च धेनूनां][14] दशानां फलमिष्यते ॥१॥

1 A दत्त्वा
2 Corrected from K. P. I. O. and A यावज्जीवन्तु तत्
3 I. O. वर्त्तन्त इतीष्ट for the bracketed portion
4 A कृतैतत्कभक्तादि
5 A ब्रह्मपुराणोक्त
6 I. O. पूजापूर्वकमधुतिल०, A समधुकतिल०
7 A omits ब्राह्मणान्
8 I. O. omits ब्राह्मणेभ्यो
9 A मध्वभ्यमनुमुक्त्वा
10 A समधु
11 A धर्मराजः प्रीयतामिति। अमुकप्रदेवो वा प्रीयतामिति for the bracketed portion
12 A स्वस्तिग्रहणञ्च
13 A omits तिलान्
14 A वसिष्ठ वृषैका for the b. p.

सर्वमेतन्ममाचक्ष्व प्रवक्तुं[1] [2]कुशलोऽह्यसि ।
[3][तमाह स] वशिष्ठोऽपि शृणुष्व गदतो मम ॥२॥
[4]त्वमेकाग्रमना भूत्वा महर्षे[5] दानमुत्तमम् ।
[6][यतो नाभ्यधिकं] किञ्चित्त्रिषु लोकेषु विद्यते ॥३॥
यद्दत्वा दिति-[7][जोऽप्येष बली] राजा समाहितः ।
रसातलगतो भुङ्क्ते दिव्यान् भोगाननुत्तमान् ॥४॥

तथा :—

[8]सुरवसुचक्र × × नाथोऽयं दिवि मोदते ।
[9]यद्दानेन नरश्रेष्ठ त्रैलोक्यैश्वर्य्यबृंहितः[10] ॥५॥
तथान्येऽपि हि राजानो धर्मकृत्येषु ये मताः ।
तत्र [11]तद्दानमाहात्म्याद्‌गता पुण्यकृतां गतिम् ॥६॥
[12]आषाढपौर्णमास्यान्तु मिथुनस्थे दिवाकरे ।
श्रद्दधानैर्जितक्रोधैर्देयमेतद् यथाविधि ॥७॥
जाम्बूनदस्य शुद्धस्य पलैस्त्रिंशति-[13]भिस्तथा ।
[14][तदर्धमर्धमर्धेन यथाशक्ति पलैस्त्रिभिः ॥८॥]

[15]तदर्धं तदर्धमयं पञ्चदशपलमयमित्यर्थः । [16]तदर्ध-[स्यार्धं पलसप्तकमयमित्यर्थः [17]अर्धपादेन][18] पलचतुष्टयेन वा कुर्य्यादित्यर्थः ।

द्वाभ्यामेकेन वा कुर्य्या-[19]द्वृषं सर्वाङ्गशोभनम् ।
पलादूनो न[20] कर्तव्यो दुःखशोकभयावहः[21] ॥६॥

---

1 I. O. प्रवक्तुं
2 A केशवोह्यसि
3 A ततमोह for the bracketed portion
4 A एकाग्रमनसो
5 A राजर्षे
6 A येन नात्यधिकं for the b. p.
7 A ज्योप्रेष फलो for the bracketed portion
8 I. O. omits this
9 I. O. यद्दानेन
10 I. O. त्रैलोक्यैश्वर्य्यबृंहितः
11 I. O. ०माहात्म्या ह्नता
12 A आषाढे
13 A ०शोभनं
14 A तदर्द्धमर्द्धेन यथा यथाशक्ति पलैस्त्रिभिः for the bracketed portion
15 I. O. omits this
16 I. O. तदर्द्धसार्द्धं०
17 I. O. अर्द्धपादेन
18 A omits the bracketed portion
19 A ०वृष पक्षाङ्गशोभनं
20 A पक्षादुसोन, I. O. पक्षादुनोन
21 I. O. ०यावाहः

मण्डपं कारयेद्दिव्यं परार्ध्यपटनिर्मितम् ।
तन्मध्ये तण्डुलैः शुक्लैर्मण्डलं कारयेच्छुभम् ॥१०॥

परार्ध्यमुत्कृष्टम् ।

ततः प्रभाते विमले समुत्थाय जितेन्द्रियः ।
शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः ॥११॥
कृतनित्यक्रियः शुक्लरत्नमाल्यविभूषितः ।
नरो वा यदि वा नारी दिव्यभोगाभिलाषिणी ॥१२॥

शुक्लरत्नं मुक्ता ।

सितवस्त्रयुगच्छन्नं स्थापयित्वा ततो वृषम् ।
सुवर्णमण्डपे तस्मिन् सुरत्नैर्बहुभिश्चितम ॥१३॥
चन्दनागुरुकर्पूरैः[1] सुमनोभिस्तथा सितैः[2] ।
सम्पूजयेत्ततः सम्यङ्मन्त्रैः पुराणसम्मितैः ॥१४॥
नमस्ते जगदाधार प्रियः पुण्यकृतामसि ।
त्वद्विहीने जगत्यस्मिन्न कश्चिच्छुभमश्नुते ॥१५॥
नमस्ते धर्मराजाय वृषरूपधराय वै ।
त्वं मामुद्धर देवेश दुःखसंसारसागरात् ॥१६॥
यशः कीर्त्तिर्धनं धान्यं यदन्यदपि संस्तुतम् ।
तत् प्रयच्छेह देवेश परत्र च शुभां गतिम् ॥१७॥
इति सम्पूज्य विधिवत्तं [3]देवं वृषरूपिणम् ।
नैवेद्यं सम्भवेत्तत्र हविषा निर्मितं शुभम् ॥१८॥
कालोद्भवं[4] मूलफलं [5]सर्वं देयं समन्ततः ।
हविष्यान्नेन [6]भुञ्जीत भोजयित्वा द्विजोत्तमान् ॥१९॥
सायाह्ने च ततः कुर्य्यात् पुष्पं गृहमनुत्तमम् ।
[7][सितपुष्पैः शुभैर्गन्धलुब्धमाधुकरालयैः ।२०॥]

1 I. O. चन्दनागुरुकर्पूरै, A चन्दानागुरुकर्पूरैः

2 I. O. सुमनोभिस्तथासितैः

3 I. O. देव

4 I. O. कालोद्भव

5 I. O. सर्व्व, A omits it

6 I. O. भुञ्जात

7 A सितवस्त्रैः शुभैः गन्धैर्बद्धैर्मधुकरालयैः for the bracketed portion

फलमूलानि धान्यानि दीपाः शुक्लदशान्विताः ।
[1][घृतपूर्णास्तु कर्तव्याः] [2][सम्प्रद्योतितमण्डपाः ॥२१॥

दशा वर्तिः ।

रात्रौ जागरणं कार्य्यं देवदेवस्य सन्निधौ ।
वारमुख्यासमानाय्यैगन्धर्वानतिसौख्यदान् ॥२२॥

गन्धर्वानतिगायनान् ।

गीतवादित्रशब्देन ब्रह्मघोषरवेण च ।
नर्मालापैश्च नृत्यैश्च गमयेत्तां निशां ततः ॥२३॥
अरुणोदयवेलायां] समुत्थाय जितेन्द्रियः ।
पूजयित्वा [3]द्विजानत्र गोहिरण्यैर्नरोत्तम[4] ॥२४॥
वृषरूपं ततो धर्मं प्रीयतां वृषभध्वजः ।
इत्युच्चार्य्य [5]परं मन्त्रमाचार्य्याय निवेदयेत् ॥२५॥
दत्त्वा दानमिदं [6]सर्वं विधिनानेन [7]पार्थिवः ।
[8][कुर्य्याद्दिग्विजयं विप्रो वेदकर्म समारभेत् ।
वैश्यः[9] समुद्रगमनं [10]शूद्रः कर्म यथेप्सितम् ॥२६॥
फाल्गुन्यामथवा दद्याद् दानमेतन्नृपोत्तमः ।
रौद्रं पर्वणि [11]निर्दिष्टं ब्रह्मणः शङ्करस्य हि ॥२७॥]

[12]सौराषाढपौर्णमास्याः पूर्वतरदिने प्रातः स्नात्वा [13]कृतनित्यो गृहीतोदपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पं कुर्य्यात् । तद्यथा— ॐ आग्नेयपुराणोक्त-पूर्वदिन[14]-हविष्यभोजनपूर्वक-वृषदान-कर्माहं करिष्ये । ततो यथेष्ट-[15]मुतकृष्टवस्त्रमयमण्डपं कारयित्वा तन्मध्ये सिततण्डुलै-

1 A घृतपूर्णान्तु कर्त्तव्यः for the bracketed portion
2 A omits the bracketed portion
3 A द्विजान तत्र
4 A नरोत्तमाः for नरोत्तम
5 I. O. नरं
6 I. O. सर्व्वां
7 I. O. पार्थिव
8 I. O. omits the bracketed portion
9 A वैश्य
10 A पूर्व्व
11 A निर्दिष्टं
12 I. O. सौराषाढस्य
13 I. O. कृतनित्य
14 I. O. पूर्व्वदिने
15 A ०मुक्तावस्त्रमयं मण्डपं

मैण्डलं[1] कुर्य्यात्। ततो [2]परदिने प्रातः[3]कृतनित्यः शुक्लमाल्याम्बरधरो[4] [5]धृतमुक्ताहारः पूर्वोक्तमण्डले शक्त्यनुरूप-[6]मुक्तपरिमाणानामन्यतमपरिमाणेन[7] सुवर्णेन घटितं [8]यथेच्छ-रत्नखचितं वृषं स्थापयित्वा सितवस्त्रयुगेनाच्छाद्य यथाशक्त्युक्तोपचारैरुक्तमन्त्रैश्च सम्पूज्याभीष्ट-संख्यब्राह्मणेभ्यो भोज्यानि दत्त्वा स्वयं हविष्यं भुक्त्वा सायं पुष्प-[9]गृहविरचनादिपूर्वकमुक्तक्रमेण रात्रौ जागरणं कुर्य्यात्। अपरदिने कृतनित्यः सूर्य्योदयसमये यथेच्छसंख्यान् [10]ब्राह्मणान् गोभिर्हिरण्यैश्चाभ्यर्च्य[11] साङ्गवेदविदं ब्राह्मणमभ्यर्च्यार्चितं वृषं[12] तस्मै [13]ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। आग्नेयपुराणोक्त-पूर्वदिनहविष्यभोजनपूर्वक-वृषदानफलप्राप्तिकामोऽहमेतं तण्डुलारोपितं विविधरत्नखचितं[14] वस्त्रयुगाच्छादितं वृषभं[15] ददानि। प्रीयतां वृषभध्वजः। ततः प्रतिग्रहीता स्वस्तिसावित्रीपाठानन्तरं वृषोऽयं [विष्णुदैवत इति वदेत्][16]। कामस्तुत्यादि पूर्ववत्। [17][पुच्छग्रहणञ्च स्वीकारः। फाल्गुनपौर्णमास्यां वा अनेन विधिना वृषमेतं दद्यात्।

विष्णुधर्मोत्तरे (३।३१६।२२-२४क) :—

माघ्यां कृत्वा तिलैः श्राद्धं सर्वपापैः प्रमुच्यते ॥१॥

अत्र पार्वणविधिना तिलैः श्राद्धकरणं सुगमम्।

तथा :—

[18]स्वास्तीर्णशयनं दत्त्वा फाल्गुन्यां ब्राह्मणाय तु।
रूपद्रविणसम्पन्नां भार्य्यां [19]पत्नवतीं तथा ॥२॥

[20]स्वास्तीर्णं दारुमयखट्टोपरि-सुप्रसारित- तूलिकादिरूपं पत्नवतीं कुटुम्बिनीम्।

नरः प्राप्नोति धर्मज्ञाः पुष्टिमाप्नोत्यनुत्तमाम्।
तथा नार्य्यपि भर्त्तारं नात्र कार्य्या विचारणा ॥३॥

1 A श्रिततण्डुलैर्मण्डलं
2 I. O. परद्दिने
3 A कृतनित्ये
4 A शुक्लमाल्याम्बर
5 I. O. and A धृतमुक्ताहारः
6 I. O. युक्त for मुक्त
7 A ०परिमाण
8 A यथेष्ट बहुवर्णैश्चित्रित
9 A omits गृह
10 A omits it
11 A गोभिर्हिरण्यैश्चाभ्यर्च्य I. O. गोभिर्हिरण्यैः
12 I. O. omits it
13 A omits it
14 A विविधवर्णखचितं
15 A वृषं
16 A विष्णुदैवतं for the bracketed portion
17 A omits the bracketed portion
18 I. O. आस्तीर्णं
19 I. O. पत्नवतीं
20 I. O. स्वास्तीर्णा

धर्मज्ञा इति सम्बोधनम्। नार्य्यपि [1]यज्ञवत्त्वादिगुणयुक्तं भर्त्तारं प्राप्नोतीत्यर्थः। यथाशक्ति शय्यामुपकल्प्यार्चितामर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तपौर्णमासीविहित-शयनदानफलप्राप्तिकामोऽहमेतत् स्वास्तीर्णं शयनं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते शयनमिदं प्रजापतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्।] स्पर्शनं स्वीकारः।

[2]तथा (३।३१६।२-३क) :—

संप्राप्य चैत्रमासस्य [3]शुक्लां पञ्चदशीं नरः।
चित्रवस्त्रयुगं [4]दत्त्वा सोपवासो द्विजातये।
ब्राह्मणां-[5]स्तर्पयन् विप्राः सौभाग्यं महदाप्नुयात् ॥४॥

दानपूर्वतरदिने पूर्ववद्धविष्याहारादि [6]कृत्वा सूर्य्यादिदेवताभ्य उपवासपूर्वक-विष्णुधर्मोत्तरोक्त-चित्रवस्त्र-[7]युगदान-ब्राह्मण-[8]तर्पणकर्म मया कर्तव्यमिति निवेद्य सङ्कल्पयेत्। [9]ॐ श्व उपोष्यापरदिने विष्णुधर्मोत्तरोक्त-चित्रवस्त्रयुगदान-ब्राह्मणतर्पणकर्माहं करिष्ये। ततो नियमेन सुप्त्वा परदिने [उपोष्यापरदिनेऽर्चिताय][10] ब्राह्मणाय चित्रवस्त्रयुगमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महासौभाग्यप्राप्तिकामोऽहमेतच्चित्रवस्त्रयुगं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वस्त्रयुगमिदं बृहस्पतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं[11] स्वीकारः। ततो यथेच्छं[12] सुवर्णवस्त्रभोज्यादिना[13] ब्राह्मणां-स्तर्पयेत्।

तथा :—

वैशाखपौर्णमास्यनुवृत्तौ[14] (३।३१६।५ख-६) :—

[15]तस्मिन्नेव तथाकाले [16]सक्षुरं कृष्णमार्गणम्[17]।

---

1 I. O. यस्व०
2 A omits it
3 A शुक्ला
4 I. O. दृष्ट्वा
5 A ०स्तर्पयेत्
6 I. O. भूत्वा, A हुत्वा
7 A ०युगम्०
8 A ०पन्तर्पण०
9 A omits it
10 A अर्चिताय for the bracketed portion
11 I. O. परिधान
12 A यथेष्ट०
13 A ०भोज्यानि दिना
14 I. O. ०स्यानुवृत्तौ
15 A अस्मिन्नेव
16 I. O. सुक्षुरं
17 I. O. कृष्णमार्गकं

तिलैः प्रच्छाद्य वासोभिः सर्वरत्नैरलङ्कृतम् ।
[1]तपस्विने तु दातव्या मही सवनकानना ॥५॥

[2]सर्वरत्नानि परिभाषोक्तानि । एवम्भूतकृष्णाजिनमेव [3]सवनकानना मही । [4][कृष्णाजिनदाने तथाभूतमही]-दानफलमेव भवतीत्यर्थः । तपःशालिनं ब्राह्मणमभ्यर्च्य तस्मै यथोक्तमुक्तोपकरणसहितं[5] कृष्णमृगाजिनमर्चितम् ॐ अद्यादि तुभ्यमन्ममुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्त[6]--पौर्णमासीविहित--[7][कृष्णाजिनदान]--फलप्राप्तिकामोऽहमेतत्तिलप्रच्छादितं [8]वस्त्राच्छादितं [9]सर्वरत्नालङ्कृतं कृष्णमार्गणं ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते कृष्णमार्गणमिदं प्रजापतिदैवतमिति वदेत् । कामस्तुत्यादि पूर्ववत् । पुच्छग्रहणं[10] स्वीकारः ।

तथा (३।३१६।८):—

सोपवासस्तथा ज्यैष्ठे पूर्णे[च शश][11]-लक्षणे ।
उपानहौ तथा छत्रं [दत्त्वात्यन्तं सुखी][12] भवेत् ॥६॥

तथेति [13]देयसमुच्चयार्थम् । ज्यैष्ठपौर्णमासीपूर्वतरदिने पूर्ववद्घटिकाधिकप्रहरत्रये[14] हविष्याहारादिकं कृत्वा सूर्यादिदेवताभ्य उपवासपूर्वक-विष्णुधर्मोत्तरोक्त-पौर्णमासीविहित-च्छत्रोपानद्युगदान-[15][कर्म [16]मया कर्तव्यमिति निवेद्य[17] सङ्कल्पयेत् । ॐ श्व उपोष्यापरदिने विष्णुधर्मोत्तरोक्त-पौर्णमासीविहित-च्छत्रोपानद्युगदान]-कर्माहं करिष्ये । [18]ततो नियमेन सुप्त्वा परदिने उपोष्यापरदिने अर्चिताय ब्राह्मणाय उपानद्युग'[19] छत्रं चार्चितम्[20] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात । अत्यन्तसुखप्राप्तिकामोऽहमेतदुपानद्युग[21]-मेतच्छत्रं ददानि ।

1 A तपसन्ते
2 A सर्व्ववनि
3 A शरणकानना
4 I. O. omits the bracketed portion
5 I. O. ०सहित
6 A विष्णुधर्मोत्त०
7 A कृष्णाजिन for the bracketed portion
8 A omits this
9 A सर्व्वरत्नोलङ्कृतं
10 A पुच्छग्रहणम्
11 A [illegible] for the bracketed portion
12 A दत्वान्तं सुसुखी for the b. p.
13 I. O. देवसमुच्चयार्थं, A देहसंसृष्टपात्रम्
14 A ०घटिकाधिकाधिकप्रहरत्रये
15 I. O. omits the b. p.
16 A omits कर्म
17 A निवेद्य
18 I. O. reads ततो नियमेन सुप्त्वा परदिने उपोष्यापरदिने विष्णुधर्मोत्तरोक्त-पौर्णमासीविहित-छत्रोपानद्युगदानकर्माहं करिष्ये between करिष्ये and ततो
19 A उपानद्युगलं
20 A [illegible], I. O. [illegible]
21 A उपानद्युगल०

प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते एतदुपानद्युगमुत्तानाङ्गिरोदैवत-[मेतच्छत्रं प्रजापतिदैवत][1]-मिति वदेत्। कामस्तुत्यादि पूर्ववत्। उपानद्युगारोहणं[2] छत्रदण्डग्रहणञ्च स्वीकारः।

तथा (३।३१६।६क) :—

आषाढ्यामन्नदानेन प्राप्नोत्यन्नं नरो बहु।

ब्राह्मणायार्चितायान्नमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। प्रचुरान्नप्राप्तिकामोऽहमेतदन्नं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते अन्नमिदं प्रजापतिदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। [3]स्पर्शनं स्वीकारः[4]।

[5][[6]तथा(३।३१६।६ख) :—

जलधेनुप्रदानेन श्रावण्यां शुभमाप्नुयात्॥७॥

विष्णुधर्मोत्तरोक्तविधिना जलधेनुमुपकल्प्यार्चितामर्चिताय ब्राह्मणाय[7] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [8]शुभप्राप्तिकामोऽहमेतां जलधेनुं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते जलधेनुरियं विष्णुदैवतेति वदेत्। कामस्तुत्यादि पूर्ववत्।]

तथा (३।३१६।१०क) :—

गोदानं [9]प्रौष्ठपादे तु पौर्णमास्यां महाफलम्॥८॥

प्रौष्ठपादे[10] भाद्रपदे ब्राह्मणायार्चिताय [11]गामर्चिताम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाफलप्राप्तिकामोऽहमेतां गां ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते गौरियं रुद्रदैवतेति वदेत्। [12][कामस्तुत्यादि पूर्ववत्।] पुच्छग्रहणं स्वीकारः।

तथा (३।३१६।१०ख-११क) :—

[13]अश्वयुक्तु कांस्यपात्रं [घृतपूर्णं द्विजातये][14]।
[15]ससुवर्णं तथा दत्त्वा [16]दीप्ताङ्गस्त्वभिजायते॥९॥

---

1 A omits the bracketed portion
2 A ०रोहन
3 A स्पर्शनञ्च
4 I. O. स्वीकार
5 A omits the bracketed portion
6 I. O, omits तथा
7 I. O. adds अर्चिताय after this
8 I. O. स्वर्ग for शुभ
9 A प्रोष्ठपदे
10 A प्रोष्ठपदं
11 A omits it
12 I. O. omits the bracketed portion
13 A अश्वयुक्ति, I. O. अश्वयुक्
14 I. O. घृतपूर्णं द्विजातये for the b. p.
15 I. O. समवर्णं
16 A दीप्ताङ्गस्त्वभिजायते

अर्चिताय ब्राह्मणाय कांस्यपात्रं घृतेन पूरयित्वा सुवर्णं [1]तन्मध्ये दत्त्वार्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। दीप्ताङ्गप्राप्तिकामोऽहं-[2]मेतद्घृतपूर्णं [3]ससुवर्णं कांस्यपात्रं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते [4]कांस्यपात्रमिदं विष्णुदैवतमिति वदेत्। [5][कामस्तुत्यादि पूर्ववत्। स्पर्शनञ्च स्वीकारः।

तथा :—

अश्वयुक्कृष्णपक्षे तु या तु पञ्चदशी भवेत्।
विष्णुद्वारेषु दातव्यास्तदा दीपा यदूत्तम।]
अन्यत्रापि तदा दीपैर्महत् पुण्यफलं लभेत् ॥१०॥

अन्यत्रापीत्यादि-[6]त्यपुराणोक्तदानेषु।

तथा चादित्यपुराणे[7] :—

प्रदोषसमये लक्ष्मीं[8] पुजयित्वा यथाक्रमम्।
दीपवृक्षास्ततः कार्य्याः[9] शक्त्या देवगृहेषु च ॥११॥
चतुष्पथश्मशानेषु नदीपर्वतवेश्मसु।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥१२॥

[पर्वतवेश्मसु गुहासु।][10] आश्विनपौर्णमास्यनन्तरिता[11]-याममावास्यायां विष्णुद्वारेषु[12] आदित्यपुराणोक्तस्थानेषु च दीपं गृहीतोदपूर्णताम्र-[पात्र उद][13]ङ्मुखः सङ्कल्प्य[14] दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्ताश्वयुक्[15]-कृष्ण[16]-पञ्चदशीविहित-दीपदानफलप्राप्तिकामोऽहं विष्णु[17]-द्वारादिनानास्थानेषु दीपान् दास्ये इति सङ्कल्प्य तत्तत्स्थानेषु शरावस्थान् दीपान् दद्यात्।

1 A तन्मध्ये
2 A omits मेतद्
3 A ससुवर्णं
4 A कांस्यपात्रमिदं
5 A omits the bracketed portion
6 I. O. omits त्य and reads स्थानेषु for दानेषु, A reads the whole line as अन्यत्रापि आदित्य-पुराणोक्तदानेषु
7 I. O. चादिपुराणे, A चादिपुराणे
8 A लक्ष्मीं
9 I. O. कुर्यात्
10 A पर्वतवेश्मसु गृहासु for the b. p.
11 I. O. ०मास्यान्तरिता०
12 A विष्णुद्वारेषु
13 A मुद for the bracketed portion
14 A सङ्कल्प्य
15 A मुक for श्वयुक्
16 A कृष्णपक्ष for कृष्ण
17 A विष्णु०

तथा (वि. ध. ३।३१६।११ख-१४क) :—

कार्त्तिक्यां चन्द्रवर्णाभमन्यवर्णमथापि वा ।

[1]रत्नैर्गन्धैस्तथा धान्यैर्बीजै[2]-र्वस्त्रैस्तथैव च ॥१३॥

अत्र चन्द्रवर्णाभवर्णस्य पृथग्ग्रहणात् [सातिशयत्वमतस्तदभावे अन्यवर्णदानम्][3] ।

[कृत्वा युक्त][4]-मथोक्षाणं दत्त्वा दीपान् समन्ततः ।

चन्द्रोदये नरो दत्त्वा सर्वपापैः प्रमुच्यते ॥१४॥

कान्तारे यममार्गे तु तेनासौ व्रजते सुखम् ।

सर्वाणि चास्य[5] भोगानि तत्र चासौ प्रयच्छति ॥१५॥

अर्चिताय ब्राह्मणाय चतुर्दिग्दत्तदीपचतुष्टयमध्यस्थापितं यथोक्तवर्णं नव-[रत्न-सप्त][6]-धान्य-कुष्माण्डादिबीजकर्पूरागुरुचन्दनकस्तूरी[7]-युक्तं वस्त्रैराच्छादितं[8] वृषभमर्चितं[9] चन्द्रोदये ॐ अद्यादि तुभ्यमहमसुक्ता दद्यात् । विष्णुधर्मोत्तरोक्त-पौर्णमासीविहित-चन्द्राभोक्ष[10] दानफलप्राप्ति-कामोऽहमेतं [11]रत्नगन्धधान्यबीजवस्त्रदीपचतुष्टययुक्त[12]-मुक्षाणं ददानि । प्रतिग्रहीता स्वस्ति-सावित्री-[पाठान्त उच्चार्य विष्णुदैवत इति][13] वदेत् । कामस्तुत्यादि पूर्ववत् । पुच्छग्रहणं स्वीकारः । अन्यवर्णदाने तु तत्तद्वर्णोल्लेखः[14] कार्य्यः ।

तथा :—

दीपा नदीषु दातव्याः कार्त्तिक्यान्तु विशेषतः ।

कार्त्तिक्यां कार्त्तिकपौर्णमास्यां[15] । अत्र विशेषत[16] इति पददर्शनात् विष्णुधर्मोत्तरोक्त[17]-मेव फलम् ।

× × × × × ×

तेजस्वी च यशस्वी च रूपवानभिजायते ॥१६॥

अतिसम्बन्धात् कार्त्तिकपौर्णमास्यां पूर्ववत् नद्यां दीपदानं सङ्कल्पयेत् । ॐ अद्य विष्णु-

1 A नवं for रत्नै
2 I. O. धान्यैर्वस्त्रै for धान्यैर्बीजै
3 A अतिशयत्वात्तदभावेऽन्यवर्णदानं for the b. p.
4 A मुक्ता for the b. p.
5 A यानि
6 A रत्न for the b. p.
7 A कर्पूर for कस्तूरी
8 A वस्त्रैश्छादित, I. O. वस्त्रैश्छादि-तम्
9 A omits it
10 I. O. adds वृषभ after this
11 A omits रत्न
12 A ०युत०
13 A पाठान्त उच्चार्य विष्णुदैवतमिति for the bracketed portion
14 A ०ल्लेख
15 A कार्त्तिकक्याचतुर्दश्यां पौर्णमास्यां
16 A विशेष
17 I. O. विष्णुधर्मोक्त०

धर्मोत्तरोक्त-पौर्णमासीविहित-दीपदानफलप्राप्तिकामोऽहं नद्यामेतान्[1] दीपान् दास्ये। ततो नद्यां जले [2]यष्टीरारोप्य कदलीस्तम्भनिर्मित-[3]पल्लवोपरि वा दीपान् दद्यात्।

तथा (वि. ध. ३।३१६।१७ख-१७क) :—

मार्गशीर्षे[4] तथा मासे[5] पूर्णे शिशिरदीधितौ।
महारजनरक्तेन वाससा द्विजपुङ्गवम् ॥१७॥

महारजनरक्तेन कुसुम्भरञ्जितेन।

आच्छाद्य कांस्यपात्रस्थं[6] प्रस्थं कृत्वा समाहितः।
लवणस्य तु मुख्यस्य चूर्णितस्य[7] द्विजोत्तमाः ॥१८॥

प्रस्थो[8] द्वात्रिंशत् पलानि[9]। मुख्यस्य हविष्यस्य।

दत्त्वा [सुवर्णनाभन्तु तस्मिन्नेव][10] द्विजातये।
सौभाग्यरूप[11]-लावण्ययुक्तो भवति मानवः ॥१९॥

सुवर्णनाभं मध्यन्यस्तसुवर्णम्। सिन्दूरी[12]-वस्त्रेण ब्राह्मणमाच्छाद्य कांस्यपात्रे चूर्णित-सैन्धवप्रस्थं निधाय[13] तन्मध्ये[14] सुवर्णं[15] दत्त्वाभ्यर्च्यार्चिताय तस्मै ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-पौर्णमासीविहितलवणप्रस्थदानफलप्राप्तिकामोऽहमेतं[16] कांस्य-पात्रस्थं[17] सुवर्णनाभं लवणप्रस्थं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते लवणमिदं सोमदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। स्पर्शः[18] स्वीकारः।

तथा (वि. ध. ३।३१६।१७ख-२१ख, २४ख-२५ख) :—

गौरसर्षपकल्केन [19]पौष्यामुत्सादितो नरः।
गव्यस्याज्यस्य[20] कुम्भेन स्नातोऽभ्यषिक्तस्त्वनन्तरम् ॥२०॥

---

1 A एतां नद्यां
2 A यष्टिमारोप्य
3 A reads पल्लवोप and omits वा
4 A मार्गशी
5 A माघे
6 A कांस्यपात्रपात्रस्थं
7 A वर्णितस्य
8 A प्रस्थं
9 I. O. फलानि
10 A सुवर्णनाभं तु तस्मै अथ तत्र for the b. p.
11 A रूप वा for रूप
12 A सिन्धरि०
13 A विधाय
14 I. O. मध्ये
15 A सुर्ण
16 A मेतत्
17 A कांस्यं पात्रस्थ
18 I. O. स्पर्श, A स्वर्णनाभ
19 A नाम for पौष्या
20 I. O. गव्यस्याज्यस्य

उत्सादित उद्वर्तितगात्रः ।

विरूक्षितस्तथा स्नातः[1] सर्वबीजौषधि[2]-जलैः ।
[3]रत्नगन्धफलोपेतैर्घृतेन[4] तदनन्तरम् ॥२१॥

सर्वबीजौषधि[5]-जलैः परिभाषोक्त-सप्तधान्य-सर्वौषधि[6]-मिश्रितजलैरित्यर्थः ।

ससुवर्णमुखं दृष्ट्वा तद् प्रदद्याद्[7]-द्विजातये ।
घृतेन [स्नपितं विष्णुं][8] शक्त्या सम्पूजयेत्ततः ॥२२॥
घृतञ्च जुहुयादग्नौ[9] घृतं दद्याद्द्विजातये ।
[10]कर्त्रे वस्त्रयुगं दद्यात् सोपवासः समाहितः ॥२३॥
कर्मणानेन[11] धर्मज्ञाः[12] पुष्टिमाप्नोत्यनुत्तमाम्[13] ।
पौर्णमासीषु चैतासु[14] मासर्क्षसहितासु च ॥२४॥
एतेषामेव दानानां फलं दशगुणं भवेत् ।
[महत्पूर्वासु चैतासु फलमक्षयमश्नुते ॥२५॥

एतास्वेव पौर्णमासीषु यदा माससंज्ञनक्षत्रयोगो भवति, तदोक्तदानफलेभ्यो दशगुणं फलम् ।][15] यदा तु पौर्णमास्यामेव माससंज्ञ[16]-नक्षत्रे चन्द्रबृहस्पती भवतः, तदा महामाघ्यादि-शब्दवाच्या[17] भवति । तत्राक्षय्यं फलम् ।

तथा च विष्णुः :—

[18]दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।
पौर्णमासी तु महती [प्राप्ता सम्वत्सरे तु या][19] ।
तस्यां दानोपवासाद्यमक्षयं[20] परिकीर्तितम् ॥२६॥

---

1 A स्नातं
2 I. O. बीजोषधी and A बीजौषधी for बीजौषधि
3 A बहु for रत्न
4 I. O. घृते च
5 I. O. and A सर्वबीजौषधी०
6 I. O. सर्व्वौषधी and A सर्व्वौषधीनां for सर्वौषधि
7 A प्रदद्यात्
8 I. O. स्नपितुं विष्णुं and A सुपितो वित्त for the bracketed portion
A जुहुयाद्दग्नौ
10 A कात्त
11 A कर्मणा नेन
12 A धर्मज्ञ:
13 A पुष्टिमाप्नोत्यनुत्तमं
14 A चैत्रासु
15 A omits the bracketed portion
16 A माससज्ञा०
17 A मध्यो for वाच्या
18 I. O. and A दृश्यते
19 A प्राप्ता संवत्सरे तु या and I. O. प्रोक्ता सम्वत्सरेष तु for the bracketed portion
20 A दानोपवासादि अक्षयं

दानदिनपूर्वतरदिने सायं पूर्ववत् घटिकाधिकप्रहरत्रये[1] हविष्यभोजनादि कृत्वा सूर्य्यादि-देवताभ्य उपवासपूर्वक-विष्णुधर्मोत्तरोक्त-[2]पौषपौर्णमासी विहित-सर्षपोद्वर्त्तनादिपूर्वक-घृतदानकर्म मया कर्तव्यमिति निवेद्य सङ्कल्पयेत्। ॐ [3]श्व उपोष्यापरदिने विष्णुधर्मोत्तरोक्तपौष[4]-पौर्णमासी-विहित-सर्षपोद्वर्तनादि-[5][पूर्वक[6]-घृतदानमहं करिष्ये। ततो नियमेन सुप्त्वा अपरदिन उपोष्यापरदिने प्रातः[7] श्वेतसर्षपकल्केनोद्वर्त्य गव्यघृतकुम्भेन स्नातः[8] तण्डुलचूर्णादिभि-र्विरूक्षण[9] कृत्वा परिभाषोक्त-[10]सप्तधान्य-सर्वौषधिमिश्रेण [11][रत्नगन्धफलयुतेन जलेन] स्नातो मुखं सुवर्णसहिते घृते वीक्ष्य तद्घृतं यस्मिन् [12]कस्मिंश्चिद् ब्राह्मणे प्रतिपाद्य घृतस्नपितं भगवन्तं[13] विष्णुं यथाशक्ति सम्पूज्य××ब्राह्मणद्वारा ॐ[14] विष्णवे स्वाहेति घृतेन होमं कारयेत्। ततो होमस्य कर्त्रे वासोयुगं दक्षिणाम् ॐ[15] अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। कृतैतद्धोमकर्मप्रतिष्ठार्थं दक्षिणामिदं वासोयुगं ददानि। होमस्य कर्ता[16] स्वस्तीति वदेत्। ततः प्रतिग्रहीतृब्राह्मणमानाय्या-[17] भ्यर्च्यार्चितं घृतं तस्मै ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। ॐ विष्णुधर्मोत्तरोक्त-[19]पौषपौर्णमासी-विहित-[सर्षपोद्वर्तनादिसहित][20]-घृतदानफलप्राप्ति-कामोऽ[21][हमेतद् घृतं ददानि।] [कृतैतद् घृतदानविहितकर्मप्रतिष्ठार्थं दक्षिणामिदं काञ्चनं ददानि।][22] प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते[23] घृतमिदं विष्णुदैवतमिति वदेत्। काम-

1 I. O. घटिकाचेकाधिकप्रहरत्रयो
2 A omits पौष
3 I. O. श्वोपोष्यापरदिने
4 I. O. and A omit पौष
5 A reads the bracketed portion from here to p. 633, seven folios below within नानादैवतऋतुदानावर्तः
6 A पूर्वकं
7 A adds स्नात्वा here
8 A स्नानः
9 I. O. विरूक्षणं
10 A सर्वधान्यसर्वौषधीमिश्रेण
11 A रत्नगन्धफलयुतेन जलेन, I. O. omits जलेन
12 I. O. कश्चिद्
13 I. O. भवन्तं
14 I. O. omits ॐ
15 A omits it
16 A कर्त्त
17 I. O. reads भ्यर्चितं and omits घृतं, A प्रतिग्रहीतृब्राह्मणायार्चितं घृतं
18 I. O. omits ॐ
19 I. O. and A omit पौष
20 I. O. omits the bracketed portion
21 A reads the bracketed portion as विष्णुदैवतं सर्षपोद्वर्तनादि-सहितं घृतमहं ददानि
22 I. O. omits the bracketed portion
23 A स्वस्तीत्युक्त्वा

स्तुत्याद्य पूर्ववत्। स्पर्शः[1] स्वीकारः। नक्षत्रयोगे [तु विष्णुधर्मोत्तरोक्त-पुष्यानक्षत्रसंयुक्त-पौर्णमासी][2]-विहित-घृतदानफलप्राप्तिकामोऽहमिति दानवाक्ये निवेशनीयम्। एवं माघे मघायोगे फाल्गुने फल्गुनीद्वयस्यान्यतरयोगे चैत्रे चित्रायोगे वैशाखे विशाखायोगे ज्यैष्ठे ज्येष्ठायोगे आषाढे आषाढा[3]-द्वयस्यान्यतरयोगे [4]श्रावणे श्रवणायोगे [5]भाद्रपदे [6]भाद्रपदद्वय-स्यान्यतरयोगे आश्विने अश्विनीयोगे कार्तिके [7]कृत्तिकायोगे मार्गशीर्षे मृगशिरोयोगे [8]दान-वाक्यमुन्नेयम्। एवं महापौषी-महामाघी-महाफाल्गुन्यादिषु द्वादशसु विष्णुधर्मोत्तरोक्त-महापौषीविहित-घृतदानफलप्राप्तिकामोऽहमित्या-[9]यूहनीयम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे मासनियततिथिदानावर्तः।

1 A प्रतिग्रहस्य
2 A reads the bracketed portion as विष्णुधर्मोक्तपुष्यानक्षत्रपौष-मास
3 I. O. and A आषाढ०
4 A श्रवण
5 A भाद्रे
6 I. O. भाद्रपदा०, A भाद्रपदद्वय-स्यान्यतन्यतयोयोगे
7 A कृत्तिकीयोगे
8 I. O. दानवाक्येसुन्नेयं, A दान-वाक्यमुन्नेयं
9 I. O. ०यूहनीयं

अथ नानादैवत-नक्षत्रनियततिथिदानावर्तः । (६५)

विष्णुः :—

[1][मार्गशीर्षशुक्लपञ्चदश्यां मृगशिरोयुक्तायां] चूर्णितलवणप्रस्थमेकं[2] सुवर्णनाभं चन्द्रोदये ब्राह्मणाय प्रतिपादयेत् । [3]अनेन कर्मणा रूपसौभाग्य-[4]भागभिजायते ॥१॥

अत्र यजमानो यथोक्तपौर्णमास्यां चन्द्रोदये ब्राह्मणं वस्त्रादिनाभ्यर्च्य चूर्णितसैन्धवस्य [दशरत्तिकमानेन षोडशपलमेकं प्रस्थमभ्यर्चितं मध्यविन्यस्तसुवर्णं दद्यात् । ॐ अद्या-मुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णूक्तलवणप्रस्थ][5]-दानफल-प्राप्तिकामोऽहमेतं सुवर्णनाभं लवणप्रस्थं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा लवण-[6]प्रस्थोऽयं सोमदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं [7]दक्षिणामेतत् काञ्चनं ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा लवणं स्पृशेत् ।

तथा :—

पौषी चेत्[पुष्यायुक्ता तस्यां][8] गौरसर्षपकल्केरुत्सादितशरीरो गव्यघृतकुम्भे-[9]नाभिषिक्तः सर्वौषधीभिः सर्वगन्धैः [10]सर्वबीजैश्च स्नातो घृतेन च[11] भगवन्तं वासुदेवं स्नपयित्वा [12]गन्ध-पुष्पधूपदीपनैवेद्यादिभिश्चाभ्यर्च्य वैष्णवैः शाक्रै-[13]र्बार्हस्पत्यैश्च मन्त्रैः [14]पावकं हुत्वा ससुवर्णेन च घृतेन ब्राह्मणान् स्वस्ति वाचयेत् । [ससुवर्णघृतमर्चितेभ्यो ब्राह्मणेभ्यो दद्यात् ।][15] [16][वासोयुगं कर्त्रे प्रदद्यात् । अनेन कर्मणा पुष्यते ॥२॥

---

1 A मार्गशीर्षे मार्गशीर्षपञ्चदश्यां मार्गशिर-युक्तायां for the bracketed portion

2 I. O. ०प्रस्थमेक

3 A अनेक

4 I. O. and A ०भाग्यभिजायते

5 A reads the bracketed portion as द्वाविंशत्पलमनेन प्रस्थमेकं लवणं सुवर्णनाभं कृत्वा सुवर्णनाभप्रस्थलवण

6 I. O. ०स्थोऽयं

7 A omits दक्षिणाम्

8 I. O. पुष्ययुक्तास्तस्यां and A पुष्या-युक्तायां for the bracketed portion

9 A ०नाभिषक्तः

10 A सर्व्ववीजैः

11 A omits it

12 A गन्धपुष्पनैवेद्यश्चाभ्यर्च्य

13 A ०र्गार्हस्पत्यैर्म्न्त्रै

14 A omits it

15 I. O. omits the bracketed portion and A reads it, preceded by इति and followed by इत्यर्थः

16 A omits the bracketed portion

उत्सादितशरीर उद्वर्तितगात्रः। सर्वौषध्यः सर्वबीजानि सर्वगन्धाश्च परिभाषोक्ताः। स्नातो[1] तन्मिश्रितजलैरित्यर्थः।] [2]दानवाक्यं यथा—[3]ॐ अ द्यामुकसगोत्रेभ्योऽमुक-वेदामुकशाखाध्यायिभ्योऽमुकशर्मभ्यो युष्मभ्यं [4]पुष्टिप्राप्तिकामोऽहमिदं [5]समुवर्णं घृतं ददानि। स्वस्तिसावित्री-[6]पाठानन्तरं घृतमिदं विष्णुदैवतमिति [7]प्रतिग्रहीतृभिर्वाच्यम्। [8]कामस्तुतिः पूर्ववत्। दक्षिणादाने सम्प्रदानबहुत्वं पूर्ववाक्याद्विशेषः। [9]स्पर्शः स्वीकारः। वासोयुगं [10]कर्त्रे प्रदद्यादिति [11]होमकर्त्रे दक्षिणाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। कृतैतद्धोमकर्म[12]-प्रतिष्ठार्थं दक्षिणामेतद्वासोयुगं ददानि। [13]स्वस्तीति ब्राह्मणो वदेत्।

तथाः—

माघी मघायुक्ता चेत्तस्यां तिलैः श्राद्धं कृत्वा पूतो भवति [14]पार्वणविधिनोक्तम् ॥३॥

तथा[15]:—

[16]फाल्गुनी [17]फल्गुनीयुक्ता चेत्तस्यां ब्राह्मणाय सुसंस्कृतं स्वास्तीर्णं शयनीयं निवेद्य भार्यां मनोज्ञां [18]पक्षवतीं द्रविणवतीं चाप्नोति नार्यपि भर्तारम् ॥४॥

[19]पक्षवतीं कुटुम्बिनीं[20] स्वास्तीर्णं खट्वोपरिविस्तीर्णोत्कृष्ट तूलिकादि-[21]रूपं सुसंस्कृतं[22] शोभननिर्माणम्[23] अर्चिताय ब्राह्मणाय यथोक्तमर्चितं[24] शयनीयम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [25]विष्णूक्त-पौर्णमासीविहित-शयनीयदानफलप्राप्तिकामोऽहमेतच्छयनायं ददानि।

1 I. O. omits it
2 I. O. and A तद्
3 A omits it
4 A पुष्टिकामोऽहं
5 A ससुवर्णघृतं
6 A ०पाठ.न्ते
7 A प्रतिग्रहीतृवाक्यं
8 A कामस्तुत्यादि
9 A स्पर्शश्च
10 I. O. कर्त्रे प्रदद्यादिति, A कर्त्रे दद्यात्
11 I. O. होमाय
12 I. O. omits कर्म
13 I. O. स्वस्ति
14 A पार्वणविधिनेति युक्तं
15 I. O. and A omit it
16 A omits it
17 I. O. फल्गुनीति युक्ता, A फाल्गुनीति युक्ता
18 I. O. यक्षवती, A प्रेक्षावती
19 I. O. यक्षवतीं, A प्रेक्षावतं
20 A कुटुम्बिनं
21 I. O. रूपी
22 I. O. सुसंस्कृत
23 A शोभनं निर्माय
24 A शयनीमर्चितं
25 A विष्णुधर्मोत्तरोक्त

स्वस्तिसावित्रीपाठान्ते [1]शयनीयमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्[2]। कामस्तुत्यादि पूर्ववत्।

तथाः—

[3]चैत्री चित्रायुक्ता चेत्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति ॥५॥

अर्चिताय ब्राह्मणायार्चितं [4]चित्रवस्त्रम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सौभाग्यप्राप्तिकामोऽहमेतच्चित्रवस्त्रं ददानि। स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्[5]। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं[6] परिधानं स्वीकारः।

तथाः—

वैशाख्यां पौर्णमास्यां ब्राह्मणसप्तकं क्षौद्रयुक्तैस्तिलैः[7] सन्तर्प्य धर्मराजानं प्रीणयित्वा पापेभ्यः पूतो भवति ॥६॥

तत्तन्नक्षत्रयुक्तासु-पौर्णमासीषु[8] दान-[श्रवणात्तन्मध्य-[9]पातित्वादत्रापि विशाखानक्षत्रयुक्त-पौर्णमास्यां दानम्। अर्चितेभ्यः सप्तभ्यो ब्राह्मणेभ्योऽर्चितान् मधुयुतांस्तिलान् ॐ अद्यादि [10]युष्मभ्यमन्तमुक्त्वा दद्यात्। [11]विष्णूक्त-पौर्णमासीविहित मधुयुक्त-तिलदान][12]-फलप्राप्तिकामोऽहमेतान् क्षौद्रयुक्तांस्तिलान् ददानि। प्रीयतां धर्मराजः। स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति [13]प्रतिग्रहीतृभिर्वाच्यम्। कामस्तुत्यादि पूर्ववत्। [[14]मुष्टिग्रहणं स्वीकारः।][15]

तथा :—

ज्यैष्ठी [16][ज्येष्ठायुक्ता [17]चेत्तस्यां] [18]छत्रोपानत् प्रदानेन [19]नगराधिपत्यमाप्नोति ॥७॥

1 A omits इदं
2 I. O. वाच्यं for वाक्यम्
3 A चित्रं
4 I. O. वस्त्रं
5 I. O. वाच्यं for वाक्यम्
6 A ०पूर्व्वकं
7 I. O. ०स्तिलैश्च
8 A पौर्णमासीस्व
9 A ०जाति०
10 A तुभ्य०
11 A विष्णुधर्मोत्तरोक्त०
12 A reads the bracketed portion twice
13 A प्रतिग्रहीतृवाक्यं
14 I. O. स्वस्तिग्रहणं
15 A omits the bracketed portion
16 A ज्येष्ठायुतश्चेत् तस्यां for the b. p.
17 I. O. चेत्स्या
18 A छत्रोपानह०
19 I. O. गवाधिपत्य०

अर्चिताय ब्राह्मणार्चित [1][छत्रोपानहौ ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। नमराधिपत्य-प्राप्तिकामोऽहमेते छत्रोपानहौ ददानि।] स्वस्तिसावित्रीपाठान्ते एतच्छत्रोपानहौ प्रजापत्युत्तानाङ्गिरोदैवत इति प्रतिग्रहीतृवाक्यम्[2]। कामस्तुत्यादि पूर्ववत्। छत्रस्य दण्डग्रहणमुपानहोरारोहण[3] स्वीकारः।

तथा :—

आषाढ्या-[4]माषाढायुतायामन्नपानदानेन [5]तदेवाक्षय्यमाप्नोति ॥८॥

अन्नपानमित्यन्न' [6]पानञ्च। अर्चिताय ब्राह्मणायार्चितमन्नपानम् ॐ अद्यादि तुभ्यमन्त-मुक्त्वा दद्यात्। विष्णूक्त-पौर्णमासोविहितान्नपानदानफलप्राप्तिकामोऽहमेतदन्नपानं ददानि। स्वस्तिसावित्रीपाठान्ते अन्नपानमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्[7]। कामस्तुत्यादि पूर्ववत्।

तथा :—

श्रावण्यां [8]श्रवणायुक्तायां जलधेनुं [9]सान्नां वासोयुगाच्छादितां दत्त्वा [10]स्वर्गलोकम-वाप्नोति ॥९॥

मत्स्यपुराणोक्त' [11]जलधेनुमन्नसहितां कृत्वा वासोयुगेनाच्छाद्यार्चितामर्चिताय ब्राह्मणाय धेनुदानावर्तोक्त-मत्स्यपुराणीयजलधेनुदानविधिना[12] दद्यात्। [13][तत्र स्वरूपे सान्नां] वासो-युगाच्छादितामिति कामनायाञ्च स्वर्गलोकप्राप्तिकामोऽहमिति च[14] विशेषः।

तथा :—

प्रोष्ठपद्यां तद्युक्तायां [15]गोप्रदानेन सर्वपापविनिर्मुक्तो भवति ॥१०॥

तद्युक्तायां पूर्वभाद्रपदोत्तरभाद्रपदयोरन्यतरनक्षत्रेण युक्तायामित्यर्थः। [16][ब्राह्मणाया-

1 A adds मेतच्छत्रोपानहौ ददानि स्वस्तिसावित्रीपाठान्ते एते before the bracketed portion
2 I. O. वाच्यं for वाक्यम्
3 I. O. °मुपानहौ वारोहणं, A °मुपानहारोहणं
4 I. O. °माषायुतायां°, A °माषाढ-युतायां°
5 I. O. तदेवाक्षय°, A तदक्षय°
6 A पानकञ्च
7 I. O. वाच्यं for वाक्यम्
8 A श्रवणयुक्तायां
9 A सान्ने
10 A स्वर्गलोकप्राप्तिरेव
11 A जलधेनुं मन्त्रसहितां
12 I. O. °विधया
13 A तत्स्वरूपमान्न for the bracketed portion
14 A omits it
15 A च गुदानेन
16 A reads the bracketed portion as ब्राह्मणाय गां दद्यात्

र्चितायार्चितां गाम्] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सर्वपाप-[1]विनिर्मोकप्राप्तिकामोऽह-मेतां गां ददानि। स्वस्तिसावित्रीपाठान्ते गौरियं रुद्रदैवतेति प्रतिग्रहीतृवाक्यम्[2]। पुच्छ-ग्रहणं स्वीकारः।

तथा :—

[3]आश्वयुज्यामश्विनीगते चन्द्रमसि घृतपूर्णं [भाजनं सुवर्णयुतं][4] विप्राय दत्त्वा [दीप्ता-ग्निर्भवति ॥११॥

अर्चिताय ब्राह्मणाय यथोक्तं भाजनमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्।][5] दीप्ताग्नित्वप्राप्तिकामोऽहमेतत् घृतपूर्णं सुवर्णयुतं[6] भाजनं ददानि। स्वस्तिसावित्रीपाठान्ते भाजनमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा :—

कार्त्तिकी चेत् कृत्तिकायुता [7]स्यात्तस्यां सितमुक्षाणमन्यवर्णं वा शशाङ्कोदये सर्वशस्य-[8]रत्नगन्धोपेतं दीपमध्ये ब्राह्मणाय दद्यात्। [9]कान्तारभयं न पश्यति ॥१२॥

अत्र सितोपादानात् सितोक्षदाने फलाधिक्यं दीपमध्य इति दीपचतुष्टयमध्ये। [10]सर्व-रत्नानि सर्वशस्यानि सर्वगन्धाश्च परिभाषोक्ता ग्राह्याः। ब्राह्मणायार्चिताय चन्द्रोदयसमये यथोक्तं वृषमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णूक्त-पौर्णमासीविहित-सितो-क्षदानफलप्राप्तिकामोऽहमेतं सर्वशस्य-[11][सर्वरत्न सर्वगन्धोपेतमुक्षाणं] ददानि। स्वस्ति-सावित्रीपाठान्ते उक्षायं विष्णुदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः। अन्यवर्णदाने तु तद्वर्णनिवेशो[12] विशेषः।

विष्णुधर्मोत्तरे (३।३१७।३३) :—

माघे [13]श्रवणसंयुक्ता कृष्णा [14]स्याद्द्वादशी यदा।
[15]तिलदानं [16]महत् पुण्यम् [विनापि श्रवणेन तु][17] ॥१३॥

---

1 A विनिर्मुक्ति for विनिर्मोक
2 I. O. वाक्यं for वाक्यम्
3 A अश्वयुज्याश्विनीगते
4 A स्वर्णयुतं for the bracketed portion
5 A omits the bracketed portion
6 I. O. omits it
7 A तस्यां
8 A रत्न for रत्न
9 I. O. कान्तारतभयं
10 A सर्व्वंवस
11 A सर्व्वगन्धीयुक्तप्रस्ताणां for the bracketed portion
12 I. O. तद्वर्णविशेषो
13 A श्रवणयुक्ता
14 A च द्वादशी
15 I. O. दिनदानं
16 A महापुण्यं
17 I. O. omits the bracketed portion

[1][लभेतेति फलं सम्बध्यते।][2]श्रवणायुक्त-माघकृष्णद्वादशीदिने ब्राह्मणायार्चिताय तिलानर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। बृहत्पुण्यप्राप्तिकामोऽहमेतांस्तिलान् ददानि। स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [3]मुष्टिग्रहणं स्वीकारः। [4][अत्र विनापि] श्रवणेनेति पददर्शनाच्छ्रवणारहित[5]-माघकृष्णद्वादश्यामपि तिलदानं कर्तव्यम्।

तथा :—

श्रवणद्वादशीयोगे[6] कृष्णपक्षे तथैव च।
घृतेन दीपा दातव्यास्तैलैर्वा यदुनन्दन ॥१४॥

तथैव चेत्युक्ते [7]वाक्यान्तरोक्तं [8][महत् पुण्यं लभेतेति फलं] सम्बध्यते। [9]श्रवणायुक्तद्वादश्यां पूर्ववद्दीपान् सङ्कल्प्याभिमतदेशे दद्यात्। ॐ अद्य बृहत्पुण्यप्राप्तिकामोऽहं घृतेन दीपान्[10] दास्ये इति सङ्कल्प्य दद्यात्। तैलेन दीपदाने[11] तु घृतपदस्थाने तैलपदनिवेशो विशेषः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे नक्षत्रनियततिथिदानावर्तः।

1 A omits the bracketed portion
2 A श्रवणयुक्तमाघद्वादश्यौदिने
3 I. O. स्वस्तिग्रहणं
4 A मत्रापि for the bracketed portion
5 A ॰विहित॰
6 I. O. ॰युक्ते
7 I. O. वाक्यान्तरोक्तं
8 A reads the bracketed portion as महत्पुण्यफलं लभेतेति
9 A श्रवण॰
10 I. O. दीपा
11 I. O. दीपादाने

[1][अथ नानादैवतनक्षत्रदानावर्तः। (६६)]

महाभारते (अनु—६४।५) :—

कृत्तिकासु महाभागे पायसेन ससर्पिषा।

सन्तर्प्य ब्राह्मणान् [2]साधून् लोकानाप्नोत्यनुत्तमान् ॥१॥

अत्र यजमानो ब्राह्मणेभ्यः [3][सदाचारसम्पन्नशीलेभ्यो]ऽर्चितेभ्योऽर्चितं [4]सघृतपायसं दद्यात्। ॐ अद्यामुकसगोत्रेभ्योऽमुकवेदामुकशाखाध्यायिभ्योऽमुकदेवशर्मभ्यो युष्मभ्यमनुत्तमलोकप्राप्तिकामोऽहमेतं [5]ससर्पिष्कं पायसं ददानि। प्रतिग्रहीतारः [6]स्वस्तीत्युक्त्वा सावित्रीं पठित्वा पायसोऽयं प्रजापतिदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं [7]पठेयुः। ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं [8]युष्मभ्यमहं [9]दक्षिणामेतत् काञ्चनं ददानि। प्रतिग्रहीतारः स्वस्तीत्युक्त्वा पायसं स्पृशेयुः।

तथा (अनु—६४।६) :—

रोहिण्यां प्रथितैर्मांसै-[10][र्मार्गैर्यत्नेन] [11]सर्पिषा।

पयोन्नपानं[12] दातव्यमानृण्यार्थं[13] [14]द्विजातये ॥२॥

प्रथितैर्विहितै-[15][र्मार्गैर्मृग]-सम्बन्धिभिः [पानं पानकम्। अर्चिताय ब्राह्मणायार्चितं][16] घृतमांससहितं दुग्धमन्नं पानकञ्च दद्यात्। ॐ अद्यामुकसगोत्रायामुक-[17]वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यमानृण्यप्राप्तिकामोऽहमेतत् [18]घृतमांसयुक्तं पयोन्नपानं[19] ददानि।

---

1 A omits the bracketed portion
2 A साधुनो
3 A सदा दानशीलेभ्यः सम्पन्नेभ्यो for the bracketed portion
4 I. O. omits स
5 A ससर्पिषं
6 A स्वस्ती
7 I. O. पठेत्
8 I. O. युष्ममहं
9 A एतत्
10 I. O मार्गैर्यैव and A मार्गैर्यैव for the bracketed portion
11 A ससर्पिषा
12 I. O. पयोन्नदानं, A पयोन्नपान
13 A ०मनृण्यार्थं
14 A द्विजायते
15 A मांसैः पशु for the bracketed portion
16 A यानं पानकाऽर्चितं for the bracketed portion
17 A omits वेदामुक
18 I. O. omits घृत
19 I. O. पयोन्नदानं

स्वस्तिसावित्रीपाठान्ते पयोन्नपानमिदं[1] विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।७) :—

दोग्ध्रीं दत्त्वा सवत्सान्तु नक्षत्रे सोमदैवते।
गच्छते मानुषाल्लोकात्[2] स्वर्गवासमनुत्तमम् ॥३॥

सोमदैवतं मृगशिरः। अर्चिताय ब्राह्मणायार्चितां धेनुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अनुत्तमस्वर्गवासप्राप्तिकामोऽहमेतां सवत्सां दोग्ध्रीं ददानि। स्वस्तिसावित्रीपाठानन्तरं दोग्ध्रीयं रुद्रदैवतेति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः।

तथा(अनु—६४।८) :—

आर्द्रायां कृशरं दत्त्वा तैलमिश्रमुपोषितः।
नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ॥४॥

आर्द्रानक्षत्रयुक्तदिनपूर्वतरदिने प्रातः कृत्यनित्यो घटिकाधिकप्रहरत्रये हविष्यं [3]भुक्त्वाऽऽचम्य शुचौ देश उपविश्य पादौ प्रक्षाल्याऽऽचम्य प्राङ्मुख उदङ्मुखो वा कृताञ्जलिः [4]ॐ [5][सूर्य्यः सोमो यमः कालः पञ्च महाभूतानीति पठित्वा] महाभारतोक्तकृशरदानकर्म मया कर्तव्यमित्युक्त्वा उदङ्मुखो गृहीतजलपूर्णताम्रपात्रः सङ्कल्पं कुर्यात्। ॐ श्व उपोष्यापरदिने महाभारतोक्त-कृशरदानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा परदिने [6]कृतनित्य उपोष्यापरदिने [7]तिलतण्डुलमिश्रदुग्धं तैलयुत-[8]मर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-कृशरदानफलप्राप्तिकामोऽहमेतं[9] तैलमिश्रं कृशरं ददानि। [10]स्वस्तिसावित्रीपाठान्ते कृशरोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

1 I. O. ०दानमिदं
2 I. O. मानुषान् लोकात्, A मानुषाल्लोका
3 A भुक्ता
4 A omits it
5 I. O. reads the bracketed portion as सूर्यसोमयमकालपञ्च-महाभूतानि
6 I. O. कृतनित्योपोष्यापरदिने
7 I. O. तिलतण्डुलमिश्रं
8 A omits अर्चितम
9 A omits एत
10 A reads ॐ before this

तथा(अनु—६४।६) :—

[1]पूपान् पुनर्वसौ दत्त्वा तथैवान्नानि शोभने ।
यशस्वी रूपसम्पन्नो बह्वन्ने[2] जायते कुले ॥५॥

अर्च्चिताय ब्राह्मणायार्च्चितान् पूपान् [अन्नानि चार्च्चितानि][3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-पुनर्वसुविहित पूपान्नदान-फलप्राप्तिकामोऽहमेतात् [4]पूपान् [5]एतान्यन्नानि ददानि । स्वस्तिसावित्रीपाठान्ते पूपा एते प्रजापतिदैवता अन्नान्येतानि प्रजापतिदैवतानीति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।

तथा(अनु—६४।१०) :—

पुष्ये तु कनकं दत्त्वा [6][कृतं वाकृतमेव]च ।
अनालोक्येषु लोकेषु सोमवत् स [7]विराजते ॥६॥

[8]कृतमलङ्कारी [9]अकृतमघटितम् । [10][अर्च्चिताय ब्राह्मणायार्च्चितं] यथोक्तं कनकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-पुष्यर्क्षविहित-कनकदानफलप्राप्तिकामोऽहमेतत् [11]कृताकृतं कनकं ददानि । स्वस्तिसावित्रीपाठान्ते कनकमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्म्[12] । कामस्तुत्यादि पूर्ववत् ।

तथा(अनु—६४।११) :—

[13]अश्लेषासूत्तमो रूप्यं [14][वृषभं वा] प्रयच्छति ।
स सर्वभयनिर्मुक्त-[15]वैभवानधितिष्ठति ॥७॥

अर्च्चिताय ब्राह्मणायार्च्चितं रजतं [16]वृषभं वा ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्ताश्लेषाविहितरूप्यदानफलप्राप्तिकामोऽहमेतद्रूप्यं ददानि । स्वस्तिसावित्रीपाठान्ते [17]रूप्यमिदमग्निदैवतमिति प्रतिग्रहीदवाक्यम् । कामस्तुत्यादि पूर्ववत् । [18][वृषभदाने

---

1 A पूपान्न
2 I. O. बह्वन्ने, A बह्वान्न
3 A omits the bracketed portion
4 I. O. अपूपान, A पूवपान
5 A omits it
6 A दद्यात स्वोकृतमेव for the bracketed portion
7 A विजायते
8 A स्वीकृतालङ्कार
9 I. O. omits अ, A कृतेमद्यु तम-घटितं
10 A अर्च्चितं for the bracketed portion
11 A कृतं
12 I. O. वाच्यं for वाक्यम्
13 A अश्लेषासुभवो
14 I. O. वृषं वास for the bracketed portion
15 A सर्वैभानधि०, I. O. भावबानधि०
16 A वृषभ्वा
17 A रूप्यमिदं [illegible]
18 A omits the bracketed portion

तु वाक्ये रूप्यपदस्थाने वृषभपदनिवेशो विशेषः। स्वस्तिसावित्रीपाठान्ते वृषभोऽयं विष्णु-दैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।] पुच्छग्रहणं स्वीकारः[1]।

तथा (अनु—६४।१२) :—

मघासु तिलपूर्णानि वर्द्धमानानि मानवः।
प्रदाय पुत्र-[2]पशुमानिह [3]प्रेत्य च जायते ॥८॥

वर्द्धमानानि शरावान्। अर्चिताय ब्राह्मणायार्चितं[4] तिलपूर्णशरावत्रयम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्ततिलपूर्णवर्द्धमानदानफलप्राप्तिकामोऽह-[5]मेतानि तिल-पूर्णानि वर्द्धमानानि ददानि। स्वस्तिसावित्रीपाठान्ते [6]वर्द्धमानानि एतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।१३) :—

फाल्गुनी-[7]पूर्वसमये ब्राह्मणानामुपोषितः।
[8][भक्ष्यान् फाणित]-संयुक्तान्[9] दत्त्वा सौभाग्यमृच्छति[10] ॥९॥

[11][फाणितं खण्डशालूक इति प्रसिद्धम्।] पूर्वफल्गुनीयुक्तदिन-पूर्व-[12]तरदिने पूर्व-वद्धविष्याहारादि कृत्वा सूर्यादिदेवताभ्य उपवासपूर्वक-[महाभारतोक्त-पूर्व][13]-फल्गुनीविहित-फाणितयुक्त-भक्ष्य[14]-दान-[15]कर्म मया कर्त्तव्यमिति निवेद्य सङ्कल्पं कुर्यात्। ॐ श्व उपोष्या-परदिने महाभारतोक्त-पूर्वफल्गुनीविहित-फाणितयुक्त-भक्ष्यदानकर्माहं करिष्ये।][16] ततो नियमेन सुप्त्वा परदिने [उपोष्यापरदिने ब्राह्मणेभ्योऽर्चितान् फाणितयुक्तान् यथालाभं फल-मूलापूपलड्डुकान्][17] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सौभाग्यप्राप्तिकामोऽहमेतानि

---

1 I. O. स्वीकार
2 I. O. ०पशुमानिह
3 A प्रहृय
4 A ०र्चितान
5 I. O. ०मेतान् तिलपूर्णान् वर्द्ध-मानान्
6 I. O. वर्द्धमाना एते विष्णुदैवता
7 I. O. ०सर्व्वसमये
8 A भक्ष्यानफाणितं for the bracketed portion
9 I. O. ०संयुक्तां
10 I. O. ०मर्हति
11 A फाणित खण्डशालूक इति प्रसिद्धः for the bracketed portion
12 A omits तर
13 I. O. omits the bracketed portion
14 I. O. and A ०भक्ष०
15 I. O. कर्माहं करिष्ये इति
16 I. O. omits the bracketed portion
17 A reads the bracketed portion as महाभारतोक्त-पूर्वफल्गुनी-विहित-फाणितयुक्तभक्ष्याणि

फाणितयुक्तभक्ष्याणि ददानि। स्वस्तिसावित्रोपाठान्ते भक्ष्याणीमानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।१४-१५) :—

घृतक्षीरसमायुक्तं विधिवत् [1]षष्ठिकौदनम्।
उत्तराविषये दत्त्वा स्वर्गलोके महीयते ॥१०॥
यद्यत् प्रदीयते दानमुत्तराविषये नरैः।
[महाफलमनन्तं[2] तद्भवतीति][3] विनिश्चयः[4] ॥११॥

अर्चिताय ब्राह्मणायार्चितं घृतक्षीरयुतं [5]षष्ठिकौदनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सोत्कर्षस्वर्गलोकप्राप्तिकामोऽहमेतद्घृतक्षीरयुक्त-[6]षष्ठिकौदनं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्। स्वेच्छया गोदान-[7][स्वर्णदानादिकं यदत्र] विधीयते तदनन्तर-फलहेतुः[8]। यस्मात् पुण्यतमेय[9]-मुत्तरफल्गुनी, तत्र च देयद्रव्यदेवतास्वीकारौ च प्रतिग्रह-विधावनुसन्धेयौ।

तथा (अनु—६४।१६) :—

हस्ते हस्तिरथं दद्याच्चतुर्युक्त-[10]मुपोषितः।
प्राप्नोति परमाल्लोँकान्[11] पुण्यकामसमन्वितान् ॥१२॥

[12][चतुर्युक्तं चतुर्भिर्गजैर्युक्तमित्यर्थः।] [13]हस्तानक्षत्रयुक्तदिन-पूर्वतर[14]-दिने पूर्ववद्ध-विष्याहारादिकं कृत्वा सूर्यादिदेवताभ्य उपवासपूर्वक-महाभारतोक्त-हस्तिरथदानं मया कर्तव्यमिति निवेद्य सङ्कल्पं कुर्यात्। ॐ श्व उपोष्यापरदिने महाभारतोक्त-हस्तिचतुष्टययुक्त-रथदानकर्माहं करिष्ये। ततो नियमेन सुप्त्वा अपरदिने [15]उपोष्यापरदिनेऽर्चिताय ब्राह्मणा-यार्चितं यथोक्तरथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-[16]चतुर्हस्तियुक्त-

1 A षष्ठिकोदनं
2 I. O. महाफलमन्तं
3 A reads the bracketed portion as महाफलं समं तत्र भवतीति
4 I. O. निश्चय:
5 A षष्टीकोदनं
6 A ॰षष्ठिकोदनं
7 A reads the bracketed portion as स्वर्गदानानि यद्
8 A ॰प्राप्ति:
9 I. O. ॰तामय॰
10 I. O. ॰मतन्वित:
11 I. O. परमान् लोकान्
12 A चतुर्युक्तागजैरित्यर्थ: for the b. p.
13 I. O. हस्त॰
14 A omits तर
15 A omits उपोष्या...दिने
16 A omits चतुर्हस्तियुक्त

रथदानफलप्राप्तिकामोऽहमेतं [1]हस्तिचतुष्टययुक्तं [2]रथं ददानि। स्वस्तिसावित्रीपाठान्ते रथोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [3]ईशाग्रहणं स्वीकारः।

तथा (अनु—६४।१७) :—

चित्रायां[4] वृषभं दत्त्वा [5][पुण्यान् गन्धांश्च] भारत।
चरत्यप्सरसां लोके रमते नन्दने तथा ॥१३॥

पुण्यान् मनोज्ञानुत्कृष्टानित्यर्थः[6]। अर्चिताय ब्राह्मणायार्चितं वृषभं सुगन्धिद्रव्याणि चार्चितानि चन्दनागुरु-[7]कर्पूरकालीयकानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-चित्राविहितर्षभ-पुण्यगन्धदानफलप्राप्तिकामोऽहमेतमृषभ[8]-मेतांश्च गन्धान् ददानि। [9]स्वस्तिसावित्रीपाठान्ते [10]ऋषभोऽयं विष्णुदेवतो गन्धा एते गन्धर्वदैवता][11] [12][इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। वृषपुच्छग्रहणं गन्धस्य स्पर्शश्च स्वीकारः।

तथा (अनु—६४।१८) :—

स्वात्यामथ धनं दत्त्वा यदिष्टतममात्मनः।
प्राप्नोति लोकान् स शुभानिह चैव महद्यशः ॥१४॥

अर्चिताय ब्राह्मणाय सुवर्णरजतताम्रकांस्यरक्तवस्त्रादीनामिच्छयान्यतममर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-स्वातीविहितेष्टतमधनदानफलप्राप्तिकामोऽहमेतद्धनं ददानि। स्वस्तिसावित्रीपाठान्ते धनमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।१९-२१) :—

विशाखायामनड्वाहं धेनुं दत्त्वा च दुग्धदाम्।
[13][सप्रासङ्गं च शकटं सधान्यं वस्त्रसंयुतम् ॥१५॥]

1 A महाभारतोक्त just before it
2 A omits युक्तं
3 I. O. कशा०
4 I. O. and A चित्राया
5 A पुण्यामन्यांश्च for the b. p.
6 I. O. ०कृष्टानीत्यर्थः
7 A ०कुङ्कुमकालीयकानि
8 A ०मेतं वृषभ०
9 A प्रतिगृहीता just before it
10 A वृषभोयं
11 A reads the portion bracketed from p. 620 above up to here within the chap. नानादैवत नक्षत्रदानावर्तः
12 A omits the portion bracketed from here up to p. 641 below
13 Supplied from M. bh. I. O. omits it.

सप्रासङ्गमित्याकर्षयुगद्वयसहितमित्यर्थः। एवं चत्वारो वृषा योज्याः।

पितृदेवांश्च प्रीणाति प्रेत्य चानन्त्यमश्नुते।
न स दुर्गाण्यवाप्नोति स्वर्गलोकञ्च गच्छति ॥१६॥
दत्त्वा यथोक्तं विप्रेभ्यो वृत्तिमिष्टां स विन्दति।
नरकादींश्च संक्लेशान्नाप्नोतीति विनिश्चयः ॥१७॥

अर्चितेभ्यो ब्राह्मणेभ्यो वृषं धेनुं शकटमाकर्षक-वृषचतुष्टययुक्तं धान्यवस्त्रसहितमर्चितम् ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तविशाखाविहितानडुद्धेनुशकटदान-फलप्राप्तिकामोऽहं यथासंख्यमेतमनड्वाहम् एतां धेनुम् एतं सप्रासङ्गं सधान्यं वस्त्रसंयुतं शकटं ददानि। स्वस्तिसावित्रीपाठान्तेऽनड्वानयं विष्णुदैवतो धेनुरियं रुद्रदैवता शकटोऽयमुत्तानाङ्गिरोदैवत इति प्रतिग्रहीतारो वदेयुः। कामस्तुत्यादि पूर्ववत्। वृषधेन्वोः पुच्छ-ग्रहणं शकटस्यारोहणञ्च स्वीकारः।

तथा (अनु—६४।२२) :—

अनुराधासु प्रावारं वस्त्रान्तरमुपोषितः।
दत्त्वा युगशतञ्चापि नरः स्वर्गे महीयते ॥१८॥

प्रावार-[1]मुत्तरीयं वस्त्रान्तरं परिधानीयवस्त्रम् एवं वस्त्रयुगम्। अनुराधायुक्तदिनपूर्वतर-दिने पूर्ववद्धविष्याहारादि कृत्वा सूर्यादिदेवताभ्यः सोपवासमहाभारतोक्तानुराधाविहित-वस्त्रयुगदानकर्म मया कर्तव्यमिति निवेद्य यथाविधि सङ्कल्पयेत्। ॐ श्व उपोष्यापरदिने महाभारतोक्तानुराधाविहितवस्त्रयुगदानकर्माहं करिष्ये। ततो नियमेन सुप्ता परदिने उपोष्या-परदिने ब्राह्मणायार्चितायार्चितमुत्कृष्ट[2]-वस्त्रयुगम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तानुराधाविहितवस्त्रयुगदानफलप्राप्तिकामोऽहमेतं प्रावारमेतद्वस्त्रान्तरञ्च ददानि। स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः।

तथा (अनु—६४।२३) :—

कालशाकञ्च विप्रेभ्यो दत्त्वा मर्त्यः समूलकम्।
ज्येष्ठायामृद्धिमिष्टां वै गतिमिष्टाञ्च गच्छति ॥१९॥

अर्चितेभ्यो ब्राह्मणेभ्योऽर्चितसमूलककालशाकम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-समूलकालशाकदानफलप्राप्तिकामोऽहमेतत् समूलकं कालशाकं ददानि स्व॰

---

1 I. O. ॰मुत्तारकं 2 I. O. ॰मुतृष्ट

सावित्रीपाठान्ते कालशाकमिदं वनस्पतिदैवतमिति प्रतिग्रहीतारो वदेयुः। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।२४) :—

मूले मूलफलं दत्त्वा ब्राह्मणेभ्यः समाहितः।
पितॄन् स संप्रीणयति गतिमिष्टाञ्च गच्छति ॥२०॥

अत्र प्रसिद्धफलमूलानामलाभेनापि फलानि मूलानि चार्चितानि अर्चितेभ्यो ब्राह्मणेभ्यः ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-मूलर्क्षविहित-फलमूलदानफलप्राप्तिकामो-ऽहमेते फलमूले ददानि। स्वस्तिसावित्रीपाठानन्तरं फलमूले एते वनस्पतिदैवते इति प्रतिग्रहीतारो ब्रू युः। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।२५क-२६क) :—

[1]अथ [2]पूर्वास्वाषाढासु दधिपात्राण्युपोषितः।
कुलवृत्तोपसम्पन्ने ब्राह्मणे वेदपारगे।
पुरुषो जायते प्रेत्य कुले स बहुगोकुले ॥२१॥

× × परदिने महाभारतोक्त-दधिपात्रदानकर्माहं करिष्ये। ततो नियमेन भुक्त्वा अपरदिने उपोष्यापरदिने कुलवृत्तशालिने वेदविदेऽर्चिताय ब्राह्मणायार्चितानि दधिसहितानि पात्राणि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-दधिपात्रदानफलप्राप्तिकामोऽहमेतानि दधिपात्राणि ददानि। स्वस्तिसावित्रीपाठान्ते दधिपात्राण्येतानि विष्णुदैवतानीति प्रति-ग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।२६ख-२७क) :—

उदसक्तुं ससर्पिष्कं प्रभूतमधुफाणितम्।
[3]दत्त्वोत्तरास्वाषाढासु सर्वकामानवाप्नुयात् ॥

उदसक्तो घृतशर्करायुक्ता जलक्लिन्नाः सक्तवः। अर्चिताय ब्राह्मणायार्चितमुदसक्तुं[4] घृतयुतं [5]बहुतरमधुखण्डशालूकीयुक्तञ्च ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अमुकप्राप्तिकामोऽहमेतत् घृतमधुफाणितयुक्तमुदसक्तुं ददानि। स्वस्तिसावित्रीपाठान्ते [6]उदसक्तोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

1 Supplied from M. bh. I. O. omits it.
2 I. O. पूर्वासुषाढासु
3 I. O. दत्तोत्तरासुषाढासु
4 I. O. ०मुदसक्तु
5 I. O. मधुतरमधुखाण्ड०
6 I. O. उदसक्तोऽय

तथा (अनु—६४।२७ख-ग) :—

दुग्धं त्वभिजितो योगे दत्त्वा मधुघृतप्लुतम्[1]।
धर्मनित्यो मनीषिभ्यः स्वर्गलोके महीयते ॥२३॥

उत्तराषाढान्त्यचतुर्भागे श्रवणाद्यनाडिकाचतुष्टयावधिके अभिजितो नक्षत्रस्य योगः। अर्चितेभ्यो विद्वद्ब्राह्मणेभ्योऽर्चितं मधुघृतमिश्रं दुग्धम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-समधुघृतदुग्धदानफलप्राप्तिकामोऽहमेतं मधुघृतयुतं दुग्धं ददानि। स्वस्ति-सावित्रीपाठानन्तरं दुग्धमिदं विष्णुदैवतमिति प्रतिग्रहीतारो ब्रूयुः। कामस्तुत्यादि पूर्ववत्।

तथा (अनु—६४।२८) :—

श्रवणे कम्बलं दत्त्वा वस्त्रान्तरितमेव च।
श्वेतेन याति यानेन सर्वलोकान् समावृतान् ॥२४॥

वस्त्रान्तरितं वस्त्राच्छादितम्। अर्चिताय ब्राह्मणायार्चितं [वस्त्राच्छादितञ्च कम्बलं][2] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तवस्त्रान्तरित-कम्बलदानफलप्राप्तिकामोऽहमेतं वस्त्रान्तरितं कम्बलं ददानि। स्वस्तिसावित्रीपाठान्ते कम्बलोऽयं बृहस्पतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकमाच्छादनं स्वीकारः।

तथा (अनु—६४।२९) :—

गोप्रयुक्तं धनिष्ठासु यानं दत्त्वा समाहितः।
वस्त्ररश्मिधरं[3] सद्यः[4] प्रेत्य राज्यं समश्नुते ॥२५॥

गोप्रयुक्तमाकर्षकवृषभद्वयसहितं वस्त्ररश्मिधरं वस्त्रमयरज्जुसहितम् अर्चिताय ब्राह्मणा-यार्चितं यथोक्तं रथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-धनिष्ठाविहित-गोप्रयुक्तरथदानफलप्राप्तिकामोऽहमेतं गोप्रयुक्तं वस्त्ररश्मिधरं रथं ददानि। स्वस्तिसावित्री-पाठानन्तरं रथोऽयं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। कशा-ग्रहणं स्वीकारः।

तथा (अनु—६४।३०) :—

गन्धान् शतभिषायोगे दत्त्वा सागुरुचन्दनान्।
प्राप्नोत्यप्सरसां लोकान् प्रेत्य गन्धांश्च शाश्वतान् ॥२६॥

1 I. O. मधुघृतं प्लुतं
2 I. O. reads the b. p. as कम्बलञ्च वस्त्राच्छादितं
3 I. O. वस्त्ररश्मिधरं
4 I. O. सद्य.

गन्धान् कस्तूरिकाम्। अर्चिताय ब्राह्मणायार्चितां[1] यथोक्तद्रव्यसहितां[2] कस्तूरिकाम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-शतभिषाविहित-गन्धदानफलप्राप्ति-कामोऽहमेतान् सागुरुचन्दनान् गन्धान् ददानि। स्वस्तिसावित्रीपाठान्ते गन्धा एते गन्धर्वदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।३१) :—

पूर्वभाद्रपदायोगे राजमाषान् प्रदाय तु।
[3]सर्वभक्ष्यफलोपेतः स वै प्रेत्य सुखी भवेत् ॥२७॥

अर्चिताय ब्राह्मणायार्चितान् राजमाषान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महा-भारतोक्त-राजमाषदानफलप्राप्तिकामोऽहमेतान् राजमाषान् ददानि। स्वस्तिसावित्रीपाठान्ते राजमाषा एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्।

तथा (अनु—६४।३२) :—

औरभ्रमुत्तरायोगे यस्तु मांसं[4] प्रयच्छति।
स पितॄन् प्रीणयति वै प्रेत्य चानन्त्यमश्नुते ॥२८॥

औरभ्रं मेषभवम्। अर्चिताय ब्राह्मणायार्चितं मेषमांसम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्तौरभ्र-मांसदानफलप्राप्तिकामोऽहमेतदौरभ्रं मांसं ददानि। स्वस्ति-सावित्रीपाठान्ते मांसमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।

तथा (अनु—६४।३३) :—

कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति।
स प्रेत्य कामानादाय [5]दाता समुपतिष्ठति ॥२९॥

अर्चिताय ब्राह्मणायार्चितां धेनुम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-रेवतीविहित-धेनुदानफलप्राप्तिकामोऽहमेतां कांस्योपदोहनां धेनुं ददानि। स्वस्तिसावित्री-पाठानन्तरं धेनुरियं रुद्रदैवतेति प्रतिग्रहीतृवाक्यम। कामस्तुल्यादि पूर्ववत्। पुच्छग्रहणं स्वीकारः।

तथा (अनु—६४।३४) :—

रथमश्वसमायुक्तं दत्त्वाश्विन्यां नरोत्तमः।
हस्त्यश्वरथसम्पन्ने वर्चस्वी जायते कुले ॥३०॥

1 I. O. ०श्चिंतायां
2 I. O. ०र्चितायां
3 I. O. सर्व्वभद्य०
4 I. O. माषं
5 I. O. दातारमुपतिष्ठति

अर्चिताय ब्राह्मणायार्चितं रथम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्ताश्वरथदानफलप्राप्तिकामोऽहमेतमश्वयुक्तरथं ददानि। स्वस्तिसावित्रीपाठान्ते रथोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। कशाग्रहणं स्वीकारः।

तथा (अनु—६४।३५) :—

भरणीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै।

[1]गाश्च प्रभूताः प्राप्नोति नरः प्रेत्य यशस्तथा ॥३१॥

द्विजातिभ्य इति जात्याख्यायामेकस्मिन् बहुवचनम्। मत्स्यपुराणोक्तां तिलधेनुमुत्पाद्यार्चितामर्चिताय ब्राह्मणाय धेनुदानावर्तस्थ[2]-मत्स्यपुराणीयतिलधेनुदानविधिना दद्यात्। तत्र कामनायां महाभारतोक्त-भरणीविहित-तिलधेनुदानफलप्राप्तिकामोऽहमिति वाक्ये विशेषः।

विष्णुधर्मोत्तरे (३।३१७।२०-२७क) :—

कृत्तिकासु सुवर्णस्य दानं बहुफलं स्मृतम्।

रक्तवस्त्रस्य रोहिण्यां सौम्यभे लवणस्य च ॥३२॥

सौम्यभे मृगशिरसि।

कृसरस्य तथार्द्रायामादित्ये[3] रजतस्य तु।

घृतस्य तु तथा पुष्ये[4] चन्दनानाञ्च सर्पभे ॥३३॥

आदित्ये पुनर्वस्वोः सर्पभे अश्लेषायाम्। चन्दनानामितिश्वेतचन्दनरक्तचन्दनकुचन्दनानाम्।

तिलानाञ्च मघायोगे प्रियङ्गोर्भगदैवते।

आर्यम्णे चाप्यपूपानां सावित्रे पायसस्य तु ॥३४॥

भगदैवते पूर्वफल्गुन्याम् आर्यम्णे उत्तरफल्गुन्याम् सावित्रे हस्तायाम्।

चित्रायां चित्रवस्त्राणां सक्तूनां वायुदैवते।

ऐन्द्राग्ने[5] चैव लोहानां मैत्रे माल्यफलस्य च ॥३५॥

वायुदैवते स्वात्याम् ऐन्द्राग्ने विशाखायां मैत्रेऽनुराधायाम्।

छत्रस्य[6] च तथा शाके मूले मूलफलस्य च।

हिमस्य मधुयुक्तस्यं दानमाप्ये महाफलम् ॥३६॥

1 I. O. गोश्च
2 I. O. धेनुदानावर्त०
3 I. O. तथार्द्रायादित्ये व
4 I. O. पुष्य
5 I. O. [illegible]
6 I. O. चंद्रस्य

शाक्रे ज्येष्ठायाम् आप्ये पूर्वाषाढायाम् ।

विश्वेश्वरेऽन्नदानस्य श्रवणे वसनस्य च ।
धान्यस्य वासवे[1] विप्रा वारुणे चौषधस्य च ॥३७॥

विश्वेश्वरे उत्तराषाढायां वासवे धनिष्ठायां विप्रा इति सम्बोधनम् । वारुणे शतभिषायाम् ।

आजे पुराणबीजानां शस्यानां तदनन्तरे ।
गोरसानां तथा पौष्णे स्नानानामथ चाश्विने ।

आजे पूर्वभाद्रपदायां पाष्णे रेवत्याम् ।

तिलानाञ्च तथा दानं भरणीषु महाफलम् ॥३८॥

कृत्तिकानक्षत्रे अर्चिताय ब्राह्मणाय सुवर्णमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तकृत्तिकाविहितसुवर्णदानफलप्राप्तिकामोऽहमेतत् सुवर्णं ददानि । स्वस्तिसावित्रीपाठान्ते सुवर्णमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । रोहिण्यां लोहितवस्त्रदाने तु विष्णुधर्मोत्तरोक्त-रोहिणीविहितरक्तवस्त्रदानफलप्राप्तिकामोऽहमेतद्रक्तवस्त्रमिति वाक्ये विशेषः । स्वस्तिसावित्रीपाठान्ते रक्तवस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । दशाग्रहणपूर्वकं परिधानं स्वीकारः । मृगशिरसि लवणदाने तु वाक्ये विष्णुधर्मोत्तरोक्तसौम्यविहितलवणदानफलप्राप्तिकामोऽहमेतल्लवणमिति विशेषः । स्वस्तिसावित्रीपाठान्ते लवणमिदं सोमदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । आर्द्रायां तिलतण्डुलपक्वान्नदाने तु वाक्ये विष्णुधर्मोत्तरोक्तार्द्राविहितकृसरदानफलप्राप्तिकामोऽहमेत कृसरमिति विशेषः । स्वस्तिसावित्रीपाठान्ते कृसरोऽयं प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत । रजतदाने वाक्ये विष्णुधर्मोत्तरोक्तादित्यर्क्षविहित-रजतदानफलप्राप्तिकामोऽहमेतद्रजतमिति विशेषः । स्वस्तिसावित्रीपाठान्ते रजतमिदमग्निदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । पयोघृतदानवाक्ये विष्णुधर्मोत्तरोक्त-पुष्यर्क्षविहितघृतदानफलप्राप्तिकामोऽहमेतद् घृतमिति विशेषः । स्वस्तिसावित्रीपाठान्ते घृतमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । अश्लेषायां चन्दनदाने वाक्ये विष्णुधर्मोत्तरोक्ताश्लेषाविहितचन्दनदानफलप्राप्तिकामोऽहमेतानि चन्दनानीति विशेषः । स्वस्तिसावित्रीपाठान्ते चन्दनान्येतानि गन्धर्वदैवतानीति प्रतिग्रहीतृवाक्यम् । कामस्तुल्यादि पूर्ववत् । मघायां तिलदाने वाक्ये विष्णु-

---

1 I. O. वासरे

धर्मोत्तरोक्त-मघाविहित-तिलदानफलप्राप्तिकामोऽहमेतानि तिलानीति विशेषः। स्वस्ति-सावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। पूर्वफल्गुन्यां प्रियङ्गुदाने वाक्ये विष्णुधर्मोत्तरोक्त-भगदैवतर्क्षविहित-प्रियङ्गुदानफलप्राप्तिकामोऽहमेतां[1] प्रियङ्गुमिति विशेषः। स्वस्तिसावित्रीपाठान्ते प्रियङ्गुरियं[2] प्रजापतिदैवतेति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। उत्तरफल्गुन्या[3]-मपूपदाने वाक्ये विष्णुधर्मोत्तरोक्तार्य्यमर्क्षविहितापूपदानफलप्राप्तिकामोऽहमेतान[4]-पूपानिति विशेषः। स्वस्तिसावित्रीपाठान्ते अपूपा एते प्रजापतिदैवता इति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। हस्तायां पायसदाने तु वाक्ये विष्णुधर्मोत्तरोक्त-हस्ता-नक्षत्रविहित-पायसदानफलप्राप्तिकामोऽहमेतं पायसमिति विशेषः। स्वस्त्यादिस्वीकारान्तं प्रथमदानवत्। चित्रायां नानावर्णवस्त्रदानवाक्ये विष्णुधर्मोत्तरोक्तचित्राविहित-वस्त्रदानफल-प्राप्तिकामोऽहमेतानि चित्रवस्त्राणीति विशेषः। स्वस्तिसावित्रीपाठान्ते वस्त्राणीमानी बृहस्पति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः। स्वात्यां सक्तुदाने वाक्ये विष्णुधर्मोत्तरोक्त-स्वातीनक्षत्रविहित-सक्तुदानफलप्राप्तिकामोऽहमेतान् सक्तूनिति विशेषः। स्वस्तिसावित्रीपाठान्ते सक्तव एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। विशाखायां सुवर्ण-रजत-ताम्र-कांस्य-सीसक-पित्तल-रङ्गकृष्णायसानां दाने तु वाक्ये विष्णुधर्मोत्तरोक्त-विशाखाविहित[5]-लोहदान-फलप्राप्तिकामोऽहमेतानि लोहानीति विशेषः। स्वस्तिसावित्रीपाठान्ते लोहान्येतान्यग्निदैवतानीति प्रतिग्रहीतृवाक्यम्। काम-स्तुत्यादि पूर्ववत्। अनुराधायां फलमाल्यदाने तु वाक्ये [6]विष्णुधर्मोत्तरोक्तानुराधाविहित-फलमाल्यदानफलप्राप्तिकामोऽमेतानि फलमाल्यानीति विशेषः। स्वस्तिसावित्रीपाठान्ते फल-माल्यान्येतानि विष्णुवनस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। ज्येष्ठायां छत्रदानवाक्ये विष्णुधर्मोत्तरोक्त-ज्येष्ठा[7]-विहित-छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रमिति विशेषः। स्वस्तिसावित्रीपाठान्ते छत्रमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। काम-स्तुत्यादि पूर्ववत्। दण्डग्रहणं स्वीकारः। मूले मूलस्य फलस्य च दाने वाक्ये विष्णुधर्मोत्त-रोक्त-मूलर्क्षविहित-फलमूलदानफलप्राप्तिकामोऽहमेतत्फलमूलमिति विशेषः। स्वस्तिसावित्री-पाठान्ते फलमूलमिदं वनस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

1 I. O. ०मेतं
2 I. O. प्रियङ्ग्विदं
3 I. O. उत्तरफल्गुन्यां पूपदाने
4 I. O. ०मेतान् पूपान इति
5 I. O. ०विशाखाविहित
6 I. O. विष्णुधर्मोक्ता०
7 I. O. ०ज्येष्ठा

पूर्वाषाढायां मधुयुक्त-शिशिरजलदाने वाक्ये विष्णुधर्मोत्तरोक्त-पूर्वाषाढाविहित-हिमदानफलप्राप्ति-कामोऽहमेतन्मधुयुक्ततिलमिति विशेषः। स्वस्तिसावित्रीपाठान्ते हिममिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [1]उत्तराषाढायामन्नदाने वाक्ये [2]विष्णुधर्मोत्तरोक्तोत्तराषाढा-विहितान्नदानफलप्राप्तिकामोऽहमेतदन्नमिति विशेषः। स्वस्तिसावित्रीपाठान्तेऽन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। श्रवणे वस्त्रदान-वाक्ये विष्णुधर्मोत्तरोक्त श्रवणाविहितवस्त्रदानफलप्राप्तिकामोऽहमेतद्वसनमिति विशेषः। स्वस्ति-सावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं परिधानं स्वीकारः। धनिष्ठायां [3]धान्यदाने वाक्ये विष्णुधर्मोत्तरोक्त-धनिष्ठा-विहित-धान्यदानफलप्राप्तिकामोऽहमेतद्धान्यमिति विशेषः। स्वस्तिसावित्रीपाठान्ते धान्य-मिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। शतभिषायां वनपाचितगुग्गुलु-पाचिततैलानामौषधानामन्यतमस्य दाने वाक्ये विष्णुधर्मोत्तरोक्त-शतभिषाविहितौषध-दानफलप्राप्तिकामोऽहमेतदौषधमिति विशेषः। स्वस्तिसावित्रीपाठान्ते औषधमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। पूर्वभाद्रपदायान्धा-न्यादीनामन्यतमस्य चिरन्तनशस्यस्य दाने वाक्ये विष्णुधर्मोत्तरोक्त-पुराण बीजदानफलप्राप्ति-कामोऽहमेतानि पुराणबीजानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं बीजान्येतानि प्रजापति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। उत्तर-भाद्रपदायां यथालाभं शस्यत्रयदानवाक्ये विष्णुधर्मोत्तरोक्तोत्तरभाद्रपदाविहित-शस्यदानफल-प्राप्तिकामोऽहमेतानि शस्यानीति विशेषः। स्वस्तिसावित्रीपाठान्ते शस्यान्येतानि प्रजापति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। रेवत्यां दुग्धदधितक्रघृतादीनां दानवाक्ये विष्णुधर्मोत्तरोक्तरेवतीविहित-गोरसदानफलप्राप्तिकामोऽहमेतं[4] गोरसमिति विशेषः। स्वस्तिसावित्रीपाठान्ते गोरसा एते विष्णुदैवता इति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। अश्विन्यां स्नानीयसुगन्धामलकादिदानवाक्ये विष्णु-धर्मोत्तरोक्ताश्विनीविहित][5]-स्नानदानफलप्राप्तिकामोऽहमेतत् स्नानमिति विशेषः। स्वस्ति-सावित्रीपाठान्ते स्नानमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। भरण्यां तिलदानवाक्ये विष्णुधर्मोत्तरोक्त-भरणीविहित-तिलदानफलप्राप्तिकामोऽहमेतांस्तिला-

1 I. O. उत्तराषाढामन्नदाने
2 I. O. विष्णुधर्मोत्तरोक्त उत्तराषढा
3 I. O. धानद्दाने
4 I. O. ०मेतां
5 A omits the portion bracketed from p. 633 above up to here

निति विशेषः[1]। स्वस्तिसावित्रीपाठान्ते तिला एते प्रजापतिदैवता इति [2]प्रतिग्रहीतृवाक्यम्। [3][कामस्तुत्यादि पूर्ववत्।] [4]मुष्टिग्रहणं स्वीकारः।

तथा :—

[5]श्रवणे दीपकं दत्त्वा नदीद्वितयसङ्गमे।
[6][तेजस्वी च यशस्वी च रूपवानभिजायते ॥३६॥

श्रवणानक्षत्रयुक्तदिने नदीद्वितयसङ्गमे] दीपदानं[7] गृहीतजलपूर्णताम्रपात्र उदङ्मुखः सङ्कल्पयेत्। ॐ विष्णुधर्मोत्तरोक्त-[8]श्रवणर्क्षविहित-दीपदानफलप्राप्तिकामोऽहं नदीद्वयसङ्गमे दीपं दास्ये इति [9]सङ्कल्प्य दद्यात्।

तथा (३।३०६।६८) :—

मासे मासे तु रेवत्यां ब्राह्मणान् घृतपायसम्।
सदक्षिणं भोजयित्वा रूपमाप्नोत्यनुत्तमम् ॥४०॥

यथेच्छं प्रतिमासं रेवत्यां ब्राह्मणेभ्योऽर्चितेभ्या [10]घृतसहितं पायसमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अनुत्तमरूपप्राप्तिकामोऽहमेतं घृतपायसं ददानि। [11]स्वस्तिसावित्रो-पाठानन्तरं घृतपायसोऽयं [12]प्रजापतिदैवत इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेव-विरचिते
श्रीदानसागरे नक्षत्रदानावर्तः।

1 I. O. शेष:
2 I. O. प्रतिग्रहीतृवाच्यं
3 A reads the b. p twice
4 A मुष्टिग्रहण
5 A श्रावणे
6 A omits the b. p.
7 A गृहीतजलदापूर्णपात्र
8 A श्रवणाख्य०
9 A सङ्कल्पं
10 A घृतसहित०
11 A ०पाठान्ते
12 A प्रजपति०

[अथ नानादैवत-मासव्यापिदानावर्तः ।][1] (६७)

विष्णुः :—

आश्विनं सकलं मासं ब्राह्मणेभ्यः प्रत्यहं घृतं[2] प्रदायाश्विनौ प्रीणयित्वा रूपभाग् भवति ।१॥

[3]अथ [4]सौराश्विनशुक्लप्रतिपदि प्रातर्यजमानोऽर्चितेभ्यो यथेष्टसंख्यब्राह्मणेभ्यो घृतमर्चितं[5] दद्यात्[6] । ॐ[7] अद्यामुकामुकसगोत्रेभ्योऽमुकामुकवेदामुकामुक[8]-शाखाध्यायिभ्योऽमुकामुकदेव[9]-शर्मभ्यो युष्मभ्यं विष्णूक्त-मासावच्छिन्न-घृतदानफलप्राप्तिकामोऽहमेतद्[10] घृतं ददानि । [11]अश्विनौ प्रीयेताम् । [12]प्रतिग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा घृतमिदं विष्णुदैवत-मित्युक्त्वा यथाशाखं कामस्तुतिं[13] पठेयुः । ततः [ॐ अद्य][14] कृतैतद्दानप्रतिष्ठार्थं [15][युष्मभ्यं दक्षिणामेतत्] काञ्चनं ददानि । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा घृतं स्पृशेयुः[16] । [17]एव-मागाम्यमावास्यां यावत् प्रत्यहं दद्यात् ।

तथा :—

तस्मिन्नेव मासि प्रत्यहं गोरसैर्ब्राह्मणान् भोजयित्वा आरोग्यभाग् भवति ॥२॥

तस्मिन्नेवाश्विन[18] इत्यर्थः । सौराश्विनकृष्ण[19]-प्रतिपद्यर्चितेभ्यो यथेष्टसंख्य[20]-ब्राह्मणेभ्यो दुग्धदधितक्रघृतानामन्यतममर्चितम् ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा दद्यात् । आरोग्य-प्राप्तिकामोऽहमेतान् [21]गोरसान् ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । [22]एवमागाम्य-मावास्यां यावत् प्रत्यहं दद्यात् ।

1 A omits the bracketed portion
2 I. O. घृत
3 I. O. and A अत्र
4 I. O. सचाश्विन० and A सौव आश्विन०
5 A omits अर्चितम्
6 A omits this
7 A omits this
8 A omits वेदामुकामुक
9 A omits देव
10 I. O. [illegible]
11 A अश्विनौ
12 A प्रीति०
13 A कामस्तुति
14 A omits the bracketed portion
15 I. O. दक्षिणामिदं युष्मभ्यमहमेतत् for the b. p.
16 A स्पृशेत
17 A एवं मागस्य मावस्यां
18 A तस्मिन्न आश्विन
19 A omits कृष्ण
20 I. O. मुख्या for संख्य
21 A adds [illegible] before this
22 A एवमाषढ्यमावास्यां

तथा :—

माघे [1]मास्यग्निं प्रत्यहं तिलैर्हुत्वा [2]सघृतं कुन्माषं [3]ब्राह्मणान् भोजयित्वा दीप्ताग्नि-र्भवति ॥३॥

कुन्माषो [4]राजमाष इति प्रसिद्धः। सौर-[माघशुक्लप्रतिपद्यग्नौ][5] ॐ प्रजापतये स्वाहेति मन्त्रेण तिलान् [6]यथाशक्ति हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा यथेष्टसंख्य-ब्राह्मणेभ्योऽर्चितं सघृतं[7] कुन्माषम् ॐ अद्यादि [8]युष्मभ्यमन्तमुक्त्वा दद्यात्। [9]दीप्ताग्नित्व-प्राप्तिकामोऽहमेतं[10] सघृतं कुन्माषं ददानि। [11]स्वस्तिसावित्रीपाठान्ते कुन्माषोऽयं प्रजापतिदैवत[12] इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं[13] स्वीकारः। [14][एवमागाम्यमावास्यावधि] प्रत्यहं होमं कृत्वा सघृतं कुन्माषं दद्यात्।

भविष्यपुराणे :—

दिने दिने [15]जपन्नाम भास्करस्य महात्मनः।
ददाति कार्त्तिके यस्तु [16]तस्यायतनदीपकम् ॥४॥
जातिस्मरत्वं[17] प्रजाश्च प्राकाश्यं सर्वजन्तुषु।
अव्याहतेन्द्रियत्वञ्च स प्राप्नोति न संशयः ॥५॥

सौरकार्त्तिक-शुक्लप्रतिपदि गृहीतजलपूर्णताम्रपात्र उदङ्मुखः सूर्यायतनदीपं [18][सङ्कल्प्य आगाम्यमावास्यां] [19]यावद्दद्यात्। ॐ भविष्यपुराणोक्त-कार्त्तिकव्यापि-दीपदानफलप्राप्तिकामो-ऽहं [सूर्यायतने दीपं दास्ये][20]। ततो यथाशक्ति भास्कराय नम इति जपित्वा[21] प्रज्वाल्य दद्यात्। [22]एवमपरदिनेष्वपि [23]सङ्कल्पव्यतिरेकेण दीपदानम्।

1 A मासि
2 A घृतं, I. O. omits it
3 A ब्राह्मणं
4 I. O. राजमास and A स्वल्पमास
5 A माघप्रतिपदौ for the b. p.
6 I. O. यथाशक्तिर्हुत्वा
7 I. O. घृतं
8 I. O. युष्मभ्यमन्तमुक्त्वा
9 A दीप्ताग्निं for दीप्ताग्नित्व
10 A °मेतत्
11 I. O. adds स्वस्त्यादि पूर्ववत् before this
12 A प्रजापतिदैव
13 A मुष्टिग्रहणम्
14 A एवमागम्यामावास्यां यावत् दधि-दान for the bracketed portion
15 A जपन्मन्त्रं, I. O. जयन्नाम
16 A तथायातनदीपकं, I. O. भगा-यतनदीपकं
17 A इतिमन्त्रञ्च
18 A संकल्प्यागामावास्यां for the bracketed portion
19 A यावत् कुर्यात्
20 A सूर्यायतनदीपं दानस्य for the bracketed portion
21 I. O. पूजयित्वा
22 A एवमपरदिनेषु
23 A सङ्कल्पाव्यतिरेकेन

विष्णुधर्मोत्तरे :—

अश्वयुज्यामतीतायां यावद्राजेन्द्र [1][कार्त्तिकी ।
तावद्दीपप्रदस्योक्तं फलं राजेन्द्र[2]] शाश्वतम् ॥६॥
तावत्कालं प्रयच्छन्ति ये तु दीपं [3]सदा निशि ।
तुङ्गे देशे बहिस्तेषां[4] [महत्पुण्यफलं भवेत्][5] ॥७॥
अप्यन्धकारे गहने [प्राकाश्यं तेन][6] जायते ।
[7]प्राकाश्याद् यदुशार्दूल तेन यान्ति हि[8] तत् सुखम् ॥८॥

कृष्णप्रतिपदादिपौर्णमास्यन्त-[9]कार्त्तिके दीपदानम् । बहिरुच्च[10]-दीपस्थानं निर्माय [तत्र निशि][11] दीपं दातुं कृष्णप्रतिपदि[12] पूर्ववत् सङ्कल्पयेत् । [13]ॐ अद्यारभ्य कार्त्तिकपौर्णमासीपर्यन्तं[14] प्रत्यहं विष्णुधर्मोत्तरोक्तकार्त्तिकमासविहित-[15]बहिस्तुङ्गस्थदीपदानफलप्राप्तिकामोऽहं बहिस्तुङ्गस्थाने दीपं दास्ये इति सङ्कल्प्य प्रत्यहं दद्यात् ।

तथाः—

द्विजवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम्[16] ।
अग्निष्टोमफलं तस्य वदन्ति च मनीषिणः ॥९॥

पौर्णमास्यन्तकार्त्तिकोपक्रमदिने पूर्ववद्दीपं सङ्कल्प्य द्विजगृहे मासमेकं दद्यात् । ॐ अग्निष्टोमफलप्राप्तिकामोऽहं मासमेकं द्विजगृहे दीपं दास्ये । अस्य [17]फलभूयस्त्वात् मासव्यापिदानत्वं प्रयुक्तम्[18] ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेव-विरचिते
श्रीदानसागरे [19]मासव्यापिदानावर्तः ।

1 A omits the bracketed portion
2 I. O. राजे
3 A महानिशि
4 I. O. बहिस्तेयां
5 A reads the bracketed portion as महापुण्यं फलं लभेत्
6 A reads the bracketed portion as प्रकाश्यन्ते न
7 I. O. प्राकाश्याद्यदुशार्दूल; A प्राकाश्याद्यदुशार्दूल
8 A omits it
9 A कार्त्तिकदीपदान
10 A बहिस्तुङ्ग॰
11 I. O. तन्निशि for the bracketed portion
12 A कृष्णप्रतिपदादि
13 A omits it
14 A कार्त्तिकपौर्णमासीपर्यन्त
15 A omits बहि
16 A कामदं
17 A भूयिष्ठात्
18 A युक्तं
19 I. O. omits मास

[अथ नानादैवतसंक्रान्तिदानावर्तः][1] । (६९)

विष्णुधर्मोत्तरे (३।३१६।३८-४५) :—

मेषसंक्रमणे [2]भानोर्मेषदानं महाफलम् ।
[3]वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च ॥१॥

गवां वृषाणाम्[4] ।

[5]शयनासनदानञ्च [6]मिथुनोपक्रमे तथा ।

[7]शयनासनदानमिदमेकैकस्योभयोर्वा स्वेच्छया द्वन्द्व[8]-निर्देशस्तूभयोर्महाफलत्वार्थः ।

[9]कर्कप्रवेशे [10]शक्तुञ्च सितया च तथैव च ।
गुडफाणितखण्डानां सितायाश्च तथैव च ॥२॥

[11]सितया [12]शर्करया [13]सहितमित्यर्थः । [फाणितं खण्डशालूकम्][14] ।

लवणाज्यफलानाञ्च तथा [15]हरितकस्य च ।
तथा चैवोदकुम्भानां [दानं ज्ञेयं महाफलम्][16] ॥३॥

[17][हरितकं पत्रशाकम] । [18]कर्कप्रवेशमुपन्यस्य शर्करासहित शक्त्वाद्युद-[19]कुम्भान्तदानश्रुतेः सिंहप्रवेशमुपन्यस्य [20][च देयान्तरश्रुतेः] सशर्कर-[21][शक्त्वाद्युदकुम्भान्तानां] दानं [22]कर्कसंक्रमण एव । एषाञ्च दशानां द्रव्याणां प्रत्येकमेव दानं महाफलम् । [एकस्य दानात्][23] द्वित्र्यादि-दाने[24] समस्तदाने च फलातिशयः । अत्राप्यनेकद्रव्योपादान एवं बोद्धव्यम् ।

---

1 A omits the bracketed portion
2 A भानो मेषदान
3 A वृषभं संक्रमणे
4 A वृषानान
5 A शयनमासनदानच
6 A मिथुनोपगमे
7 A सयनाशनदानानि दानैकस्योभयोर्वा
8 I. O. omits द्वन्द्व
9 A कर्किप्रवेशे
10 A शक्तच, I. O. omits it
11 I. O सिताया
12 A शर्करयाय
13 I. O. साहितानामित्यर्थः
14 A फणितं खण्डवस्तूनां for the b. p.
15 A हनितथास्य
16 A ज्ञेयं फलहरीतकं for the b.p.
17 A यथाग्रकं for the b, p.
18 A and I. O. कर्कि०
19 I. O. कुम्भ for कुम्भान्त
20 A देयान्तरश्रुते: for the bracketed portion
21 I. O. सशक्ताद्युदकुम्भादीनां for the b. p
22 A कर्किसंक्रम
23 A reads एकस्य दानानात् for and I. O. omits the bracketed portion
24 I. O. द्वित्यादिदाने, A omits it

सिंहप्रवेशे पात्राणां तैजसानां तथैव च ।

कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च ॥४॥

सुरभीणां धूपितानाम् ।

तुलाप्रवेशे धान्यानां बीजानामपि [1]चोत्तमम् ।

[2]उत्तमदानमिति सम्बन्धः । बीजानां धान्येतरशस्यानाम् । बीजग्रहणेनैव धान्यग्रहणसिद्धेः पृथग्धान्यग्रहणं फलातिरेकार्थम् ।

कीटप्रवेशे [3]शस्त्राणां [4]वेश्मनां दानमेव च ॥५॥

[5]धनुःप्रवेशे वस्त्राणां यानानाञ्च महाफलम् ।

मृगप्रवेशे दारूणां दानमग्नेस्तथैव च ॥६॥

[6]अग्नेर्दानं दारुण्युपादाय स्वयं [7]ज्वालयित्वा शीतापनोदार्थं, [दारूणा अग्निसमिन्धनाय च][8] दारूणाम् ।

कुम्भप्रवेशे दानन्तु गवामर्थे तृणस्य तु ।

मीनप्रवेशे [स्नानानां माल्यानामपि चोत्तमम्][9] ॥७॥

स्नानानां [10]स्नानीयसुगन्धामलकादीनाम् ।

[11]दानान्यथैतानि मया द्विजेन्द्राः प्रोक्तानि काले [12][तु नरश्च] दत्त्वा ।

प्राप्नोति कामान् [13]मनसस्त्वभीष्टांस्तस्मात् प्रशंसन्ति हि कालदानम् ॥८॥

[अत्र मेषे][14] रवेः संक्रमणे यजमानोऽर्चिताय ब्राह्मणायार्चितं मेषं दद्यात् । ॐ अद्यामुकसगोत्रायामुक-[15]वेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णुधर्मोत्तरोक्त-मेष-संक्रमणविहित-मेषदानफलप्राप्तिकामोऽहमेतं[16] मेषं ददानि । [17]प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा मेषोऽयं वरुणदैवत इत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् । तत ॐ अद्य

1 A चोत्तमां
2 A दानमिति
3 I. O. and V. D. वस्त्राणां
4 I. O. वेश्मानां, A वेश्मानां
5 I. O. and V. D. धन्विप्रवेशे, A धनुप्रवेशे
6 A अग्नेर्दानं
7 A ज्वालयि
8 I. O. दारूणामग्निसमिन्धनाय and A दारूणामग्निसमिन्धनाय for the bracketed portion
9 I. O. omits the bracketed portion
10 I. O. स्नानाय गन्धामलकादीनां
11 I. O. दानान्यथैतानि
12 A नरश्च for the b. p.
13 A सकलानभिष्टान
14 I. O. अनुमेषे for the bracketed portion
15 A omits वेदामुक
16 A omits एतं
17 I. O. प्रतिगृहीत

कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामिदं काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा [1][मेषं पुच्छे गृह्णीयात्]।

तथा वृषसंक्रमणे[2] वृषदानवाक्ये विष्णुधर्मोत्तरोक्त-वृषसंक्रमणविहितगोदानफलप्राप्तिकामोऽहमेतान् वृषानिति विशेषः। स्वस्तिसावित्रीपाठान्ते[3] वृषा एते विष्णुदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

तथा मिथुनसंक्रमणे शयनदानवाक्ये विष्णुधर्मोत्तरोक्त-मिथुनसंक्रमणविहित-शयनदानफलप्राप्तिकामोऽहमेतच्छयनमिति विशेषः। स्वस्तिसावित्रीपाठान्ते[4] शयनमिदं [5]प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [स्पर्शः स्वीकारः][6]। एवमासनदानवाक्ये [7]शयनपदस्थाने आसनपदनिवेशो विशेषः।

तथा कर्कटसंक्रमणे शर्करासहितशक्तुदानवाक्ये विष्णुधर्मोत्तरोक्तसितासहितशक्तुदानफलप्राप्तिकामोऽहमेतान् सितासहितान् [8][शक्तूनिति विशेषः]। स्वस्तिसावित्रीपाठानन्तरं शक्तव एते [9]प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [10]स्पर्शः स्वीकारः। एवं गुड-खण्डशालूक-खण्ड[11]-शर्करालवणघृतफलहरितकोदकुम्भानां प्रत्येकं दानवाक्ये[12] सितासहितान् शक्तूनिति[13]पदस्थाने एषामन्यतमस्य[14] [15]कर्कसंक्रमणविलिखितपदस्य च निवेशो विशेषः। एष सोमदैवतो गुडः [16]एतत् सोमदैवतं फाणितम् एष सोमदैवतः खण्डः [एषा सोमदैवता सिता][17] एतत् सोमदैवतं लवणम् एतद्विष्णुदैवतमाज्यम् एतद्वनस्पतिदैवतं फलम् एतद्वनस्पतिदैवतं हरितकम् एष वरुणदैवत उदकुम्भ इति स्वस्तिसावित्रीपाठानन्तरं[18] प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [सर्वेषां स्पर्शः स्वीकारः।][19]

1 I. O. मेषं for the b. p.
2 A वृषसंक्रमे
3 A स्वस्तिसावित्रीपाठानन्तरं
4 A स्वस्तिसावित्रीपाठानन्तरं
5 A विष्णुदैवतामिति
6 A सुप्तस्नीकामः for the bracketed portion
7 A शयनस्थाने
8 A शक्तुं दास्ये for the bracketed portion
9 A प्रजापतिदैवत
10 A स्पर्श
11 I. O. omits शाल खण्ड
12 I. O. दाने वाक्यं, A दानवाक्येषु
13 A omits इति
14 A एषामन्यतमपदस्य
15 I. O. and A कर्कि०
16 A एते
17 A omits the bracketed portion
18 A स्वस्तिसावित्रीपाठान्ते
19 A omits the bracketed portion

[1]सिंहसंक्रमणे यथाशक्ति सौवर्णादिपात्राणामन्यतमस्य[2] दानवाक्ये विष्णुधर्मोत्तरोक्त-सिंहसंक्रमण[3]-विहित-तैजसपात्रदानफलप्राप्तिकामोऽहमेतत्तैजसपात्रमिति विशेषः। स्वस्ति-सावित्रीपाठानन्तरं पात्रमिदं विष्णुदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। स्पर्शः स्वीकारः।

कन्यासंक्रमणे धूपितवस्त्र[4]-दानवाक्ये विष्णुधर्मोत्तरोक्त-कन्यासंक्रमणविहित वस्त्रदानफल-प्राप्तिकामोऽहमेतानि वस्त्राणीति[5] विशेषः। स्वस्तिसावित्रीपाठानन्तरं वस्त्राणीमानि बृहस्पतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। [दशाग्रहणपूर्वकं परि-धानं][6] स्वीकारः।

तुलासंक्रमणे [7][धान्यदानवाक्ये विष्णुधर्मोत्तरोक्त-तुलासंक्रमणविहित-धान्यदानफलप्राप्ति-कामोऽहमेतानि धान्यानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं धान्यानीमानि प्रजापति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। एवं बीजदानवाक्ये]धान्यपदस्थाने बीजपद-[8][निवेशो विशेषः]।

वृश्चिकसंक्रमणे [9]खड्गादीनामन्यतमशस्त्रत्रयस्य दानवाक्ये विष्णुधर्मोत्तरोक्त-वृश्चिक-संक्रमणविहित-शस्त्रदानफलप्राप्तिकामोऽहमेतानि शस्त्राणीति विशेषः। स्वस्तिसावित्री-पाठानन्तरं शस्त्राणीमानि शक्रदैवतानीति [विष्णुदैवतानीति वा][10] प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। [ग्रहणं स्वीकारः। एवं गृहत्रयदानवाक्ये शस्त्रपदस्थाने गृहपद-निवेशो विशेषः। स्वस्तिसावित्रीपाठानन्तरं गृहाणीमानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्।][11]प्रवेशः स्वीकारः।

धनुःसंक्रमणे [12]वस्त्रत्रयदानवाक्ये विष्णुधर्मोत्तरोक्त धनुःसंक्रमणविहित वस्त्रदानफलप्राप्ति-कामोऽहमेतानि[13] वस्त्राणीति विशेषः। [14]स्वस्तिसावित्रीपाठानन्तरं [15]वस्त्राण्येतानि बृहस्पति-

---

1 A सिंह॰
2 I. O. सो...,स्या
3 I. O. and A सिंहक्रमण
4 I. O. omits वस्त्र
5 A इति
6 A दशग्रहणञ्च for the bracketed portion
7 A omits the bracketed portion
8 A निवेश: for the bracketed portion
9 A खड्गादीना॰
10 I. O. omits the bracketed portion
11 A omits the bracketed portion
12 A वस्त्रय for वस्त्रत्रय
13 A omits मेतानि
14 A omits this
15 A वस्त्राणीमानि

दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [1][दशाग्रहणपूर्वकं परिधानं] स्वीकारः। दोलाचतुर्दोलनौकादीनामन्यतम[2]-यानवयस्य दानवाक्ये वस्त्रपदस्थाने यानपद-निवेशो विशेषः। स्वस्तिसावित्रीपाठानन्तरं यानान्येतानि[3] विष्णुदैवतानीति प्रतिग्रहीतृ-वाक्यम्। कामस्तुत्यादि पूर्ववत्। [4][आरोहणादि स्वीकारः।

मकरसंक्रमणे इन्धनदानवाक्ये मकरसंक्रमणविहितेन्धनदानफलप्राप्तिकामोऽहमेतानीन्धना-नीति विशेषः। स्वस्तिसावित्रीपाठानन्तरमिन्धनान्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।] स्पर्शः स्वीकारः। [5][अग्निदानन्तु शीतार्त्तत्राणायानुष्ठानमात्रम्।]

कुम्भसंक्रमणे गोग्रासदानम्। [6]ॐ विष्णुधर्मोत्तरोक्त-कुम्भसंक्रमणविहित-गोग्रासदान-फलप्राप्तिकामोऽहं गोभ्य-[स्तृणं दास्य][7] इति सङ्कल्प्य तद्दिने यथालाभं गोभ्यो ग्रासं[8] दद्यात्।

[9][मीनसंक्रमणे स्नानीयदानवाक्ये विष्णुधर्मोत्तरोक्त]-मीनसंक्रमणविहित स्नानदानफलप्राप्ति-कामोऽहमेतानि स्नानानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं स्नानान्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। स्पर्शः स्वीकारः।

[10]तथा :—

उत्तरे[तु गते][11] प्रोक्तं वस्त्रदानं महाफलम्। (३।३१७।४क)
तिलदानं तथा विप्रा दक्षिणोपगते[12] रवौ ॥६॥

विप्रा इति सम्बोधनम्। उत्तरायणेऽर्चिताय ब्राह्मणाय वस्त्रमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्तोत्तरायणविहित-वस्त्रदानफलप्राप्तिकामोऽहमेतद्वस्त्रं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वस्त्रमिदं बृहस्पतिदैवतमिति वदेत्[13]। पूर्ववत् कामस्तुत्यादि[14] दक्षिणा[15] च। [16]दशाग्रहणपूर्वकं परिधानं स्वीकारः। दक्षिणायने [तिलदान-वाक्ये विष्णुधर्मोत्तरोक्त-दक्षिणायनविहिततिलदान][17]-फलप्राप्तिकामोऽहमेतांस्तिलानिति विशेषः।

---

1 A दशग्रहणपूर्व्वकं for the bracketed portion
2 I. O. ०तमन
3 A एतानि
4 A omits the bracketed portion
5 A omits the bracketed portion
6 A omits it
7 A स्तृणं दास्य for the bracketed portion
8 A ग्रासं
9 A omits the bracketed portion
10 I. O. omits तथा
11 I. O. त्वपरे for the bracketed portion
12 I. O. दक्षिणायनगे
13 I. O. पदेत्
14 I. O. कामस्तुति
15 I. O. दक्षिणे, A reads दक्षिणां
16 A [illegible]
17 A [illegible] for the bracketed portion

स्वस्तिसावित्रीपाठानन्तरं तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुल्यादि पूर्ववत्। [1]मुष्टिग्रहणं स्वीकारः।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्वल्लालसेनदेवविरचिते
श्रीदानसागरे संक्रान्ति-दानावर्त्तः।

A स्वस्तिग्रहणं

[अथ नानादेवत-ऋतुदानावर्तः।(६९)][1]

[2]सम्वर्तः :—

इन्धनानि [3]तु यो दद्याद्विप्रेभ्यः शिशिरागमे ।
स सुखी दीप्तकायाग्निः सुभगश्चैव जायते ॥१॥

अत्र [4]शिशिरर्तूपक्रमदिने [5]यजमानो यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्योऽर्चितानीन्धनानि दद्यात् । [6][ॐ अद्यामुक]-सगोत्रेभ्यो[7][मुकवेदामुक]-शाखाध्यायिभ्यो[8]मुकदेवशर्मभ्यो युष्मभ्यं सम्वर्तोक्तेन्धनदानफलप्राप्तिकामोऽहमेतानीन्धनानि ददानि । प्रतिग्रहीतारः स्वस्ति-सावित्रीं[9] पठित्वा इन्धनानीमानि विष्णुदैवतानीत्युक्त्वा [10][यथाशाखं कामस्तुतिं पठेयुः]। [11]तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणामेतत् काञ्चनं ददानि । प्रति-ग्रहीतारः स्वस्तीत्युक्त्वा इन्धनानि स्पृशेयुः ।

[12]स्कन्दपुराणे :—

काष्ठानि यः प्रयच्छेत हेमन्ते नरसत्तमः ।
ब्राह्मणेभ्यः सदा देवि सोऽग्निलोकं समश्नुते ॥२॥

[13]हेमन्तोपक्रमदिने [14]प्रातर्गृहीतोदपूर्णताम्रपात्र उदङ्मुखः काष्ठदानं सङ्कल्पयेत् । [15]ॐ अद्यारभ्य हेमन्तसमाप्तिपर्यन्तं [16]यथासम्भवगोत्रनामभ्यो ब्राह्मणेभ्योऽग्निलोकप्राप्ति-कामोऽहं प्रत्यहं काष्ठानि दास्ये । ततः प्रभृति हेमन्तसमाप्त्यवधि[17] [प्रतिदिनं ब्राह्मण-गृहेषु][18] यथालाभं काष्ठानि दद्यात् । सदेति पदश्रवणात् ऋतुव्यापित्वमस्य ।

1 I. O. omits the bracketed portion
2 A omits this
3 A च
4 A शिशिरसूर्यक्रमदिने
5 A यजमाने
6 A अद्यामुकामुक for the bracketed portion
7 A मुकाकामुक for the b. p.
8 A मुकामुक for मुक
9 A पवित्रीं after सावित्रीं
10 A यथाशाखं कामस्तुति for the bracketed portion
11 A omits this
12 A स्कन्धपुराणे
13 A हेमन्तोक्रमदिने
14 A गृहीतोपूर्णताम्रपात्र, I. O. omits ताम्र
15 A omits it
16. I. O. यथासम्भव०
17 I. O. हेमन्तसमाप्त, A हेमन्त-समाप्य
18 I. O. देवब्राह्मणगृहेषु for the bracketed portion

आग्नेयपुराणे :—

हेमन्ते शिशिरे चैव पुण्याग्निं यः प्रयच्छति ।

सर्वलोकप्रतापार्थं स पुण्यां गतिमाप्नुयात् ॥३॥

[1]पुण्याग्निं चाण्डालादिगृहाग्निव्यतिरिक्तम् । हेमन्तोपक्रमदिने [2]नानासत्त्वशीताप-नोदाय सेन्धनमग्निं[3] प्रातः सायञ्च यथेच्छं पूर्ववत् [4]सङ्कल्प्य [5]शिशिरर्तुसमाप्तिं यावत् प्रत्यहं दद्यात् । ॐ अद्यादि 'शिशिरर्तुसमाप्तिपर्यन्तं' सर्वलोकप्रतापार्थं पुण्यगतिप्राप्ति-कामोऽहं पुण्याग्निं दास्ये ।

भविष्यपुराणे (१।६३।७३) :—

[7][शीते काष्ठेन्धनं] दद्यान्नराणां शीतनाशनम् ।

भानोरायतने देव अश्वमेधफलं लभेत् ॥४॥

शीतकालोपक्रमदिने पूर्ववत् नराणां प्रतापनार्थं [8]दारून् सङ्कल्प्य सूर्यायतने दद्यात् । ॐ अश्वमेधफलप्राप्तिकामोऽहम् अद्यादि यावच्छीतकालं[9] सूर्यायतने [10]नरप्रतापनार्थं [11][दारून् दास्ये] ।

नरसिंहपुराणे :—

शीतकाले महावह्निं प्रज्वालयति यो नरः ।

सर्वसत्त्वहितार्थाय स्वर्गञ्चाप्सरसं लभेत् ॥५॥

एतदप्यनुष्ठानमात्रम् । अतएव धार्मिकाः [12]स्नानघाटे शीतसमये [13]काष्ठकूटेषु अग्नि-मनुदिनं प्रज्वालयति ।

महाभारते (अनु—१२५।८०ख and ८१ख) :—

वर्षासु दीपदानेन [14]विष्णुलोकमवाप्नुयात् ।

[15][तमोरूपं न तस्यास्ति दीपकं यः प्रयच्छति] ॥६॥

1 I. O. and A पुण्याग्नि

2 A नराणां शीतनाशाय शीतकाले देयं

3 I. O. सुप्रज्वलमग्निं

4 A omits it

5 A शिशिरसमाप्तिं

6 A शिशिरसमाप्तिपर्यन्तं

7 A शीतकालेन्धनं and Bh. p. शीतकाले घनं for the bracketed portion

8 A दारूणि

9 A ०काल

10 A नराणां for नर

11 A दारूणि दद्यात् for the bracketed portion

12 I. O. स्नानप्रान्ते

13 A काष्ठकूटे

14 A शिववर्ल्लोभते नरः

15 I. O. तथारूपं न तस्यास्तिरूपः प्रयच्छति for the bracketed portion

वर्षासु श्रावणभाद्रपदयोरित्यर्थः। सौरश्रावणप्रतिपदमारभ्य भाद्रपदसमाप्तिपर्य्यन्तं मासद्वयं शुचिस्थाने दीपं पूर्ववत् सङ्कल्प्य दद्यात्। [1][ॐ अद्यादि] [2]भाद्रपदसमाप्तिपर्य्यन्तम् अमुकसगोत्रायामुकदेवशर्मणे[3] दीपदानफलप्राप्तिकामोऽहं दीपं दास्ये। [4][फलभूयस्त्वेन ऋतुव्यापित्वमस्य।]

[5][विष्णुधर्मोत्तरे :—

इन्धनानां] प्रदानेन [6]शिशिरे स्यान्महाफलम्।
स्नानानुलेपनादीनां वसन्ते द्विजसत्तमाः ॥७॥ (३।३१७।४ख)

द्विजसत्तमा इति सम्बोधनम्। आदिशब्देन माल्यग्रहणम्।

[7][पानकानां तथा] ग्रीष्मे कट्वनां [8]तदनन्तरे।
शरद्यन्नस्य [9]धर्मज्ञा वस्त्राणामपि [10]हैमने ॥८॥ (३।३१७।५)

तदनन्तरे प्रावृषि। [11]धर्मज्ञा इति सम्बोधनम्। माघफाल्गुनयोरन्यतरस्य [12]यथेष्टदिनेऽर्चिताय [13]ब्राह्मणायार्चितानीन्धनानि दद्यात्। ॐ [14]अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिनेऽमुकदेवशर्मणे तुभ्यं विष्णुधर्मोत्तरोक्त-[15]शिशिरर्त्तुविहितेन्धनदानफलप्राप्तिकामोऽहमेतानीन्धनानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। तथा चैत्रवैशाखयोरन्यतरस्य यथेष्टदिने सुगन्धितैलामलकानुलेपनमाल्यानां दानवाक्ये विष्णुधर्मोत्तरोक्त-[16][वसन्तर्त्तुविहित-स्नानानुलेपनमाल्यानीति विशेषः]। [17]स्वस्तिसावित्रीपाठानन्तरं स्नानानुलेपनादीन्येतानि विष्णुदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [18]तथा ज्यैष्ठाषाढ-

---

1 I. O. omits the bracketed portion
2 A omits it
3 I. O. omits it
4 A omits the bracketed portion
5 A reads the bracketed portion as विष्णुधर्मोत्तरोक्त इन्धनानि
6 A and I. O. शिशिर
7 A पानकानान्तथा for the bracketed portion
8 A तदनन्तर
9 A धर्मज्ञ
10 A हेमने
11 A धर्मज्ञ
12 A यथेष्टदिने
13 A ब्राह्मणायार्चितायार्चितमीन्धानं
14 A अद्यादितुभ्य अमुकगोत्रायामुकशाखाध्यायिने अमुकदेवशर्मणे
15 A शिशिरविहित इन्धन०
16 A वसन्तविहितस्नानानुलेपनादिदानफलप्राप्तिकामोऽहमेतानि स्नानानुलेपनादीनि दास्ये for the b. p.
17 A omits it
18 A omits it

योरन्यतरस्य यथेष्टदिने पानकानां दानवाक्ये विष्णुधर्मोत्तरोक्त-ग्रीष्मर्तु-विहित-पानकदानफल प्राप्तिकामोऽहमेतानि पानकानीति विशेषः। स्वस्तिसावित्रीपाठान्ते पानकान्येतानि विष्णु-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। तथा श्रावणभाद्रयोरन्यतरस्य यथेष्टदिने कटुद्रव्यदानवाक्ये विष्णुधर्मोत्तरोक्त-कटुदानफलप्राप्तिकामोऽहमेतानि [1]कटूनीति विशेषः। स्वस्तिसावित्रीपाठान्ते कटून्येतानि सोमदैवतानीति प्रतिग्रहीतृवाक्यम्। काम-स्तुत्यादि पूर्ववत्। तथाश्विनकार्त्तिकयोरन्यतरस्य यथेष्टदिने अन्नदानवाक्ये [2]विष्णुधर्मो-त्तरोक्तशरदृतु-विहितान्नदानफलप्राप्तिकामोऽहमेतदन्नमिति विशेषः। स्वस्तिसावित्रीपाठान्ते अन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। तथा मार्ग-पौषयोरन्यतरस्याभिमतदिने[3] वस्त्रद्वयदानवाक्ये[4] विष्णुधर्मोत्तरोक्त-हेमन्तर्तु-विहितवस्त्रदानफल-प्राप्तिकामोऽहमेतानि वस्त्राणीति विशेषः। स्वस्तिसावित्रीपाठान्ते वस्त्राणीमानि बृहस्पति-दैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। दशाग्रहणपूर्वकं[5] परिधानं स्वीकारः।

तथा—(३।३१७।९-१०) :—

बहिः स्नानं नरः कृत्वा सूर्यस्योदयनं प्रति।
शिशिरे सततं[6] वह्निं तर्पयित्वा तथा तिलैः ॥९॥
कुन्माषं सघृतं दत्त्वा यथाशक्त्या द्विजातिषु[7]।
[कायाग्निदीप्तिं प्राकाश्यं][8] शत्रुनाशञ्च विन्दति ॥१०॥

[9]शिशिरर्तुप्रक्रमदिने उदितमात्रे सूर्ये ग्रामाद्बहिर्जलाशये स्नात्वाग्नौ ॐ प्रजापतये स्वाहेति तिलान् हुत्वा शूद्रो ब्राह्मणद्वारा होमं कारयित्वा घृतसहितान् राजमाषानर्चितान् ब्राह्मणेभ्योऽर्चितेभ्यः [ॐ अद्यादि युष्मभ्यमन्तमुक्त्वा दद्यात्][10]। विष्णुधर्मोत्तरोक्तसघृत-कुन्माषदानफलप्राप्तिकामोऽहमेतान् [सघृतान् कुन्माषान् ददानि][11]। प्रतिग्रहीतारः स्वस्तिसावित्रीपाठान्ते कुन्माषोऽयं प्रजापतिदैवत इति वदेयुः। पूर्ववत् कामस्तुतिदक्षिणे। मुष्टिग्रहणं स्वीकारः। एवं प्रत्यहं मासद्वयं दद्यात्।

1 A कटूकानीति
2 A विष्णुधर्मो त्तशरदृतु॰
3 A ॰हिमतदिने
4 A वस्त्रयद्दानवाक्ये
5 A ॰पूर्व्वकं
6 A घृत
7 A द्विजादिर्तिषु
8 A कामाग्निदीप्तप्राकाश्यं for the bracketed portion
9 A शिशिरार्कोपक्रमदिने
10 A omits the bracketed portion
11 A कुन्माषान् ददानि for the bracketed portion

तथा :—

शक्तून् सिताखण्डयुतान् त्रपुषीर्वारुकान्वितान्। (३।३१७।८क)

लवणाज्ययुतान् दत्त्वा तथा हरितकान्वितान् ॥११॥

त्रपुषं तिमिष इति प्रसिद्धम्। उर्वारुः कर्कटो हरितकम् पत्रशाकम्।

जलकुम्भोपरिकृतानक्षयं फलमश्नुते।

मध्याह्ने प्रावृषि स्नातः सततं द्विजसत्तमाः ॥१२॥ (३।३१७।८ख-६क)

द्विजसत्तमा इति सम्बोधनम्। वर्षासमयोपक्रमदिने मध्याह्ने स्नात्वार्चिताय ब्राह्मणाय त्रपुष-कर्कटी-लवणघृतपत्रशाकसहितान् जलकुम्भोपरिस्थितान् शर्कराखण्डयुतान् शक्तूनर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-वर्षर्तु विहितशक्तुदानफलप्राप्तिकामो-ऽहमेतान् सिताखण्ड-त्रपुषोर्वारु[1]-लवणाज्यहरितकयुतान् जलकुम्भोपरिकृतान् शक्तून् ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते शक्तव एते प्रजापतिदैवता इति वदेत्। पूर्ववत् कामस्तुतिर्दक्षिणा च। एवं मासद्वयं दद्यात्।

तथा :—

शिशिरं सकलं कालं ग्रासं[2] परगवे तथा।

दत्त्वा स्वर्गमवाप्नोति संवत्सरशतानि षट् ॥१३॥

शिशिरर्तूपक्रमदिने[3] पूर्ववत् परगवे[4] ग्रासं सङ्कल्पयेत्। ॐ अद्यारभ्य यावच्छिशिरं प्रत्यहं विष्णुधर्मोत्तरोक्तशिशिरर्तु विहितगोग्रासदानफलप्राप्तिकामोऽहं परगवे[5] ग्रासं दास्ये। ततो यावच्छिशिरं प्रत्यहं परकीयगवे[6] घासं दद्यात्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे ऋतुदानावर्तः।

1 A वपुषककटी
2 I. O. घासं
3 A omits दिने
4 & 5 I. O. परगवे
6 I. O. परकीयगवे

अथ नानादैवत-वत्सरदानावर्तः[1] । (७०)

विष्णुधर्मोत्तरे (३।३१७।२-३) :—

संवत्सरे तु दारूणां तिलस्य च महाफलम् ।
परिपूर्वे तथा दानं [2]यवानां द्विजसत्तमाः ॥१॥
[3]इदापूर्वेऽन्नवस्त्राणां धान्यानाञ्चानुपूर्वके ।
उत्पूर्वे[4] रजतस्यापि दानं प्रोक्तं महाफलम् ॥२॥

अत्र संवत्सरादि-समयविशेषपरिचयाय[5] दानसागरनिर्माण-[6]वर्षस्यैव संवत्सरत्वप्रतिपादनाय लिख्यते । [7]निखिलभूपचक्रतिलक-श्रीमद्बल्लालसेन-देवेन[8] पूर्णे[9] शशिनवदशमित (१०९१[10]) शकवर्षे दानसागरो रचितः ।

रविभगणाः [11]परजशिष्टा ये भूता दानसागरस्यास्य ।
क्रमशोऽस्य सम्परीदानूदाद्या[12] वत्सराः पञ्च ॥३॥

[13]तदेवमेकनव-[14]त्यधिकवर्ष-[सहस्रावच्छिन्ने शाके संवत्सरः पतति, स च बिषुवादारभ्य ।][15] एवञ्च परिवत्सर-[16]इदावत्सर-[17]अनुवत्सर-उद्वत्सराः क्रमाद्भवन्ति । वर्षपञ्चकातिक्रमे च पुनरावर्तते ।

तदनु यजमानः साम्वत्सरिकेष्टमासपुण्यदिने अर्चिताय ब्राह्मणायार्चितानि दारूणि दद्यात् । ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने अमुकदेवशर्मणे तुभ्यं विष्णु-धर्मोत्तरोक्त-सम्वत्सरविहित-दारुदानफलप्राप्तिकामोऽहमेतानि दारूणि ददानि । प्रतिग्रहीता स्वस्तीत्युक्त्वा सावित्रीं पठित्वा दारूण्येतानि विष्णुदैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् ।

1 A नानादैवतविष्णुधर्मोत्तरोक्तवत्सरदानावर्त्तः
2 A पराणां
3 I. O. अदावर्त्त॰
4 A उतपूर्व, I. O. उत्पूर्व
5 A ॰परिपादान
6 A ॰कालस्यैव
7 A निखवर्गतिलक॰
8 A सेना for देवेन
9 I. O. पूर्ण
10 A ३६
11 A सरजशिष्टा
12 I. O. ॰दाद्या
13 A तदेव॰
14 I. O. ॰त्याधिक
15 A सहस्रादेऽच्छिन्ने शाके सम्वत्सराः पतन्ति । विषपदारभ्य for the b. p.
16 I. O, अदारतुसर
17 A अनावत्स

ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं तुभ्यमहं दक्षिणामेतत्[1] काञ्चनं ददानि। प्रतिग्रहीता स्वस्तीत्युक्त्वा दाक्षिणं स्पृशेत्। तिलदानवाक्ये तिलदानफलप्राप्तिकामोऽहमेतांस्तिलानिति विशेषः[2]। [3]स्वस्तिसावित्रीपाठानन्तरं तिला एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। परिवत्सराख्यवर्षाभिमत-मासिकपुण्यदिनेऽर्चिताय ब्राह्मणायार्चितान् यवान् दद्यात्। तत्र दानवाक्ये परिवत्सरविहित-यवदानफलप्राप्तिकामोऽहमेतान् यवानिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं यवा एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। मुष्टिग्रहणं स्वीकारः। [4]इदावत्सराख्यवर्षाभिमतमासिकपुण्यदिनेऽर्चिताय ब्राह्मणायार्चितमन्नं दद्यात्। [5][तत्र दानवाक्ये] [6]इदावत्सरविहितान्नदानफलप्राप्तिकामोऽहमेतदन्नमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरमन्नमिदं प्रजापतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [7][वस्त्रदाने वाक्ये] वस्त्रदानफलप्राप्तिकामोऽहमेतानि वस्त्राणीति विशेषः। [8]स्वस्तिसावित्रीपाठानन्तरं वस्त्रमिदं बृहस्पतिदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि [9][पूर्ववत्। दशाग्रहण]-पूर्वकं परिधानं स्वीकारः। [10]अनुवत्सराख्यवर्षाभिमतमासिकपुण्यदिने अर्चिताय ब्राह्मणायार्चितानि [11]यथेष्टधान्यानि दद्यात्। तत्र दानवाक्ये अनुवत्सरविहित-धान्यदानफलप्राप्तिकामोऽहमेतानि धान्यानीति विशेषः। स्वस्तिसावित्रीपाठानन्तरं धान्यान्येतानि प्रजापतिदैवतानीति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्। [12][मुष्टिग्रहणं स्वीकारः।] [13]उद्वत्सराख्यवर्षाभिमतमासिकपुण्यदिने अर्चिताय ब्राह्मणायार्चितं [14]रजतं दद्यात्। तत्र दानवाक्ये [15]उद्वत्सरविहितरजतदानफलप्राप्तिकामोऽहमेतद्रजतमिति विशेषः। स्वस्तिसावित्रीपाठानन्तरं रजतमिदं [16]चन्द्रदैवतमिति प्रतिग्रहीतृवाक्यम्। कामस्तुत्यादि पूर्ववत्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे वत्सरदानावर्तः।

1 A दक्षिणामिदं
2 I. O. शेषः
3 A स्वस्तिसावित्रीपाठान्ते
4 I. O. उदा०
5 A omits the bracketed portion
6 I. O. उदा०
7 A वस्त्रदानवाक्ये
8 A स्वस्तिसावित्रीपाठान्ते
9 A omits the bracketed portion
10 I. O. अनुवत्सराख्याभिमत०
11 A यथेच्छधान्यानि
12 A omits the bracketed portion
13 A उद्वराख्य०, I. O. उत्सवाख्य०
14 A omits this
15 A उद्वत्सरविहित०
16 I. O. अग्निदैवतमिति

अथ नानादैवत-[1]विप्रकीर्णदानावर्त्तः । (७१)

सम्वर्तः :—

ताम्बूलञ्चैव यो दद्याद् ब्राह्मणेभ्यो विचक्षणः ।
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ॥१॥

अत्र यजमानो [2]यथेष्टसंख्यब्राह्मणेभ्योऽर्चितेभ्योऽ[3]र्चितानि ताम्बूलानि दद्यात् । ॐ अद्यामुकसगोत्रेभ्योऽमुकामुक-[4]वेदामुकामुकशाखाध्यायिभ्योऽमुकामुक-[5]देवशर्मभ्यो युष्मभ्यं [6]सम्वर्तोक्तताम्बूलदानफलप्राप्तिकामोऽहमेतानि ताम्बूलानि [7]ददानि । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा [8][सावित्रीं पठित्वा] ताम्बूलान्येतानि विष्णुदैवतानीत्युक्त्वा यथाशाखं कामस्तुतिं पठेयुः । [9][तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं] युष्मभ्यमहं दक्षिणामिदं काञ्चनं ददानि । प्रतिग्रहीतारः[10] स्वस्तीत्युक्त्वा ताम्बूलं[11] स्पृशेयुः ।

तथा :—

फलमूलानि [12]पानानि शाकानि विविधानि च ।
[13]यानानि दत्त्वा विप्रेभ्यो मुदा युक्तः सुखी भवेत् ॥२॥

मूलानि [14]कशेरुशालुकादीनि । देयबहुत्वापेक्षं सम्प्रदानबहुत्वम् । ब्राह्मणायार्चिताय विविधमूलान्यर्चितानि दद्यात् । [15][ॐ अद्यामुकसगोत्रायामुकवेदामुकशाखाध्यायिने ऽमुकदेवशर्मणे तुभ्यं] सम्वर्तोक्त-मूलदानफलप्राप्तिकामोऽहमेतानि मूलानि ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते मूलान्येतानि विष्णुदैवतानीति वदेत् । कामस्तुत्यादि

1 A ०प्रकीर्ण०
2 A यथेष्ट०
3 A omits अर्चितेभ्यो
4 A ०वेदामुक०
5 A omits देव
6 A सम्वर्त्तोक्त०
7 A दद्यात्
8 A सावित्रीपाठे
9 A reads the bracketed portion as ॐ पश्चाद्दानप्रतिष्ठार्थं
10 I. O. प्रतिग्रहीतृवाक्यं
11 I. O. ताम्बूलं
12 A यानानि
13 I. O. पानानि
14 A को for कशेरु
15 A reads the bracketed portion as अमुकसगोत्रेभ्योऽमुकवेदामुकशाखाध्यायिभ्योऽमुकशर्मभ्यो युष्मभ्यं

[1]स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [2][दक्षिणावाक्ये त्वेकवचनान्तसम्प्रदान]-प्रयोगो विशेषः। शाकदाने तु सम्वर्तोक्तशाकदानफलप्राप्तिकामोऽहमेतानि [3]शाकानीति [प्रतिग्रहीतृवाक्ये शाकान्येतानि][4] वनस्पतिदैवतानीति च[5] विशेषः। [6][विविधानीति शाकानां नानाजातीयत्वप्रदर्शनार्थः]।

तथा :—

गुडमिक्षुरसञ्चैव[7] लवणं व्यञ्जनानि च।

सुरभीणि च पानानि [8]दत्त्वात्यन्तं सुखी भवेत्॥३॥

ब्राह्मणाया-[9]र्चितायार्चितानि व्यञ्जनानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अत्यन्त-सुखप्राप्तिकामोऽहमेतानि व्यञ्जनानि ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा :—

तैलमामलकं [10]यच्छत् पादाभ्यङ्गं तथैव च।

नरः सुहृष्णस्तेजस्वी [11]सुखवांश्चैव जायते॥४॥

ब्राह्मणायार्चितायार्चितं तैलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। सम्वर्तोक्ततैलदानफलप्राप्तिकामोऽहमेतत्तैलं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। फलभूयस्त्वादुत्कृष्ट-तैलदानमावृत्त्या[12] वापि। [13]आमलकदानवाक्ये तैलपदस्थाने आमलक-[14]पदनिवेशो विशेषः।

[15]विष्णुः :—

मधुघृततैलदानेनारोग्यम्॥५॥

ब्राह्मणायार्चितायार्चितं तैलम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [16]आरोग्यप्राप्तिकामोऽहमेतत्तैलं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

---

1 I. O. स्वीकारान्तं, A omits it
2 A reads the bracketed portion as दक्षिणावाक्येऽकवचनान्त-संप्रदाना
3 A reads the following for शाकानीति प्रतिग्रहीतृवाक्ये:—शाकानि प्रतिग्रहीतृवाक्यं काम-मस्त्वादि पूर्ववत्
4 I. O. reads the bracketed portion twice
5 A omits च
6 A reads the bracketed portion as विविधानीति शाकानां नानाजातित्वप्रदर्शनाय
7 A ०श्चैव
8 A दत्त्वात्यर्थं
9 I. O. ०र्चितायर्चितानि, अर्चिताय
10 A यच्च
11 I. O. सुखरांश्चैव
12 I. O. and A ०वृत्त्या
13 I. O. and A शामलक०
14 A omits पद
15 A विष्णुनोक्तं
16 A आरोग्यस्य०

तथा :—

तालवृन्तचामर-[1]दानेनादुःखित्वम् ॥६॥

ब्राह्मणायार्चिताय तालवृन्तमर्चितम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इत्यन्तमुक्त्वा दद्यात्। [2]अदुःखित्व-प्राप्तिकामोऽहमेतत्तालवृन्तं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। चामरदानवाक्ये तालवृन्तपद[3]-स्थाने चामरमिति विशेषः।

यमः :—

राजोपकरणं दत्त्वा [4][रत्नानि विविधानि च।

नगरञ्च तथा[5] दत्त्वा] राजा भवति भूतले ॥७॥

ब्राह्मणायार्चिताय सिंहासनकनक[6]-दण्डच्छत्र-सौवर्णदण्डसितचामर-भृङ्गाराणामिच्छ-यान्यतमं राजोपकरणमर्चितम् ॐ अद्यादि तुभ्यमहं सम्प्रददे इत्यन्तमुक्त्वा दद्यात्। भूतलराज्य-प्राप्तिकामोऽहमेतद्राजोपकरणं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। कनकदण्डस्य ग्रहणं भृङ्गारचामरसिंहासनानां स्पर्शः स्वीकारः।

आदित्यपुराणे :—

नवं श्लक्ष्णं सुविपुलं ये प्रयच्छन्ति पक्षकम्।

आवीज्यमानो धर्मोऽपि पवनो वाति शीतलः ॥८॥

श्लक्ष्णं कुटिलपक्षयुतं, सुविपुलं महत्, पक्षकं मयूरपक्षव्यजनम्। नव-मुक्तलक्षणं मयूरपक्षव्यजनमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमहं सम्प्रददे इत्यन्तमुक्त्वा दद्यात्। आदित्यपुराणोक्त-पक्षकदानफलप्राप्तिकामोऽहमेतं पक्षकं ददानि। स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।

तथा :—

तीर्थतडागकूपादिनौकासेतुप्रदाश्च[7] ये।

स्कन्धेन तारयेद्[8] यस्तु तृषार्तानां जलप्रदः ॥९॥

तीर्थं जलाशयावतरणवर्त्म, स्कन्धेन जलेषु दुर्बलजन्तुतारणम्।

1 A' ०दाने दुःखत्वं
2 I. O. ०अदुःखित्व०, A ०अदुःख०
3 I. O. omits पद
4 A' omits the bracketed portion
5 I. O. दद्या
6 I. O. omits कनक
7 A' [illegible]
8 A तारयेत्

षष्टिकोटिसहस्राणि अर्बुदानाञ्च वै त्रयम् ।
क्रीडन्ति[ते श्वेतपुरे][1] एतदुक्तं द्विजोत्तम[2] ॥१०॥

जलाशयावतरणार्थमिष्टकादिभिर्यथाशक्ति तीर्थं निर्माय सङ्कल्पयेत् । [3]ॐ आदित्यपुराणोक्ततीर्थदानफलप्राप्तिकामोऽहं जन्तुभ्यो [4]जलावतरणार्थमेतत्तीर्थमुत्सृजे[5] । सेतुदाने[6] आदित्यपुराणोक्तसेतुदानफलप्राप्तिकामोऽहं जन्तुभ्यो यथेष्ट-[7]सञ्चारार्थमेतं सेतुमुत्सृजे[8] । स्कन्धेन [9]दुर्बलजन्तुसन्तारणमनुष्ठानमात्रम् ।

तथा :—

यष्टिं[10] ये तु प्रयच्छन्ति [11][नेत्रहीनेऽथ दुर्बले] ।
तेषान्तु विपुलः पन्थाः[12] फलमूलोपशोभितः ॥११॥

भवतीति [13]शेषः ।

[14][तथा नन्दिपुराणे] :—

यष्टिं[15] [16]वृद्धाय यो दद्यात् पुरुषस्तु दयापरः ।
सदाश्रयो भवेन्नित्यं [17]गतभीः स्वर्गमाप्नुयात् ॥१२॥

एतदुभयमप्यनुष्ठानमात्रम् ।

तथा :—

वह्निवस्त्रप्रदानेन ब्रह्मलोकं प्रपद्यते ॥१३॥

वह्न्यर्थिने वह्निदानं सङ्कल्पयेत् । ॐ ब्रह्मलोकप्राप्तिकामोऽहं वह्न्यर्थिने वह्निं दास्ये । ततो यथेष्टकालावधि वह्न्यर्थिने वह्निं [18]प्रज्वाल्य दद्यात् ।

---

1 A तो सुतपुरे for the bracketed portion
2 A द्विजोत्तमः
3 A omits it
4 I. O. जलावतरणार्थंतीर्थ०
5 A ०सृजेत्
6 A सेतुदाने
7 A ०सञ्चारोपयुक्तं
8 A ०सृजे
9 A दुर्जन्तु संतारण०
10 I. O. यष्टिं
11 A नेत्रहीने च दुर्बलः for the b. p.
12 I. O. पथ:
13 A विशेषः
14 I. O. omits the bracketed portion
15 I. O. यष्टिं
16 A विप्राय
17 A गतभीतः
18 A प्रज्वाल्या

नन्दिपुराणे :—

उष्णीषदायी यो मर्त्यो जायते [1]मुकुटोत्कटः ।

[2]विस्तीर्णे राजवंशे तु श्वेतच्छत्रः[3] [4]स लक्ष्मवान् ॥१४॥

उष्णीषं [5]रोहितमुकुटाकृतिवासोविन्यासरूपम् । ब्राह्मणायार्चिताय उष्णीषमर्चितम्[6] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । नन्दिपुराणोक्तोष्णीषदानफलप्राप्तिकामोऽहमेतदुष्णीषं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् । परिधानं स्वीकारः ।

महाभारते (अनु—५७।३८) :—

[7]स्रग् गन्धधूपान्यनुलेपनानि [स्नानानि माल्यानि][8] च मानवो यः ।

दद्याद् द्विजेभ्यः स भवेदरोगस्तथाभिरूपश्च नरेन्द्रलोके ॥१५॥

स्नानानि स्नानसाधनानि तिलामलकादीनि[9] । सम्प्रदानबहुत्वं देयबहुत्वापेक्षम् । अर्चिताय ब्राह्मणाय [10]स्नानीयद्रव्याण्यर्चितानि ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्तस्नानदानफलप्राप्तिकामोऽहमेतानि स्नानानि ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (अनु—५७।३७क) :—

भक्ष्यान्नपानीयरसप्रदाता सर्वान् समाप्नोति रसान् [11]प्रकामान् ॥१६॥

रसा लवणादयः । [12]ॐ अर्चिताय ब्राह्मणाय लवणादीनामन्यतमरस[13]-द्रव्यमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । महाभारतोक्त-रसदानफलप्राप्तिकामोऽहमेतममुकं[14] रसं ददानि । स्वस्तिसावित्रीपाठान्ते रसोऽयं [15]सोमदैवत इति वदेत् । कामस्तुत्यादि पूर्ववत् ।

तथा :—

[16]पिपासया न म्रियते सोपच्छन्दश्च जायते ।

न [17]प्राप्नुयात् स व्यसनं करम्भान्[18] यः प्रयच्छति ।

प्रयतो ब्राह्मणेभ्यश्च श्रद्धया परया युतः ॥१७॥

---

1 A सूचयोत्कटः
2 A विस्तीर्ण
3 A श्वेतच्छत्रं
4 A स्व
5 A परिविष्टि for रोहित
6 A omits अर्चितम्
7 A सुगन्धम०
8 A reads the bracketed portion as माल्यानि स्नानानि
9 I. O. तिलामलकानीति
10 I. O. omits स्नानीय
11 A प्रकामं
12 I. O. omits ॐ
13 I. O. ०रसं
14 A ०ममुक
15 A सोमदैवतमिति
16 A पिपासाया
17 I. O. प्राप्न्याप्न
18 I. O. करम्भान्

करम्भा[1] दधिशक्तवः[2]। [3]ब्राह्मणेभ्योऽर्चितेभ्यो दधिमिश्रान्[4] [5]शक्तूनर्चितान् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। महाभारतोक्त-करम्भदानफलप्राप्तिकामोऽहमेतान् करम्भान् ददानि। स्वस्त्यादिस्वीकारान्त[6] पूर्ववत्।

तथा (अनु—२३।१००) :—

निवेशनानां क्षेत्राणां वसतीनाञ्च भारत[7]।

दातारः प्रार्थितानाञ्च पुरुषाः स्वर्गगामिनः ॥१८॥

येन येन द्रव्येण धान्यहिरण्यादिना [8][यो ह्रव्यो भवति] [9]तत्तद्द्रव्यमर्चितम[10]-र्चिताय तस्मै ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। स्वर्गप्राप्तिकामोऽहमेतदमुकद्रव्यं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते [11]अमुकद्रव्यमिदमुकदैवतमिति वदेत्। कामस्तुत्यादि पूर्ववत्। [12][द्रव्यदेवतास्वीकारौ प्रतिग्रहविधावनुसन्धेयौ]।

विष्णुधर्मोत्तरे (३।३०६।६३ख-६४क) :—

[13]मस्तुपिण्डकिलाटादिकूर्चिकादानतस्तथा।

गोरसानां प्रदानेन तृप्तिमाप्नोत्यनुत्तमाम्[14] ॥१६॥

पिण्डं पिण्डितदुग्धम्, किलाटः [15]सुमृष्टदुग्धपिण्डः। [16]आदिशब्दात् दुग्धविकारान्तरग्रहणम्। कूर्चिका [17]दधिसरः, गोरसानां दधितक्रशिखरिण्यादीनाम्[18]। ब्राह्मणायार्चिताय मस्त्वर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अनुत्तमतृप्तिकामोऽहमेतत्[19] मस्तु ददानि। स्वस्त्यादि पूर्ववत्। एवं पिण्डदुग्धादिदाने [20]मस्तुपदस्थान एतत्पिण्डदुग्धम् [21]एतं किलाटम् एतां[22] कूर्चिकामेतं[23] गोरसमिति[24] पदनिवेशो वाक्ये विशेषः।

1 I. O. करम्भो
2 A adds इति after this
3 A ब्राह्मणे for ब्राह्मणेभ्यो
4 A दधिमिश्रितान्
5 I. O. सक्तू०
6 I. O. omits स्वीकारान्तं
7 A भारते
8 I. O. omits the bracketed portion
9 I. O. तन्नु द्रव्य०
10 A omits मर्चितम्
11 I. O. अमुकद्रव्यमिति
12 A reads the bracketed portion as द्रव्यदेवतास्वीकारो प्रतिद्रव्यमनुसन्धेयो
13 A यस्तु०
14 A ०त्तमं
15 A स्वयमृष्ट for सुमृष्ट
16 A आदिशब्देन
17 I. O. दधिसरः, A दधिपरः
18 A ०शिखरिण्यादाम्
19 A ०मेतं
20 A मस्तुपिण्डपदस्थाने
21 A एता
22 I. O. एतं
23 A एतत्
24 I. O. गोरस

तथा (३।३१५।८क) :—

लेह्यदोऽप्सरसां लोकम् ।

[1][प्राप्नोतीति शेषः । यथेष्टं] लेहनीयं पिण्डीकृतं दुग्धमर्चितम् अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [2]अप्सरोलोकप्राप्तिकामोऽहमेतल्लेह्यं[3] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[4]तथा (३।३१५।८क) :—

वसूनामपि चोष्यदः[5] ॥२०॥

[6]लोकमाप्नोतीति शेषः । [7]यथेच्छं [8]चोषणीय-[9]दुग्धाम्रादिकमर्चितमर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वसुलोकप्राप्तिकामोऽहमेतच्चोष्यं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

तथा (३।३१४।११क) :—

इक्षु-[10]मृद्वीकयोर्दानात् परं सौभाग्यमाप्नुयात् ॥२१॥

अर्चिताय ब्राह्मणायार्चितमिक्षुम्[11] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । [12]परमसौभाग्यप्राप्तिकामोऽहमेतमिक्षुं[13] ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।

[14][तथा—(३।३११।११क) :—

दन्तकाष्ठप्रदानेन सौभाग्यं महदाप्नुयात् ॥२२॥

ब्राह्मणायार्चिताय दन्तकाष्ठमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । अतिशयितसौभाग्यप्राप्तिकामोऽहमेतद्दन्तकाष्ठं ददानि । स्वस्त्यादिस्वीकारान्तं पूर्ववत् ।]

तथा (३।३४१।८०क) :—

[15][जिह्वानिर्लेखनं दत्त्वा] विरोगस्त्वभिजायते ॥२३॥

---

1 A reads the bracketed portion as प्राप्नोति यथेच्छं
2 A अप्सरसां for अप्सरो
3 A ०मेतं तल्लेह्यं
4 I. O. omits it
5 A चोष्यतः
6 A लोकं प्राप्नोतीति
7 A omits it
8 I. O. चोषणाय
9 A ०दुग्धादिक०
10 A ०चर्बिकयोर्दानात्
11 I. O. इक्षु for इक्षुम्
12 I. O. धन for परम
13 I. O. इक्षु for इक्षुं
14 A reads the bracketed portion a little below, just before तथा :—मृत्तिकायाः etc.
15 A जिह्वानिर्लेखनं कृत्वा and I.O. जिह्वानिर्घर्षणं कृत्वा for the bracketed portion

अर्चिताय ब्राह्मणायार्चितं जिह्वानिर्लेखनम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [1]विरोगत्वप्राप्तिकामोऽहमेतज्जिह्वानिर्लेखनं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।

तथा (३।३११।११ख) :—

मृत्तिकायाः प्रदानेन शुचिः सर्वत्र जायते ॥२४॥

मृत्तिका तीर्थमृत्तिका स्नानार्था शौचार्था च। अर्चिताय ब्राह्मणायार्चितां[2] मृत्तिकाम्[3] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त[4]-मृत्तिकादानफलप्राप्तिकामोऽहमेतां[5] मृत्तिकां ददानि। स्वस्त्यादिस्वीकारान्तं[6] पूर्ववत्। अत्र दन्तकाष्ठ-जिह्वानिर्लेखन-मृत्तिका-दानेषु [7]अनुत्सृज्यानुष्ठानमात्रेणापि [8]फलमुक्तम्। उत्सृज्य दाने तु[9] दक्षिणाधिक्यात्[10] फलाधिक्यम्।

तथा (३।३११।४क) :—

वितानकप्रदानेन सर्वपापैः प्रमुच्यते ॥२५॥

वितानं चन्द्रातपः। अर्चिताय ब्राह्मणायार्चितं वितानकम्[11] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। [12]सर्वपापक्षयकामोऽहमेतद्वितानकं ददानि। स्वस्त्यादिस्वीकारान्तं[13] पूर्ववत्।

[14][तथा (३।३११।२३) :—

दत्त्वा पूगफलं विप्रा सफलां विन्दते क्रियाम्।

ताम्बुलस्य प्रदानेन सौभाग्यमपि विन्दति ॥२६॥

अर्चिताय ब्राह्मणायार्चितं ताम्बुलदानफलप्राप्तिकामोऽहमेतत्ताम्बूलं ददानि।] [स्वस्त्यादि-स्वीकारान्तं पूर्ववत्।][15]

तथा (३।३११।१०) :—

यज्ञोपवीतदानेन वस्त्रदानफलं लभेत्।

उष्णीषदानस्य तथा फलमेतदुदाहृतम् ॥२७॥

1 A विरोग for विरोगत्व
2 I. O. °र्चितं
3 A मृत्तिकामर्चितां
4 A विष्णुधर्मोत्तरो
5 A एता for एतां
6 A omits स्वीकारान्तं
7 A उत्सृज्यानुष्ठानमात्रे पि
8 I. O. फलं युक्तं
9 A दत्
10 A दक्षिणायां
11 A वितानकमर्चितं
12 A विष्णुधर्मोत्तरोक्त-वितानकदानफल-प्राप्ति for सर्वपापक्षय
13 I. O. omits स्वीकारान्तं
14 A omits the bracketed portion
15 A reads the bracketed portion after the first line of the next verse

अर्चिताय ब्राह्मणायोष्णीषमर्चितम्[1] ॐ[2] अद्यादि तुभ्यमहमेतमुक्त्वा दद्यात्। [3]वस्त्र-दानफलप्राप्तिकामोऽहमेतदुष्णीषं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्। [4][परिधानं स्वीकारः।

तथा (३।३११।२५क) :—

कङ्कतस्य प्रदानेन परां बाधां प्रमुञ्चति ॥२८॥

कङ्कतं केशप्रसाधनोचितं काङ्करीति प्रसिद्धं बोद्धव्यम्। अर्चिताय ब्राह्मणायार्चितं कङ्कतम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। प्रबाधाप्रमोककामोऽहमेतत् कङ्कतं ददानि। स्वस्त्यादिस्वीकारान्तं पूर्ववत्।]

तथा (३।३१६।२२) :—

[5]बाले क्रीडनकं दत्त्वा मिष्टमन्नं[6] तथैव च।

फलं मनोहरञ्चापि[7] अग्निष्टोमफलं लभेत् ॥२९॥

क्रीडनकं क्रीडोचितद्रव्यं [8][कन्दुकादि। अर्चिताय वटवे क्रीडोचितकन्दुकमर्चितम्] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। अग्निष्टोमफलप्राप्तिकामोऽहमेतत् क्रीडनकं ददानि। स्वस्त्यादि-[9]स्वीकारान्तं पूर्ववत्। [10][अनुपनीताय तु दाने] अनुष्ठानमात्रम्।

[11]तथा (३।३११।२४) :—

समुद्रजानां भाण्डानां शंखादीनां प्रदायकः।

पात्रीभवति कामानां यशसश्च न संशयः ॥३०॥

भाण्डानां पात्राणाम्। शंखादीनामित्यादिशब्देन शुक्तिग्रहणम्। शुक्तिशंखयोरन्यतरस्य पात्रत्रयमर्चितं ब्राह्मणायार्चिताय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। विष्णुधर्मोत्तरोक्त-[12]समुद्रजभाण्डदानफलप्राप्तिकामोऽहमेतानि भाण्डानि ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते भाण्डानीमानि वरुणदैवतानीति वदेत्। कामस्तुल्यादि पूर्ववत्।

---

1 A ब्राह्मणायामर्चितमुष्णीषं
2 A omits it
3 A उष्णीष for वस्त्र
4 A omits the bracketed portion
5 A बाल
6 A तोमन्न
7 A and V. D. मनोहरं वापि
8 I. O. reads the bracketed portion as कन्दुकाद्यार्चितं
9 I. O. and A omit स्वीकारान्तं
10 A अन्नदानं तोयदानं for the bracketed portion
11 I. O. omits it
12 A [illegible] for समुद्रज

तथा (३।३११।२२) :—

स्नानानां सुखवासानां धूपानाञ्च प्रदायकाः[1] ।

लोके प्रयान्ति प्रियतां भवन्ति च सुगन्धिनः ॥३१॥

ब्राह्मणायार्चिताय स्नानोपयुक्तं सुगन्धितिलामलकाद्यर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । लोकप्रियत्वसहितसुगन्धित्वप्राप्तिकामोऽहमेतानि स्नानानि ददानि । स्वस्त्यादि स्वीकारान्तं[2] पूर्ववत् । [3]सुखवास-[4]दानवाक्ये तु स्नानपदस्थाने सुखवासपदनिवेशो विशेषः ।

तथा (३।३१४।१४क) :—

शक्तुदस्तृप्तिमाप्नोति ॥३२॥

ब्राह्मणायार्चिताय शक्तुमर्चितम्[5] ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । तृप्तिकामोऽहमेतान् शक्तून् ददानि । स्वस्तिसावित्रीपाठान्ते शक्तव एते प्रजापतिदैवता इति प्रतिग्रहीतृवाक्यम् । कामस्तुत्यादि पूर्ववत् ।

तथा (३।३०६।६२ख-६३क) :—

आरण्यपशुदानेन वायुलोके महीयते ।

एतदेव फलं प्रोक्तं प्रदानेन तु पक्षिणाम् ॥३३॥

अत्रारण्यपशुसमभिव्याहारेणा[6]-रण्यानामेव पक्षिणां मयूरादीनां ग्रहणम्[7] । एतदेव फलं वायुलोकप्राप्तिरित्यर्थः । अर्चिताय ब्राह्मणाय मयूरादिपक्षित्रयमर्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । वायुलोकप्राप्तिकामोऽहमेतान् पक्षिणो ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते पक्षिण एते वायुदैवता इति वदेत् । कामस्तुत्यादि पूर्ववत् ।

तथा (३।३१०।१८):—

भोगमाप्नोति ताम्रदः[8] ।

लोहारकूटयो-[9][र्दानात् कुप्य]-माप्नोत्यसंशयम्[10] ॥३४॥

1 A प्रदायकः

2 I. O. omits स्वीकारान्तं

3 I. O. अथवा ॥ सु० -

4 A ०दाने तु दाम्य

5 A मन्तू न्यर्चितान्

6 A ०व्याहाराद्दा०

7 I. O. omits ग्रहणम्

8 I. O. ताम्रदः

9 A र्येताना दीनाद्रूप्य for the bracketed portion

10 A ०संशय.

आरकूटं पित्तलम् इतरलोहानां स्वपदोपात्तत्वात्। [अत्र लोह][1]-पदं कांस्यपरम्, कुप्यं हेमरूप्येतरधनम्।

[2]अयसश्च प्रदानेन स्थैर्यं [3]सुमहदश्नुते।
त्रपुसीसकयोर्दानाद् [4]बुद्धिवृद्धिमवाप्नुयात् ॥३५॥ (३।३१०।१६क)

त्रपु रङ्गम्। [5]यथेष्टपरिमाणं ताम्रमर्चितम् अर्चिताय ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्। भोगप्राप्तिकामोऽहमेतत्ताम्रं ददानि। प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते ताम्रमिदमग्निदैवतमिति वदेत्। [6]कामस्तुत्यादि पूर्ववत्। कांस्यदाने कुप्यप्राप्तिकामोऽहमेतल्लोह[7]-मिति [8]वाक्ये विशेषः। [9][पित्तलदाने कुप्यप्राप्तिकामोऽहमेतदारकूटमिति विशेषः। लोहदाने सुमहास्थैर्यप्राप्तिकामोऽहमेतदय इति विशेषः। रङ्गदाने [10]बुद्धिवृद्धिप्राप्तिकामोऽहमेत[11] त्रपु इति विशेषः। सीसकदाने [12]बुद्धिवृद्धिप्राप्तिकामोऽहमेतत् सीसकमिति विशेषः।]

तथा (३।३१०।२०ख-२१क) :—

शिल्पभाण्डानि यो दद्याल्लोहानि विधिवद्द्विजाः।
विद्यादानफलं तस्य कथितं नात्र संशयः ॥३६॥

शिल्पभाण्डानि [13]शिल्पनिर्माणोचितद्रव्यादीनि। गृहीतोदपूर्णताम्रपात्र [उदङ्मुख उपविष्टो][14] यथेष्टं शिल्पभाण्डानि कारुभ्यः शिल्पभाण्डार्थिभ्यः सङ्कल्पयेत्। ॐ विष्णुधर्मोत्तरोक्त-शिल्पभाण्डदानफलप्राप्तिकामोऽहं कारुभ्यः शिल्पभाण्डानि दास्ये इति सङ्कल्प्य [यो येनार्थी][15] तस्मै शिल्पिने तद्दद्यात्। अत्र कारुभ्यो दानं [विष्णुधर्मोत्तर एव स्थानान्तरे श्रवणात्][16]।

1 A अत्र for the bracketed portion
2 A आयसस्य
3 A समहदश्नुते
4 A वृद्धि°
5 I. O. यथेष्ट twice and °परिमाण
6 A ताम्रस्पर्शादि
7 A कांस्य for लोह
8 A omits it
9 A omits the bracketed portion
10 I. O. वृद्धि°
11 I. O. एतं for एतत्
12 I. O. वृद्धि°
13 A निर्माणोचितद्रव्याणि वास्त्वादीनि
14 I. O. उदङ्मुखोपविष्टो and A उदङ्मुख उपविश्य for the bracketed portion
15 A omits the bracketed portion
16 A reads the bracketed portion as विष्णुधर्मोत्तरे स्थानान्तरश्रवणात्

तथा च[1] :—

येन जीवति भाण्डेन तस्य भाण्डस्य दापकः[2] ।
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ॥३७॥
यज्ञोपकरणद्रव्यं [3][ब्राह्मणस्य महाफलम् ।
[4]युद्धोपकरणद्रव्यं] क्षत्रिये[5] द्विजपुङ्गवाः ॥३८॥ (३।३१६।१२)
[6]पण्योपयोगि [7]तद्वैश्ये शूद्रे [8]शिल्पोपजीवनम् ।
यस्योपयोगि यद्द्रव्यं देयं तस्यैव तद्भवेत् ॥३९॥ (३।३१६।१३)
येन येन च भाण्डेन यस्य [9]वृत्तिरुदाहृता ।
तत्तत्तस्यैव दातव्यं पुण्यकामेन धीमता ॥४०॥ (३।३१६।१४)

[10]तथा (३।३१०।२१ख) :—

वर्मदाता नरो नित्यं रक्षां समधिगच्छति ।

[11][वर्म सन्नाहः ।] ब्राह्मणायार्चिताय वर्मार्चितम् ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । विष्णुधर्मोत्तरोक्तवर्मदानफलप्राप्तिकामोऽहमेतद्वर्म ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते वर्मेदं शक्रदैवतमिति वदेत् । कामस्तुत्यादि पूर्ववत् । परिधानं स्वीकारः । एतच्च [12]दानं ब्राह्मणाय [13]तत्प्रकरणे पाठात् ।

तथा (३।३१०।२२क) :—

आयुधानां प्रदानेन रिपुनाशमवाप्नुयात् ॥४१॥

[14][यथेच्छमायुधान्यर्चितानि अर्चिताय] ब्राह्मणाय ॐ अद्यादि तुभ्यमन्तमुक्त्वा दद्यात् । रिपुनाशकामोऽहमेतान्यायुधानि ददानि । प्रतिग्रहीता स्वस्तिसावित्रीपाठान्ते आयुधानीमानि शक्रदैवतानीति वदेत् । कामस्तुत्यादि पूर्ववत् । [ग्रहणं स्वीकारः ।][15] [16][ब्राह्मण-

1 A omits च
2 A दायकः
3 V. D. omits the b. p.
4 A यज्ञोपकरणं द्रव्यं
5 I. O. क्षत्रियो
6 A पुण्यो०, I. O. पाण्यो०
7 A तद्वैश्ये, I. O. तद्वैश्य
8 I. O. शिल्पोपजीविनं
9 A वृत्ति०
10 A omits it
11 A omits the bracketed portion
12 A omits it
13 A तत्प्रकरणेपि
14 A यथेच्छमायुधान्यर्चिताय for the bracketed portion
15 A omits the bracketed portion
16 A reads the bracketed portion as ब्रह्मप्रकरणपाठान्ते एतदपि

प्रकरणे पाठादेतदपि] ब्राह्मणाय दानम्। एतानि च[1] दानानि [2]विशेषतः कथितानि अन्यान्यपि [3][स्वेष्टद्रव्यदानानि यथेष्टं] कर्तव्यानि।

तथा च मनुः[4] :—

यद् यदिष्टतमं किञ्चिद् [5][यच्चास्ति दयितं गृहे]।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छति[6] ॥४२॥

तत्र च दानवाक्ये [7]मनूक्तामुकद्रव्यदानफलप्राप्तिकामोऽहममुकद्रव्यमिति [8]विशेषः। [9]तेषु सर्वेषु [10]विष्णुदैवतेति [11]एतेषाञ्च [12]तत्तदावर्तस्थितानां सर्वेषां दानानां विष्णुशङ्करोद्देशेनानुष्ठाने [13]श्रुतफलानामानन्त्यं भवति।

तथा च कूर्मपुराणे (२।२६।३४) :—

यत् [14]किञ्चिद्देवमीशानमुद्दिश्य ब्राह्मणे शुचौ।
दीयते [15]विष्णवे वापि तदनन्त-[16]फलं स्मृतम् ॥४३॥

इति महाराजाधिराज-निःशङ्कशङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे [17]विप्रकीर्णदानावर्तः।

---

1 A omits च
2 A विशेष:
3 A reads the bracketed portion as स्वेष्टद्रव्यानि दानानि
4 Cf. K. P. 2/26/52 which reads य......मं लोके यच्चापि.........मिच्छता
5 I. O. यच्चान्यद्दयितं गृहे
6 I. O. ०मिच्छेति
7 I. O. मनूक्तामुक०
8 I. O. शेष:
9 A adds च after this
10 I. O. दैवतेति
11 A एषाञ्च
12 I. O. तद्दावर्त स्थितानां
13 A द्रुतफलानामनन्त्यम्
14 I. O. किञ्चिद्देव०
15 Supplied from K. P. A. विष्णुरेवार्थं and I. O. विष्णुमेवाथ
16 K. P. ०फलप्रदम्
17 A प्रकीर्णद्दानावर्त,

अथ सामान्यदेवतासम्प्रदानकदानावर्तः । (७२)

नन्दिपुराणे :—

अलङ्कारन्तु यो दद्याद्विप्रायाथ [1][सुराय वा] ।
स गच्छेद्वारुणं लोकं नानाभरणभूषितः ।
जातः पृथिव्यां कालेन भवेद्दीपपतिर्नरः ॥१॥

अत्र प्रसिद्धालङ्काराणामन्यतम-[मर्चितमर्चिताय][2] यस्मै कस्मैचिद्देवाय दद्यात् । ॐ [3][अद्य नन्दिपुराणोक्त-सुरसम्प्रदानकालङ्कारदानफलप्राप्तिकामोऽहममुकदेवायैतमलङ्कारं ददानि । ततः ॐ अद्य कृतैतद्दानप्रतिष्ठार्थममुकदेवायाहं दक्षिणामेतत् काञ्चनं ददानीति । तस्मा एव देवाय दक्षिणां दद्यात् । अत्र फलोत्कर्षादुत्कृष्टालङ्कारदानं] बोद्धव्यम् ।

तथा :—

[4]यश्चोभयमुखीं दद्याद्विप्रा-[य वेदवादिने][5] ।
देवाय [6]वाप्यभीष्टाय स कुलान्येकविंशतिम् ॥२॥
समुद्धृत्य [7]नरस्तिष्ठेन्नरकाद्ब्रह्मणो[8]ऽन्तिके ।
युगानि रोमतुल्यानि [9]भक्तिश्रद्धापरो नरः ॥३॥

[10]प्रसूयमानां [11][दृश्यमान-वत्स]-शिरश्चरणां गामर्चिता[12]-मर्चितायेष्टदेवाय[13] दद्यात् । ॐ [14]अद्य नन्दिपुराणोक्तोभयमुखीदानफलप्राप्तिकामोऽहममुकदेवाय एतामुभयतोमुखीं गां ददानि । दक्षिणा पूर्ववत् ।

1 A सुराय च
2 I. O. अर्चितं and A अर्चिताय for the bracketed portion
3 A reads the bracketed portion as 'नन्दिपुराणोक्तफलोत्कर्षादुत्कृष्टामलङ्कारदानं'
4 I. O. यश्चोभय०
5 I. O. वेदवादिने for the b. p.
6 I. O. दाप्यभीष्टाय
7 A समुत्तिष्ठे०
8 A ब्राह्मणो for ब्रह्मणो
9 I. O. यद्वि०
10 A प्रसूयमानां
11 A व्यक्तवत्स for the bracketed portion
12 I. O. omits अर्चिताम्
13 I. O. ०देवाय
14 A omits अद्य

तथा :—

दीपं ददाति यो मर्त्यः सुरब्राह्मणवेश्मनाम्[1] ।
स दिव्येन तु यानेन[2] महाभागप्रकाशिना[3] ।
[4]गच्छति स्वर्गमण्डलं वसेत्तत्र समाः शतम् ॥४॥

गृहीतोदपूर्णताम्रपात्र उदङ्मुखो दीपदानं सङ्कल्प्य सुरवेश्मसु यथेच्छकालावधि दद्यात् । [5]ॐ नन्दिपुराणोक्त-[6]सुरवेश्म-दीपदानफलप्राप्तिकामोऽहं सुरवेश्मसु दीपं दास्ये । अत्र फलभूयस्त्वाद् यथेष्टचिरकालदीपदानम् ।

शाम्बपुराणे :—

दीपं ददाति यो नित्यं देवतायतनेषु च ।
[7]चतुष्पथेषु रथ्यासु रूपवान् सुभगो भवेत् ॥५॥

अत्राप्यनन्तरदीप-[8]सङ्कल्पवत् सङ्कल्पयेत् । ॐ शाम्बपुराणोक्त-दीपदानफलप्राप्तिकामोऽहं [देवायतनेषु दीपं][9] दास्ये । ततो यथेष्टचिरकालावधि दद्यात् ।

आदित्यपुराणे :—

[10]ये च शय्यां प्रयच्छन्ति देवेषु च[11] गुरुष्विह ।
[12]ज्ञानवृद्धेषु विप्रेषु दत्त्वा नश्यति कण्टकम्[13] ॥६॥

देवेष्विति बहुवचनं दातृबहुत्वापेक्षम् । अर्चितायाभिमतदेवायार्चितां[14] शय्यां दद्यात् । ॐ अद्य [15]कण्टकनाशप्राप्तिकामोऽहं[16]-ममुक-[17]देवायैतां शय्यां ददानि । दक्षिणा पूर्ववत् ।

तथा सुवर्णदानानुवृत्तौ :—

यं देवमर्चयेत्तेन यस्य चैव प्रयच्छति ।
तस्य लोके [18]निवसति [19]नित्यमेव ददाति यः ॥७॥

1 A वेश्मन
2 I. O. यामिन
3 A महाभागप्रभाषिना, I. O. महाभातप्रकाशिना
4 I. O. गच्छते
5 A omits it
6 A omits सुरवेश्म
7 I. O. चतुःपथेषु
8 A omits सङ्कल्प
9 A reads the bracketed portion as देवतने प्रदीपं
10 A येन
11 A व
12 A ज्ञानवित्तेषु
13 A दुःकृतं
14 I. O. and A °र्चितं
15 A ह्र for कण्टक
16 A adds भगवते after अहं
17 I. O. °देवतायैतां, A °देवायै
18 A निवसति
19 A [illegible]

अभिमतदेवायार्चितायार्चितं[1] सुवर्णं दद्यात्। ॐ अद्यामुक-[2]देवलोकप्राप्तिकामोऽहममुक-[3]देवायैतत् काञ्चनं ददानि। दक्षिणा पूर्ववत्।

[4]तथा :—

छत्रं ये तु प्रयच्छन्ति गुरुविप्रसुरेषु च।
न तेषां [5]पतते घोरमग्निवर्षं[6] सुदारुणम् ॥८॥

अर्चितायाभिमतदेवायार्चितं छत्रं दद्यात्। ॐ [7]आदित्यपुराणोक्तसुर-[8]सम्प्रदानकछत्रदानफलप्राप्तिकामोऽहं भगवते अमुक-[9]देवायैतच्छत्रं ददानि। दक्षिणा पूर्ववत्।

शिवपुराणे :—

दीपप्रदानं यो दद्याद् [10]देवेषु ब्राह्मणेषु च।
तेन दीपप्रदानेन अक्षय्यां गतिमाप्नुयात् ॥९॥

[11]अर्चितायाभिमतदेवायार्चितं दीपं दद्यात्। ॐ अद्याक्षय्य[12]-गतिप्राप्तिकामोऽहं भगवते अमुकदेवायैतं दीपं ददानि। दक्षिणा पूर्ववत्।

विष्णुधर्मोत्तरे (३।२८८।४०ख-४१) :—

यानं शय्यासनं छत्रं पादुके [13]वाप्युपानहौ।
वाहनं गाश्च [14]धर्मज्ञास्त्रिदशेभ्यो ददाति यः।
एकैकस्मादवाप्नोति वह्निष्टोमफलं नरः ॥१०॥

यानं रथं पादुके काष्ठोपानहौ वाहनं हस्त्यादि। अर्चितायाभिमतदेवायार्चितं यानं दद्यात्। [15]ॐ अद्याग्निष्टोमफलप्राप्तिकामोऽहममुकदेवायैतद्यानं ददानि। दक्षिणा पूर्ववत्।

1 A omits अर्चिताय, I. O. omits अर्चितं
2 A ॰सुदेव॰
3 A ॰देवतायैतत्
4 I. O. omits it
5 I. O. पतते
6 A ॰वर्षं
7 A अद्यादित्य॰
8 A ॰छत्रदानकाम॰
9 A ॰देवतायै एतच्छत्रं
10 I. O. दैवते
11 A अर्चिताभिमत॰
12 A अद्यानन्त॰
13 I. O. वाप्युपानहे
14 I. O. धर्मश्च विप्रेभ्योऽपि
15 A omits ॐ, I. O. reads ॐ अद्यादितुर्माग्निष्टोम॰

तथा (३।२८८।४२ख):—

निवेद्य [1]शस्यानि तथा [2]गतिमाप्नोत्यनुत्तमाम्[3] ।

[4]शस्यानि [5]धान्ययवादीनि अर्चितानि । [6][अभिमतदेवाय [7]शस्यान्यर्चितानि] [8]दद्यात् । [9]ॐ अद्यानुत्तमगति-[10]प्राप्तिकामोऽहममुक-[11]देवायैतानि [12]शस्यानि [13]ददानि । दक्षिणा पूर्ववत् ।

[14]तथा :—

[15]उपधानप्रदानेन श्रियमाप्नोत्यनुत्तमाम्[16] ॥११॥

[17]उपधानं [18]स्नानपूजाद्युपयोगिकलसादिकम् [19]अर्चितायाभिमतदेवायार्चितं कलसादीनामन्यतमं दद्यात् । [20]ॐ अद्यानुत्तमश्रीप्राप्तिकामोऽहममुकदेवायैतदुपधानं[21] ददानि । दक्षिणा पूर्ववत् ।

तथा (३।२८८।२५ख, cf ३।३१०।२२ख) :—

राजलिङ्गप्रदानेन [22]राजैव भवति क्षितौ ।

[23][राजलिङ्गं कनकदण्डादि] । [24]अर्चितायाभिमतदेवायार्चितं[25] राजलिङ्गं दद्यात् । ॐ अद्य क्षितिराज्यप्राप्तिकामोऽहममुकदेवायैतद्राजलिङ्गं ददानि । दक्षिणा पूर्ववत् ।

[26]तथा (३।३८८।२५क) :—

विभूषणप्रदानेन राजा भवति भूतले ॥१२॥

---

1 A शस्याणि
2 I. O. अनुत्त०, A वि०
3 A ०त्तमं
4 A शस्याणि
5 I. O. धान्ययवान्ययवादीनि
6 I. O. अभिमतदेवं च शस्यान्यर्चि-तानि
7 A शस्यान्यर्चितानि
8 A ददानि
9 A omits it
10 A ०प्राप्नो०
11 A ०देवतायैतानि
12 A शस्याणि
13 I. O. and A दद्यात्
14 A omits it
15 I. O. उपधान०
16 A ०त्तमं
17 I. O. उपधानं
18 I. O. स्नानं
19 I. O. अनुत्तम श्रीअर्चितान्यभिमत०
20 A omits it
21 I. O. ०मुपस्करं
22 A राजैव
23 I. O. reads the bracketed portion as राजलिङ्गी कनकदण्डादि
24 I. O. अर्चितायाभिमत०
25 I. O. ०र्चित
26 A omits it

विभूषणं मुक्ताहारकेयूरकङ्कणादि। अर्चिताय देवायार्चितं मुक्ताहारादीनामन्यतमं विभूषणं दद्यात्। ॐ अद्य क्षितिराज्य[1]-प्राप्तिकामोऽहं भगवते अमुकदेवाय विभूषणं ददानि। दक्षिणा पूर्ववत्।

तथा (३।२८८।१४) :—

प्रतिपाद्य तथा भक्त्या ध्वजं त्रिदशवेश्मनि।
निर्दहत्याशु पापानि महापातकजान्यपि ॥१३॥

अर्चितायाभिमतदेवाय ध्वजमर्चितं दद्यात्। ॐ अद्य [2]पापापनोदकामोऽहम् अमुकदेवायैतं ध्वजं ददानि। दक्षिणा पूर्ववत्।

भूमिं कृत्वा तु यः कुर्याद्देवब्राह्मणसान्नरः।
स्वर्गलोकमवाप्नोति पुरुषोऽतिसुदारुणः ॥१४।

अतिसुदारुण इत्यत्रापिशब्दोऽध्याहार्यः[3]। [4]तेनातिदारुणोऽपि स्वर्गं प्राप्नोतीत्यर्थः। अर्चितायाभिमतदेवायार्चितां[5] [6]भूमिं दद्यात्। [7]ॐ अद्य स्वर्गलोकप्राप्तिकामोऽहममुक[8]देवायैतां प्रियदत्तां भूमिं ददानि। [9]दक्षिणा पूर्ववत्।

तथा (३।२८८।२६क) :—

[10]वस्त्रदानेन लोकेऽस्मिन् [11]सुवेशस्त्वभिजायते।

अर्चितायाभिमतदेवायार्चितं वस्त्रं दद्यात्। अद्येतल्लौकिकसुवेशत्वप्राप्तिकामोऽहममुक[12]देवायैतद्वस्त्रं ददानि। दक्षिणा पूर्ववत्।

तथा :—

फलानि दत्त्वा देवेभ्यः सफलां[13] विन्दति क्रियाम् ॥१५॥

[फलानि बीजपुरादीनि][14] अर्चितायाभिमतदेवाय फलं बीजपूरादिफलानामन्यतमं दद्यात्। ॐ अद्य[15] विष्णुधर्मोत्तरोक्तदेवसम्प्रदानकफलप्राप्तिकामोऽहं [16]भगवतेऽमुक[17]देवायैतानि फलानि ददानि। दक्षिणा पूर्ववत्।

1 A omits राज्य
2 A पापापनोदककामोहम्
3 A ०ध्यत्राध्याहार्यः
4 I. O. तेतानि दाराध्यपि, A तेनाति दारुणं
5 A ०र्चितं, I. O. ०र्चिताय
6 I. O. adds सतद्रूपकीतां before भूमिं
7 A omits it
8 A ०देवतायैतां
9 A दक्षिणा
10 I. O. वस्त्रप्रदानेन
11 A परेसद्गतिजायते
12 A ०देवतायैतद्वस्त्रं
13 I. O. सफलं
14 I. O. omits the bracketed portion
15 I. O. and A अद्यादि
16 I. O. भगवतो०
17 A ०देवतायैतानि

तथा :—

गीतवाद्यप्रदानेन सौख्यं प्राप्नोत्युनुत्तमम्[1] ॥१६॥

गीतवाद्ययोरन्यतरदुभयं [2]वाऽभिमतदेवाग्रे [3]सङ्कल्प्य कारयेत्। [4]ॐ अनुत्तम-सौख्यप्राप्तिकामोऽहं भगवते अमुकदेवाय[5] गीतं दास्ये। वाद्यदान [6]उभयदाने वा वाद्यं दास्ये इति वाक्ये विशेषः।

तथा :—

प्रेक्षणीयप्रदानेन रूपवान् भुवि जायते।
औज्ज्वल्यमाप्नोति तथा यत्र यत्राभिजायते ॥१७॥

प्रेक्षणीयं दृश्यं सङ्कल्प्याभिमतदेवताभ्यो [7]दातव्यम्।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे सामान्यदेवता-[8]सम्प्रदानकदानावर्तः।

1 I. O. ०त्तमां
2 I. O. चाभिमतदेवाग्रे, A वाऽभि-मतदेवाग्र
3 A संकल्प्य
4 A omits it
5 I. O. omits it
6 I. O. उभयदानमेव
7 I. O. दातव्यानि
8 I. O. ०प्रदानदानावर्त्तः, A संप्र-दानावर्त्तः

अथ सूर्यसम्प्रदानकदानावर्तः । (७३)

[1]भविष्यपुराणे (१।६३।५७, ५८ख) :—

> [2][गावो वाथ महिष्यो वा] [3]गजानश्वांश्च शोभनान् ।
> यः प्रयच्छति सूर्याय तस्य पुण्यफलं [4]लभेत् ।
> सहस्रगुणितं [5]तत्र [6]दानमस्योपतिष्ठति ॥१॥

[7]दानमस्योपतिष्ठतीति दीयत इति दानं [8][गोमहिष्यादि एतदपि] [9]सहस्रगुणमुपतिष्ठति इत्यर्थः । अत्र यजमानो [10]गाः शोभना [11][उपादाय अर्चिताय] भगवते सूर्याय दद्यात् । ॐ अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानकानियत[12]-संख्य-[13][गवीदानफलप्राप्तिकामो[14][ऽहं सूर्याय] गवीर्ददानि[15] । दक्षिणा पूर्ववत् । महिषीदाने] [16]गवीपदस्थाने महिषीपदनिवेशो विशेषः । शोभनगजदाने गजपदप्रक्षेपः[17] । [18]शोभनाश्वदाने अश्वपदप्रक्षेपः ।

तथा (१।६३।४८-४६) :—

> गोयुक्त-[19]मश्वयुक्तं[20][वा यो [21]दद्याद् रवये रथम् ।
> काञ्चनं]वापि रौप्यं वा [22]मणिरत्नान्वितं शुभम् ॥२॥

1 A भविष्ये
2 Bh. P. reads the b. p. as गा वाथ महिषीर्वापि
3 I. O. गजानाश्वांश्च
4 Bh. P. भृशं
5 Bh. P. तच
6 I. O. दानमस्योपतिष्ठति
7 I. O. दानमस्योपतिष्ठतीति
8 I. O. reads the bracketed portion as गोमहिष्यादिमते तदपि
9 I. O. सहस्र' for सहस्र
10 A गां
11 I. O. उपादायान्यमर्चिताय and A उपादयो चर्चिताय for the bracketed portion
12 I. O. नि for नियत
13 I. O. omits the bracketed portion
14 A omits the bracketed portion
15 A गवीर्ददाति
16 I. O. गवीर्दादस्थाने
17 A ०प्रक्षपं
18 I. O. शोभमश्वं दाने. A अश्वदाने
19 A and I. O. मश्वयुक्तं' for मश्वयुक्तं
20 A omits the bracketed portion
21 Corrected from Bh. P. I. O. ददाति रवे
22 Corrected from Bh. P. I. O. मणिरत्नान्वितं and A मणिभौरन्वितं

स यानेनार्कवर्णेन किङ्किणीजालमालिना ।
स्वर्गलोकमितो गत्वा क्रीडते [स भवाङ्गने][1] ॥३॥

यथेच्छं सौवर्णमारोहणादियोग्यं रथं निर्माय मुक्तामाणिक्यालङ्कृतं कृत्वा कर्षकवृषयुगसहितमश्वयुग-[2][सहितं वार्चितमर्चिताय]सूर्याय दद्यात् । ॐ[3] अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानककाञ्चनरथदानफलप्राप्तिकामोऽहं भगवते सूर्याय [4]एतं गोयुक्तं काञ्चनं मणि-[5]रत्नखचितं रथं ददानि । दक्षिणा पूर्ववत् । अश्वयुक्तदाने तु गोपदस्थाने अश्वपदनिवेशो विशेषः । रौप्यरथदाने तु[6] काञ्चनपदस्थाने रौप्यपदनिवेशो विशेषः ।

तथा (१।६३।५०) :—

यस्तु दारुमयं कुर्याद्रवे[7] रथमनुत्तमम् ।
स यात्यर्कवर्णेन विमानेनार्कमण्डलम् ॥४॥

दारुमयं रथमर्चितम् अर्चिताय रवये दद्यात् । [8]ॐ अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानकदारुमयरथदानफलप्राप्तिकामोऽहं [9][भगवते रवये] [10]एतं रथं ददानि । दक्षिणा पूर्ववत् ।

तथा (१।६३।६८-७०) :—

पुस्तकं भानवे दद्याद् भारतञ्च[11] गणाधिप[12] ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥५॥
रामायणञ्च[13] दत्त्वा तु पुस्तकं त्रिपुरान्तक ।
वाजपेयफलं प्राप्य गोपतेः [14]पुरमाव्रजेत् ॥६॥

---

1 I. O. ऋटभवाङ्गनैः and Bh. P. इमरसा सह for the bracketed portion
2 I. O. सहितार्चितमर्चिताय and A सहितम्वार्चिताय for the bracketed portion
3 A omits it
4 A omits एतं
5 I. O. ०रत्नचितं, A ०रचितं
6 A adds वाक्यं after this
7 A कुर्याद्रवि
8 A omits it
9 I. O. रवये भगवते for the bracketed portion
10 A तुभ्यं
11 I. O. and Bh. P. भारतस्य
12 I. O. and A गणाधिपः
13 I. O. and Bh. P. रामायणस्य
14 A पदमाव्रजेत्

गोपतेः सूर्यस्य ।

भविष्यं शाम्बसंज्ञञ्च दत्त्वा सूर्याय पुस्तके ।
[1]राजसूयाश्वमेधाभ्यां फलमाप्नोति मानवः ॥७॥

भारतपुस्तकमर्च्चिताय भानवे दद्यात् । ॐ अद्य सर्वपापापगमपूर्वकसोत्कर्षविष्णुलोक-प्राप्तिकामोऽहं[2] भगवते सूर्याय एतद्भारतपुस्तकं ददानि । [3][दक्षिणा पूर्ववत् ।] एवं [4][रामायणपुस्तकदाने वाक्ये विशेषः] [5]वाजपेयफलप्राप्तिकामोऽहमेतद्रामायणपुस्तकमिति । भविष्यपुराण-[6]दानवाक्ये राजसूयफलप्राप्तिकामोऽहमेतद्भविष्यपुराण-[7]पुस्तकमिति । शाम्ब-पुराण-[8]दानवाक्ये अश्वमेधफलप्राप्तिकामोऽहमेतच्छाम्बपुराणपुस्तकमिति विशेषः ।

तथा (९१६३।४४) :—

दत्त्वा वासांसि सूर्याय अलङ्कारांस्तथैव च ।
[9]क्रीडतेऽण्डजलोकस्थो यावदाभूतसंप्लवम् ॥८॥

[10]अलङ्कारान् [11]हारमुकुटकटकाङ्गुरीयकादीन् [12]अण्डजलोकस्थ इति सूर्यलोकस्थः । [13]यथेच्छं वस्त्राण्यर्च्चिताय सूर्याय दद्यात् । ॐ अद्याभूतसंप्लवावधि[14] सोत्कर्षसूर्यलोकावस्थान-प्राप्तिकामोऽहं भगवते सूर्याय एतानि वासांसि ददानि । दक्षिणा पूर्ववत् । अलङ्कार-दाने उक्तवाक्ये [15]वासःपदस्थाने अलङ्कारपदनिवेशो विशेषः ।

तथा (९१६३।४१-४३) :—

छत्रं ध्वजं वितानं वा पताका-[16]श्चामराणि च ।
हेमदण्डानि [17][यो दद्याद्रवेश्च भक्तिमान्नरः] ॥६॥

[18]ध्वजश्चामरपताकान्वितचिह्नदण्डः । वितानं [19]चन्द्रातपः ।

---

1 A वाजपेयाश्वमेधाभ्यां
2 A ०कामोऽह
3 I. O. reads the bracketed portion as पूर्व्ववद्दक्षिणा
4 A reads the bracketed portion as रामायणदानवाक्ये
5 I. O. राजसूय for वाजपेय
6 I. O. दाने for दान
7 A ०पुस्तकमिदं
8 I. O. दाने for दान
9 A क्रीडते अण्डजलोकस्थो and Bh. P. क्रीडते जन०
10 I. O. अलङ्कार ०
11 I. O. हारमुकुटकाङ्गुलीकादीन्, A मुकुटकटकाङ्गुलियकादीनि
12 A जालजलोकस्थ
13 A यथेच्छ
14 I. O. ०संप्लवावधि
15 I. O. वास and A वस्त्र for वासः
16 A ०श्चामरं तथा
17 A ये दत्वा तेन वै भक्तिमान नराः, I. O. यो दद्यान्नरैश्च भक्तिमान्नरः, Bh. P. वै दद्याद्रवेर्यो भक्तिमान्नरः
18 A ध्वजश्चामरपताकान्वित-दण्डे चिह्नध्वजक
19 A चन्द्रातपं

विमानेन स दिव्येन किङ्किणीजालमालिना ।
सूर्यलोकमितो गत्वा भवत्यप्सरसां पतिः ॥१०॥
[1]ततोष्य सुचिरं कालं स्वर्गात् [2]प्रत्यागतः पुनः ।
[3]मानुष्यो जायते राजा [4]सर्वराजनमस्कृतः ॥११॥

[5]रवयेऽर्चितायार्चितं छत्रं दद्यात् । [6]ॐ अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानक-छत्रदान-[7]फलप्राप्तिकामोऽहं भगवते [8]रवये एतच्छत्रं ददानि । दक्षिणा पूर्ववत् । ध्वजादि-दानवाक्ये तु छत्रपदस्थाने [9]तत्तत्पदनिवेशो विशेषः ।

तथा (१।६३।६७) :—

[10]वाद्यकदम्बकं यस्तु दद्यात् सूर्याय भक्तितः ।
स गच्छेत् परमं स्थानं यत्र तिष्ठति भानुमान् ॥१२॥

[11]वाद्यसमूहम-[12]र्चितमर्चिताय सूर्याय भक्तिपूर्वकं दद्यात् । ॐ अद्य भास्कर-परम[13]-लोकप्राप्तिकामोऽहं भगवते सूर्यायेत-[14]द्वाद्यकदम्बं ददानि । दक्षिणा पूर्ववत् ।

तथा :—

[15]भेर्यादीनि च वाद्यानि शंखवेणवादिकानि च ।
ये प्रयच्छन्ति सूर्याय यान्ति ते हंसमन्दिरम् ॥१३॥

वाद्यानि वाद्यभाण्डानि । अर्चिताय सूर्याय भेरीमर्चितां[16] दद्यात् । ॐ अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानक-भेरीदान-फलप्राप्तिकामोऽहं भगवते [17]सूर्यायैतां भेरीं ददानि । दक्षिणा पूर्ववत् । [18]शंखदानवाक्ये भेरीपदस्थाने शंखपदनिवेशो विशेषः ।

---

1 A ततापि
2 A प्रत्यागतं
3 A मनीषा, Bh. P. मानुष्यं
4 A सर्व्वराजानमस्कृते
5 I. O. नरायार्चितायार्चितं
6 A omits it
7 A omits फल
8 I. O. omits रवये
9 I. O. [illegible], A [illegible]
10 I. O. and Bh. P. वेश्मा for वाद्य
11 I. O. वेश्मा for वाद्य
12 I. O. ०र्चितामर्चिताय, A ०र्चितायार्चिताय
13 A पर for परम
14 I. O. द्वेश्माकदम्बं, A ०द्वाद्यसमूहं
15 I. O. भेर्यादि
16 I. O. and A ०मर्चितं
17 A सूर्यायैतां
18 I. O. शङ्खदाने तु वाक्ये

तथा (१।६३।५९-६०क) :—

महीं ददाति योऽर्काय [1]कृष्यां फलवतीं[2] शुभाम् ।
स तारयति वै वंशान् दशपूर्वान् [3]दशावरान् ।
[4]विमानेनार्कवर्णेन [5][गोपुरं [6]गोपतेर्व्रजेत् ॥१४॥

कृष्यां कृषिसमेतां गोपतेः सूर्यस्य । अर्चितार्काय यथोक्तभूमिमर्चितां दद्यात् । ॐ अद्य भविष्यपुराणोक्तार्कसम्प्रदानक-[7]बहुदानफलप्राप्तिकामोऽहं भगवतेऽर्काय एतां फलवतीं प्रियदत्तां महीं ददानि । दक्षिणा पूर्ववत् ।

तथा (१।६३।६१) :—

ग्रामं तु दद्यात् सूर्याय यो भक्त्या मतिमान् [8]शुभम् ।
विमानेनार्कवर्णेन] स याति परमां गतिम् ॥१५॥

शुभं शोभनं वृक्षाद्यलङ्कृतमिति । [9]अर्चिताय सूर्याय यथोक्तमर्चितं ग्रामं दद्यात् । ॐ अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानकग्रामदानफलप्राप्तिकामोऽहं भगवते सूर्याय [10]एतं [11]शुभं ग्रामं ददानि । दक्षिणा पूर्ववत् ।

तथा (१।६३।६२) :—

[12]आरामान् ये प्रयच्छन्ति पत्रपुष्पफलोपगान्[13] ।
भानवे भक्तियुक्ताश्च[14] ते यान्ति परमां गतिम् ॥१६॥

[15]आरामो ग्रामसमीपस्थ-सजातीयनानातरुवनानि । यथेष्टसंख्या-[16]रामान्निर्मायार्चिताय सूर्याय दद्यात् । ॐ अद्य परमगतिप्राप्तिकामोऽहं भगवते सूर्याय [17]एतानारामान् ददानि । दक्षिणा पूर्ववत् ।

तथा :—

धनं धान्यं हिरण्यं वा वासांसि विविधानि च ।
ये प्रयच्छन्ति सूर्याय ते यान्ति परमां गतिम् ॥१७॥

1 Bh. P. कृष्टां
2 I. O. फलवतां
3 I. O. and Bh. P. दशापरान्
4 Bh. P. विमानेन च दिव्येन
5 A omits the bracketed portion
6 I. O. गोपते व्रजेत्
7 I. O. reads बहुदानफल twice
8 Bh. P. नरः
9 I. O. अर्चिता, A अर्चितो
10 I. O. एवं
11 A शुभ
12 I. O. अरोगार्थं, A आरोग्यार्थं
13 A ०फलोपगन्
14 A भक्तियुक्ताय, Bh. P. भक्तियुक्तस्तु
15 I. O. and A आराम
16 I. O. ०मयारामि०, A ०रामम्नि०
17 I. O. एतामारामां

धनं [1]सुवर्णं हिरण्यं [2]रजतं विविधानि च [3]वासांसि [4]कार्पासिककौशेयादीनि। भगवते सूर्यायार्चितं यथेच्छपरिमाणं [5]सुवर्णं दद्यात्। ॐ [6]अद्य परमगतिप्राप्तिकामोऽहं भगवते सूर्याय एतद्धनं ददानि। दक्षिणा पूर्ववत्। [7]धान्यदानवाक्ये इदं धान्यमिति [8]रजतदान इदं हिरण्यमिति विविधवासोदाने एतानि[9][विविधानि वासांसीति] विशेषः।

तथा (१।६३।३४-३५) :—

[10]सूर्याय तर्पणीं धेनुं गामेकां यः प्रयच्छति।

[11]कंजजामचलां प्राप्य पुनर्लेखपुरे[12] व्रजेत् ॥१८॥

[13]कंजजामचलां लक्ष्मीमत्यन्तस्थिरामित्यर्थः।

गोशरीरे तु रोमाणि यावन्ति [14]त्रिपुरान्तक।

[तावत्यो[15] वर्षकोट्यस्तु][16] लेखलोके महीयते ॥१९॥

तर्पणीं [17]तृप्तिकारिणीम् अर्चिताय [18]सूर्यायार्चितां यथोक्तरूपां गां दद्यात्। ॐ अद्य भविष्यपुराणोक्तसूर्यसम्प्रदानकतर्पणगवी[19]-दानफलप्राप्तिकामोऽहं भगवते सूर्यायैतां गां ददानि। दक्षिणा पूर्ववत्।

तथा (१।११८।५०ख-५२क) :—

षष्ठीं वा [20]सप्तमीं वापि प्रतिपत्तन्तु[21] यो नरः।

दीपं ददाति [22]दत्त्वा यत् फलं तस्य निबोध मे ॥२०॥

---

1 A रजतं
2 A मधतं
3 I. O. and A omit it
4 A कार्पासकौशेयादीनि
5 A रजतं
6 A अद्यादि
7 I. O. धान्यदाने वाक्ये
8 A सुवर्णदाने
9 A reads the bracketed portion as विविधानि वासांसीति
10 A च
11 I. O. कंवजामचनं
12 Bh. P. ०पुरं
13 A कंजजामचलं, I.O. कंवजामचलां
14 I. O. त्रिपुरान्तिकं
15 I. O. भावत्यो, A तावद्यो
16 Bh. P. स तावद्वर्षकोटीषु for the b. p.
17 I. O. तृप्तिहेतुनां
18 A omits सूर्याय
19 I. O. ०गवां
20 A सप्तमीं
21 Bh. P. ०श्च
22 Bh. P. यत्नात्

[कार्पूरं मणिमुक्ताढ्यं][1] मनोज्ञमतिशोभनम् ।
[2]दीपमालोज्ज्वलं दिव्यं विमानमधिरोहति ॥२१॥

शुक्लकृष्णा। त्ममनश्विन्यां[3] षष्ठ्यां सप्तम्यां वा गृहीतोदपूर्णताम्रपात्र उदङ्मुखः सूर्याय दीपं सङ्कल्प्य दद्यात् । ॐ [4][दीपमालोज्ज्वल-मणिमुक्ताढ्यातिं]-शोभनदिव्यहैमविमानाधिरोह-[5][प्राप्ति कामोऽहं]-[6]मियन्तं कालं यावद् भगवते सूर्याय शुक्लकृष्णषष्ठ्यां[7] प्रदीपं दास्ये इति सङ्कल्प्य दद्यात् । एवं सप्तम्यां [8]दाने वाक्ये षष्ठीपदस्थाने सप्तमीपदनिवेशः ।

तथा (१।१०३।४०-४१) :—

यस्तु संवत्सरं पूर्णंतिलपात्र-[9]प्रदो नरः ।
ध्वजञ्च भास्करे दद्यात् सममत्र फलं [10]हरेत् ॥२२॥
विधुनोत्यतिवातेन [11]दातुरज्ञानतः कृतम् ।
पापं [12]दातुर्गृहे भानुर्दिवारात्रं न संशयः ॥२३॥

अर्चिताय भास्करायार्चितं ध्वजं दद्यात् । ॐ अद्य भविष्यपुराणोक्त-[13]सूर्यायतन-ध्वजदान-[14]फलप्राप्तिकामोऽहं भगवते भास्कराय ध्वजं ददानि । दक्षिणा पूर्ववत् ।

गोशतं भानवे दत्त्वा राजसूयफलं लभेत् ।
अश्वमेधफलं तस्य यः सहस्रं प्रयच्छति ॥२४॥ (१।६३।३६)

अर्चिताय भानवे [15]गोशतमर्चितं दद्यात् । ॐ अद्य[16] राजसूयफलप्राप्तिकामोऽहं भगवते भानव एताः शतं गाः[17] ददानि । दक्षिणा पूर्ववत् । [18]गोसहस्रदानवाक्ये [19]त्वश्वमेधफलप्राप्तिकामोऽहमेताः[20] सहस्रं गा इति विशेषः ।

1 Bh. P. काञ्चनं मणिमुक्ताढ्य for the p. b.
2 I. O. दीपमालङ्कृत्य, Bh. P. दीपमालाकुलं
3 I. O. ०मन्वश्विन्यां A ०मश्विन्यां
4 I. O. दीपमालाकुलमणिमुक्ताप्यति for the bracketed portion
5 A omits the bracketed portion
6 I. O. मियत्तं
7 I.O. शुक्लकृष्णपक्षौ, A शुक्लपक्षषष्ठ्यां
8 A इदानि
9 A ०प्रदानतः
10 A and Bh. P. लभेत्
11 I. O. दान्तवाक्यावतः
12 Supplied from Bh. P. A केतुर्गृहे, I. O. केतुगृहे
13 A सूर्यायायतनं
14 A omits फल
15 I. O. गोशतमन्य
16 A omits it
17 I. O. and A गा
18 I. O. गोसहस्रदाने वाक्ये, A गोसहस्रदानवाक्ये
19 A अश्वमेध०
20 A ०मेता

विमानमतिविद्योति सर्वरत्नमयं दिवि ।
संप्राप्नोति नरो दत्त्वा दीपकं भास्करालये[1] ॥२५॥

[2][भास्करालये दीपदानं सङ्कल्प्य] दद्यात् । [3]ॐ अतिविद्योति-सर्वरत्नमयविमान-सहित[4]-स्वर्गप्राप्तिकामोऽहं भास्करालये [दीपं ददानि][5] ।

तथा :—

दीपं प्रयच्छति [6][यो हि] भानोरायतने महत् ।
तेजसा हरिसङ्काशः सर्वयज्ञफलं लभेत् ॥२६॥

महदिति क्रियाविशेषणम् । [7][तैलवर्तियुक्तं[8] वृत्तस्थितं महान्तं दीपं प्रयच्छतीत्यर्थः] ।

कार्तिके तु विशेषेण [9]कौमुदे मासि दीपकम् ।
दत्त्वा फलमवाप्नोति यदन्येन न लभ्यते ॥२७॥

कार्तिके मासि कौमुदे शुक्लपक्ष इत्यर्थः । भानोरायतने [10][प्रत्यहं दीपं] सङ्कल्प्य दद्यात् । ॐ अद्य भविष्यपुराणोक्त-[11]सूर्यायतनदीपदानफलप्राप्तिकामोऽहं भानोरायतने महान्तं[12] दीपं दास्ये । कार्तिकशुक्लपक्षाभिमतदीपदाने तु ॐ भविष्यपुराणोक्तकार्तिककौमुदपक्ष[13]-विहित-भास्करालयदीपदानफलप्राप्तिकामोऽहमिति विशेषः ।

ब्रह्मपुराणे :—

छत्रं ध्वजं वितानं वा पताकाश्चामराणि च ।
श्रद्धया भानवे दत्त्वा गतिमिष्टामवाप्नुयात् ॥२८॥

अर्चिताय सूर्यायार्चितं छत्रं श्रद्धापूर्वकं दद्यात् । ॐ अद्यामुकगतिप्राप्तिकामोऽहं भगवते सूर्याय एतच्छत्रं ददानि । दक्षिणा पूर्ववत् । ध्वजादिदाने तु वाक्ये[14] एतं

1 A भास्करालयेत
2 A दीपं सङ्कल्प for the bracketed portion
3 A omits it
4 I. O. ०सहितं
5 I. O. दीपदानि for the bracketed portion
6 A नरो for the bracketed portion
7 I. O. तैल वर्तिदीपवृत्ताद्युत्कर्षान्महान्तं दीपं प्रयच्छतीत्यर्थः for the bracketed portion
8 A ०दीपं
9 Bh. P. कौमारे
10 I. O. दीपं प्रशस्तं for the bracketed portion
11 I. O. ०सूर्यलोक०
12 A महतीं, I. O. omits it
13 I. O. omits पक्ष
14 I. O. omits it

ध्वजम् [1]एतद्वितानम् एतां पताकाम् [2]एतच्चामरमिति विशेषः। अत्र [3]यदन्यदप्यपेक्षितं द्रव्यं तत् सूर्याय दातव्यम्।

तथा भविष्यपुराणम् :—

[4][यद् यदिष्टतमं द्रव्यं दुर्लभं यच्च विद्यते]।
तत्तु दत्त्वा जगद्धात्रे भास्कराय न सीदति ॥२६॥

तत्तद्दाने [5]चोक्तवद्दानवाक्यान्यूहनीयानि।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेव-विरचिते श्रीदानसागरे [6]सूर्यसम्प्रदानकदानावर्तः।

1 A एतं वितानं
2 A एतच्चामरमिति, I. O. एतच्चा-मरमिति
3 I. O. यावद्यस्यापेक्षितं
4 I. O. यथाभीष्टद्रव्यं for the bracketed portion
5 I. O. चोक्तधन्तरो दानवाक्यादूहनी-यानि, A चोक्तविधाद्दानवाक्यान्यूह-नीयानि
6 I. O. सूर्यसम्प्रदानदानावर्तः, 'A' [illegible]नावर्तः

[1]अथ महेश्वरसम्प्रदानकदानावर्तः। (७४)

स्कन्दपुराणे[2] महेश्वरवाक्ये :—

[3][यो मे] गान्तु हिरण्यं वा दद्यादविमना:[4] प्रिये ।
लोकान् ददाम्यहं तस्मै सर्वलोकसमर्चितान्[5] ॥१॥

[6]अत्र फलोत्कर्षश्च तेर्दक्षिणाबाहुल्यम् । तदेव यजमान:[7] समभ्यर्च्यार्चिताय [शिवाय गां हिरण्यं वा][8] दद्यात् । ॐ अद्य सर्वलोकसमर्चितलोकप्राप्तिकामोऽहं भगवते महेश्वराय एतां गां ददानि । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं भगवते महेश्वरायाहं दक्षिणामेतत् काञ्चनं ददानि । [9][हिरण्यदानवाक्ये गामिति पदस्थाने हिरण्यमिति]पदनिवेशो विशेषः ।

तथा :—

वृषभं वा प्रयच्छेत श्वेतं नीलमथापि वा ।
स कुलानामुभयत-[10]स्तारयेदेकविंशतिम् ॥२॥

श्वेतं वृषमर्चितमर्चिताय महेश्वराय दद्यात् । ॐ अद्य स्कन्दपुराणोक्तश्वेतवृषभदान-फलप्राप्तिकामोऽहं भगवते महेश्वरायैतं वृषभं ददानि । दक्षिणा पूर्ववत् । नील-[11]वृषभ-[12]दानवाक्ये श्वेतपदस्थाने नीलपदनिवेशो विशेषः ।

तथा :—

[13]शालिपिष्टमयीं कृत्वा [14]यो मे [15]प्रतिकृतिं [16]शुभाम् ।
[17][सर्वगन्धरसैर्युक्तां निर्यासैश्च] [18]सुसंस्कृताम् ॥३॥

1 A omits it
2 I. O. omits it
3 A यस्तु for the bracketed portion
4 I. O. ०धिमना:, A ०विमना
5 I. O. ०समन्विताम्
6 I. O. अविम्बितु before this
7 I. O. यजमानो
8 I. O. शिवेकवित्तो for the bracketed portion
9 I. O. वाक्ये हिरण्यपदमिति for the bracketed portion
10 I. O. ०स्तानयोदकविंशति, A ०स्तावयेदकविंशति
11 A ०वृष०
12 I. O. ०दाने०
13 A शाली०
14 I. O. या
15 I. O. प्रतिकृति
16 I. O. सुक्तां, A सुक्ता:
17 A सर्व्वगन्धैः सर्व्वरसैर्निर्यासैश्च for the bracketed portion
18 A प्रतिष्ठितां, I. O. सुसंस्कृतां

सर्वगन्धाः सर्वरसाः परिभाषोक्ता [1]ग्राह्याः । निर्यासः सरलद्रवादिरूपः ।

[2]भक्ष्यभोज्यैश्च विविधैः कृष्णपक्षचतुर्दशीम् ।
पूर्वदक्षिणयोश्चात्र पश्चिमोत्तरयोस्तथा ॥४॥

कृष्णपक्षचतुर्दशीं प्राप्येति शेषः ।

पार्श्वेषु हरितालञ्च कृष्णागुरुमनःशिलाम् ।
[3]चन्दनञ्चैव दद्याद्वै यथासंख्येन [4]पूजिताम् ॥५॥

यथासंख्येन हरितालादि दत्त्वा तां दद्यादिति सम्बन्धः ।

तस्य पुण्यफलं देवि [5][शृणुयान्मे तु कामिनि] ।
सर्वव्याधिविनिर्मुक्तस्तथा [6][निष्कल्मषः परः] ॥६॥
वर्षकोटिशतान्यष्टौ दिवि भुक्त्वा महासुखम् ।
इहलोके सुखी जातो मामेव [7]प्रतिपद्यते ॥७॥

[8]यथेच्छकृष्णचतुर्दशीदिने प्रतिमां शालिपिष्टेन निर्माय सर्वगन्ध-[9]षड्रस-[10]निर्यासान्विताञ्च कृत्वा [11]तस्या यथोक्तदिक्क्रमेण हरिताल-कृष्णागुरु-मनःशिलाचन्दनानि स्थापयित्वा [12]मूलफलान्नानि पार्श्वेषु निधायार्चिताय महेश्वराय स्कन्दपुराणोक्त[13]-प्रतिकृतिदानफलप्राप्तिकामोऽहमेतां शालिपिष्टमयीं सर्वरसगन्धनिर्यासैः सुसंस्कृतां [14]भक्ष्यभोज्यसहितां हरिताल-कृष्णागुरु मनःशिला-चन्दनयुतां सुप्रतिकृतिं ददानि । दक्षिणा पूर्ववत् ।

तथा :—

छत्रं दद्याच्च यः सोऽपि दीप्यते [15]तेजसा दिवि ॥८॥

अर्चिताय महेश्वराय छत्रमर्चितं दद्यात् । ॐ अद्य भगवते महेश्वराय स्कन्दपुराणोक्त-शिवसम्प्रदानक-छत्रदानफलप्राप्तिकामोऽहमेतच्छत्रं ददानि ।

1 I. O. ग्राह्य:
2 I. O. and A भक्ष्य०
3 A चन्दनमर्घं व
4 I. O. पूजितं
5 I. O. शृणुयान्मर्त कामिनि for the bracketed portion
6 A निष्कल्मषः परः, I. O. निष्कल्मषवह
7 A प्रतिपद्यते
8 A यथेष्ट०
9 A रसरस
10 I. O. निर्यासायान्विताञ्च
11 I. O. तस्यां
12 A मूलफलानि
13 A omits क्त
14 I. O. भक्ष्य०, A भोज्य०
15 I. O. तेजसा

तथा :—

[1]रत्नावलीन्तु यो दद्याद् [2]ब्राह्मणः क्षत्रियोऽथ विट् ।
शूद्रः स्त्री वा [3]स मे लोके [4]मत्सौख्यं [5]प्राप्नुयात् परम् ॥९॥

अर्चिताय शिवाय यथाशक्ति [6]मुक्तादिमालाम् [7]अर्चितां दद्यात् । ॐ अद्य भगवते महेश्वराय [8][शिवलोके परशिव]-सौख्यप्राप्तिकामोऽहमेतां [9]रत्नावलीं ददानि । दक्षिणा पूर्ववत् ।

दीपमालान्तु [10][यः कुर्यात्] कार्त्तिके मासि वै मम ।
अवसाने च दीपानां ब्राह्मणांस्तर्पयेच्छुचिः ।
[11]गणाधिपत्यं लभते दीप्यते च रविर्यथा ॥१०॥

[12]कार्त्तिके यथेष्टपुण्यदिने[13] शिवाय दीपमालादानं[14] सङ्कल्पयेत् । ॐ [15]अद्य रवि-[16]समप्रभत्वविशिष्ट-[17]गणाधिपत्यप्राप्तिकामोऽहं भगवते महेश्वराय सायंसमये दीपमालां दास्ये [18][इति सङ्कल्प्य] यथेच्छदीपमालां तद्दिने दद्यात् । दीपमालादानसमाप्तौ यथेच्छ-संख्य-[19]ब्राह्मणान् [20]सुवर्णादिभिस्तर्पयेत् ।

[21]तथा :—

यस्तु क्षेत्रं प्रयच्छेत निष्पन्नं फलवन्नरः ।
स तु क्षेत्रं पुमान् भुक्त्वा प्राजापत्यं समश्नुते ॥११॥

क्षेत्रं भुक्त्वेत्यर्थः । निष्पन्नपक्वशस्यक्षेत्रमर्चिताय महेश्वराय दद्यात् । ॐ अद्य

1 I. O. रत्नावलिन्तु, A मुक्तावलिन्तु
2 I. O. ब्राह्मण
3 I. O. सम for स मे
4 I. O. मत्सौख्यं, A मत्सौख्यं
5 A प्राप्नुयात्, I. O. प्राप्नुते
6 A मुक्तावलिं
7 I. O. अर्चितं, A अर्चिताम्
8 A शिवलोकपरम्पर for the bracketed portion
9 A मुक्तावलिं
10 A यो दद्यात् for the bracketed portion
11 I. O. गणाधिपत्यं
12 I. O. कार्त्तिक
13 A तिथिदिने for दिने
14 I. O. दीपमालां
15 A omits अद्य
16 A ०समप्रभवत्व०, I. O. ०सप्रभवे०
17 I. O. गणाधिपत्य०
18 A omits the bracketed portion
19 I. O. and A ब्राह्मणान्
20 A सुवर्णादिभिस्तर्पयेत्
21 A यथा

महेश्वरसम्प्रदानकपक्कशस्यक्षेत्रदानफलप्राप्तिकामोऽहं[1] भगवते महेश्वराय एतां निष्पन्नशालिनीं [प्रियदत्तां क्षेत्र][2]-भूमिं ददानि। दक्षिणा पूर्ववत्।

तथा :—

गोचर्मद्वयमानं[3] वा यो मे दद्याद्वसुन्धराम्।
[4][स मे]पुरं समासाद्य गणेशैः सह मोदते ॥१२॥

भूमिदानावर्तोक्त-गोचर्मद्वयपरिमाणां भूमिमर्चितामर्चिताय[5] महेश्वराय दद्यात्। ॐ अद्य सगणेश-क्रीडासहित-शिवपुरप्राप्तिकामोऽहं [6][भगवते महेश्वरायैतां] गोचर्मद्वयपरिमाणां प्रियदत्तां भूमिं ददानि। दक्षिणा पूर्ववत्।

शिवपुराणे :—

यस्तु छत्रं प्रयच्छेत मम [7]ताराधिपानने।
तेजोमण्डलसङ्काशं दिवि [8]व्रजति शुक्रवत् ॥१२॥

तेजोमण्डलसङ्काशं [9]शुभ्रं प्रशस्तं छत्रमित्यर्थः। अर्चिताय [10]शिवायार्चितं छत्रं दद्यात्। ॐ अद्य शिवपुराणोक्त-शिवसम्प्रदानक-च्छत्रदानफलप्राप्तिकामोऽहं भगवते [11][शिवायैतं छत्रं] ददानि। दक्षिणा पूर्ववत्।

यश्च गावो हिरण्यं वा [12][समुद्दिश्य तु मां] वदेत्।
तस्य कामदुघां पृथ्वीं ददामि निरुपद्रवाम् ॥१४॥

अर्चिताय शिवाय [यथेच्छसंख्यया गा][13] [अद्यादि तुभ्यमन्तमुक्त्वा दद्यात्][14]। ॐ अद्य कामदुघ[15]-निरुपद्रवपृथ्वीप्राप्तिकामोऽहं भगवते महेश्वरायैतां गां ददानि। दक्षिणा पूर्ववत्। हिरण्यदानवाक्ये[16] गोपदस्थाने हिरण्यपदनिवेशो विशेषः।

1 I. O. ह for हं
2 A प्रियदत्ता क्षेत्रं for the bracketed portion
3 I. O. वास्तं for मानं
4 I. O. सोम for the bracketed portion
5 A omits अर्चिताय
6 A एतां for the bracketed portion
7 I. O. ताराधिपानने, A भारविपानने
8 A व्रजति
9 A दिवि
10 A शैवयोरर्चितं
11 A शिवाय एतच्छत्रं for the bracketed portion
12 A समुद्दिश्य तु माम्, I. O. सम उद्दिश्यतां for the bracketed portion
13 A यथेच्छसंख्यां गाम्, I. O. यथेच्छ-संख्यायात् for the bracketed portion
14 I. O. omits the bracketed portion
15 I. O. कामदुघा
16 I. O. हिरण्यदाने तु वाक्य

वृषभं [सम्प्रयच्छेत अग्रं][1] कृसरमेव च ।
रथेन वृषयुक्तेन न तस्य प्रलयो भवेत् ॥१५॥

रथेन [2]वृषयुक्तेन स्वर्गं [यातीति शेषः][3] । न तस्य प्रलयो भवेत् [4][स्वर्गान्न च्यवत] इत्यर्थः । अर्चिताय महेश्वरायार्चितं वृषं दद्यात् । ॐ [5][अद्य शिवपुराणोक्त]-[6]वृषदान-फलप्राप्तिकामोऽहं भगवते महेश्वरायैतं वृषभं ददानि । दक्षिणा पूर्ववत् ।

विष्णुधर्मोत्तरे (३।३०६।३६) :—

स्नपनार्थं तथा दत्त्वा [7][श्वेतां धेनुं शिवालये] ।
रुद्रलोकमवाप्नोति स्वर्गलोकञ्च गच्छति ॥१६॥

[8]श्वेतां धेनुं [9]बहुदुग्धाम-[10]र्चितामर्चिताय शिवाय दद्यात् । [11][ॐ अद्य विष्णुधर्मोत्तरोक्तरुद्रस्नपनार्थ-[12]श्वेतधेनुदानफलप्राप्तिकामोऽहं भगवते रुद्राय स्नपनार्थमेतां [13]श्वेतां धेनुं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३०६।४१ख) :—

श्वेतन्तु वृषभं दत्त्वा फलस्यानन्त्यमश्नुते ॥१७॥

अर्चिताय शिवायार्चितं श्वेतवृषभं दद्यात् ।] ॐ अद्य[14] विष्णुधर्मोत्तरोक्त-शिवसम्प्रदानक-श्वेतवृषभ[15]-दानफलप्राप्तिकामोऽहं भगवते [16][शिवायैतं श्वेतवृषभं] [17][ददानि ।

1 A संप्रयच्छे धनु for the b. p.
2 A omits it
3 A यातीत्यर्थः for the bracketed portion
4 A स्वर्गान्नु च्यवत, I.O. स्वर्गन्न च्यरत for the bracketed portion
5 A अद्यशिवपुरोक्त for the bracketed portion
6 A वृषभ०
7 I. O. श्वेतं बहुसुरालये for the bracketed portion
8 I. O. and A omit it
9 I. O. बहुलं वा
10 I. O. अर्चितार्चिताय, A अर्चिताय
11 A omits the bracketed portion
12 I. O. omits it
13 I. O. omits it
14 I. O. अद्यादि
15 A ०धेनु०
16 I. O. शिवायैतं वृषभं, A शिवाये धेनुं
17 I. O. omits the bracketed portion

[1]यस्तु [2]खेलं वृषं दद्यात्] महादेवालये[3] नरः ।
रुद्रलोकमवाप्नोति कुलमुद्धरते तथा ॥१८॥ (३।३०६।४०)

[4]खेलं क्रीडाशालिनम् । अर्चितं [5]खेलं वृषभं सङ्कल्प्य रुद्रालये दद्यात् । ॐ अद्य [6]कुलोद्धरणपूर्वक-रुद्रलोकप्राप्तिकामोऽहं [7][महादेवालये एतं] वृषभं ददानि । ततो रुद्रालये स्थापयेत् ।

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे महेश्वरसम्प्रदानकदानावर्तः ।

1 V. D. दत्वा सचेलं वृषभं for the first half of this line
2 A चेलं
3 A महादेवालये तथा
4 A खेलं
5 A खेलं
6 A
7 A महादेवालये for the bracketed portion

अथ भगवद्वासुदेवदानावर्तः । (७५)

नरसिंहपुराणे :—

> यो गां पयस्विनीं विष्णोः कपिलां संप्रयच्छति ।
> स सर्वपापरहितः सर्वभूषणभूषितः[1] ।
> गवां सहस्रदानेन फलं प्राप्य दिवं व्रजेत् ॥१॥

अत्र यजमानोऽर्चिताय विष्णवे कपिलां बहुक्षीरां गामर्चितां दद्यात् । ॐ अद्य नरसिंहपुराणोक्त-विष्णुसम्प्रदानक-[2] [कपिलगवी]-दानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतां कपिलां[3] गां ददानि । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं भगवते वासुदेवायाहं दक्षिणामेतत् काञ्चनं ददानि ।

तथा :—

> ध्वजञ्च विष्णवे यस्तु गरुडेन समन्वितम् ।
> दद्यात् सोऽपि ध्वजाकीर्णं विमानेन विराजता[4] ।
> विष्णुलोकमवाप्नोति सेव्यमानोऽप्सरोगणैः ॥२॥

वक्ष्यमाण-गरुडध्वजस्यातिशयित[5]-फलश्रुते-[6]श्चामर-[7]पताकादिशालिनो यथाशक्तिनिर्मितस्य [8]प्रासादोर्द्ध्वस्थाप्यस्य ध्वजस्य ग्रहणम् । उक्त-[9]रूपमूर्द्ध्वस्थितगरुडध्वजयष्टिमर्चिता[10]-मर्चिताय वासुदेवाय दद्यात् । ॐ अद्य नरसिंहपुराणोक्त-गरुडान्वितध्वजदानफल-[11][प्राप्तिकामो]ऽहं भगवते विष्णवे एतं गरुडसमन्वितं[12] ध्वजं ददानि । दक्षिणा पूर्ववत् ।

1 A सर्व्वभूषणभूषितं
2 A कपिलादानगवि for the bracketed portion
3 I. O. कपिला
4 A विराजते
5 A अतिशय for अतिशयित
6 I. O. ०श्चामर०
7 A ०पातकोद्दि०
8 I. O. प्रसादस्योर्द्ध स्थाप्यस्य
9 I. O. ०रूपं मूर्द्ध०
10 A omits अर्चिताम्
11 I. O. प्राप्तो for the bracketed portion
12 I. O. गरुडसमन्वित

वामनपुराणे (६५।४६ख) :—

दत्त्वारामान् पुष्पफलाभ्युपेतान्[1] [2]भोगान् भुङ्क्ते कामतः श्लाघनीयान् ॥३॥

अर्चिताय [3][वासुदेवायानेकफलप्राप्तिकामः [4]फलपुष्पाढ्यानारामानर्चितान्] दद्यात्। ॐ अद्य [5]वामनपुराणोक्तारामदान-[6]फलप्राप्तिकामोऽहं भगवते वासुदेवाय एतानारामान् ददानि। दक्षिणा पूर्ववत्।

विष्णुधर्मोत्तरे :—

[7][दिने दिने] जपन्नाम केशवेति समाहितः।

ददाति कार्त्तिके यस्तु विष्णवायतने[8] दीपकम् ॥४॥

समाहितः अनन्यचित्तः विष्ण्वायतने[9] विष्णवे दीपकं ददातीति सम्बन्धः विष्णवे दानस्यानुवृत्तेः।

जातिस्मरत्वं प्रज्ञाञ्च [10]स प्राप्नोति न संशयः।

शेषकाले तु चक्षुष्मान् मेधावी दीपदो[11] नरः।

जायते [12]नरकञ्चापि तमःसंज्ञं[13] न पश्यति ॥५॥

सौरकार्त्तिक-[14]शुक्लप्रतिपदि गृहीतोदपूर्णताम्रपात्र उदङ्मुखो[15] विष्णोरायतने[16] [दीपं दातुं][17] सङ्कल्पयेत्। ॐ अद्यादि यावत्कार्त्तिकं विष्णुधर्मोत्तरोक्त-विष्ण्वायतनदीपदान-फलप्राप्तिकामोऽहं [18]दीपं विष्णवे दास्ये इति[19] सङ्कल्प्यानन्यचित्तो यथाशक्ति केशवाय नम इति जपित्वा दीपं प्रज्वाल्य दद्यात्। एवं सङ्कल्पव्यतिरेकेण प्रत्यहं दद्यात्।

विष्णुधर्मोत्तरे (३।३४१।४८) :—

विष्णोरायतने दत्त्वा तत्कथापुस्तकं नरः।

ब्रह्मलोकमवाप्नोति बहवो वत्सरान् द्विजाः ॥६॥

1 I. O. पुष्पफलाभिपन्नान्, Vāmana P. ०भिपन्नान्
2 Vāmana P. भोगान् स
3 I. O. वासुदेवायतनसन्निहितान-नेकफलपुष्पाढ्यान् नानारामानर्चि-तान् for the bracketed portion
4 A omits फल
5 A रामायण for वामन
6 A omits फल
7 A दानदिने for the bracketed portion
8 I. O. विष्णवायतन
9 A विष्ण्वायतन, I.O. विष्ण्वायतनं
10 I. O. संप्राप्नोति
11 A दीपदा
12 A नरकं वापि
13 I. O. तमःसञ्ज्ञं
14 A ०सौर०
15 A उदङ्मुखोपविष्टो
16 A विष्णोरायते
17 I. O. दातुं दीपं for the bracketed portion
18 I. O. omits it
19 I. O. and A omit it

तत्कथापुस्तकं वासुदेवमाहात्म्यस्य प्रकाशकं विष्णुपुराणादि। अर्चितं तत्कथापुस्तकं सङ्कल्प्य[1] दद्यात्। [2]ॐ अद्य बहुवत्सरब्रह्मलोकप्राप्तिकामोऽहं विष्णोरायतने एतत्-[3]कथा-पुस्तकं ददानीति सङ्कल्प्य [4]देवालये स्थापयेत्।

तथा (३।३४१।४६):—

पुस्तकांश्च तथैवान्यान् यः प्रदद्यान्नरस्त्विह।
सारस्वतमवाप्नोति लोकं कालं तथा [5]बहुम्॥७॥

[6]अन्यान् [7]वासुदेवमाहात्म्यप्रकाशकव्यतिरिक्तान् स्कन्द-[8]पुराणादीन् इह विष्णोरायतने स्थापयेत्।

तथा (३।३४१।५१ख-५२क):—

सम्भूतं वाचकं [9]कृत्वा देवागारे सदा बुधम्[10]।
[11]विद्यादानफलं प्राप्य ब्रह्मलोके महीयते॥८॥

यथेच्छदिने भारतपुराण-[12]रामायणानामन्यतमस्य वाचनार्थं ब्राह्मणं [13]पुराणादि-पाठशक्तं [14][सुस्वरं बुधं] विद्वांसं सदा [15]वावदुकादिगुणयुक्तं [16]वर्त्तनोचितभूमिधनादिना सम्भूतं कृत्वा सङ्कल्प्य नियुञ्जीत। तद् यथा—ॐ विद्यादानफलप्राप्तिपूर्वकसोत्कर्षब्रह्म-लोकप्राप्तिकामोऽहं भगवद्वासुदेवागारे अमुकग्रन्थवाचनं[17] कर्त्तुं वाचकं ब्राह्मणं नियोक्ष्ये[18]। ततःप्रभृति वाचको[19] भारतादिवाचनं[20] देवागारे कुर्यात्।

तथा (३।३४१।५२ख-५३क):—

विष्णोः शङ्खप्रदानेन वारुणं लोकमश्नुते।
मानुष्यमासाद्य तथा ख्यातशब्दश्च[21] जायते॥९॥

1 A सङ्कल्प
2 A omits it
3 A ०कथपुस्तकं वि
4 I. O. दामालये
5 I. O. बहु, A बहुः
6 I. O. आद्यान्
7 I. O. वासुदेवमाहात्म्यस्य प्रकाश-कान् व्यतिरिक्तान्, A वासुदेव-माहात्म्ये प्रकाशव्यतिरिक्तान्
8 I. O. ०पुराणादीन
9 I. O. कृत्वा
10 I. O. omits it
11 A विद्यादानफलं
12 A ०रामायणनानामन्यतमस्य
13 I. O. पुराणादिपाठशक्तं
14 I. O. सुस्वर and A बुधं for the bracketed portion
15 I. O. वारवाद्गिुणयुक्तं
16 I. O. वर्त्तनोचित०, A वर्तमानोचित०
17 Both I. O. and A ०वाचन
18 A नियोक्ष्य
19 A वाचका
20 I. O. भारतादिवाचनं
21 A ख्यातशब्दस्य

अर्चिताय वासुदेवायार्चितं शङ्खं दद्यात्। ॐ अद्यादि विष्णुधर्मोत्तरोक्त-विष्णु-[1]सम्प्रदानक-शङ्खदानफलप्राप्तिकामोऽहं भगवते विष्णवे एतच्छङ्खं ददानि[2]। दक्षिणा पूर्ववत्।

घण्टाप्रदानेन तथा [3][महद्यश उपाश्नुते] ॥१०॥ (३।३४१।५३ख):—

अर्चिताय वासुदेवायार्चितां[4] घण्टां दद्यात्। ॐ अद्यातिशयित-[5]यशःप्राप्तिकामोऽहं भगवते विष्णवे एतां घण्टां ददानि। दक्षिणा पूर्ववत्।

[6]तथा (३।३४१।५४क):—

सौभाग्यं महदाप्नोति किङ्किणीं प्रददद्धरेः।

किङ्किणी [7]घुङ्गुरेति प्रसिद्धा। [8][अर्चिताय हरये] अर्चितां[9] किङ्किणीं दद्यात्। ॐ अद्यातिशयितसौभाग्यप्राप्तिकामोऽहं भगवते एतां किङ्किणीं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।५४ख):—

कूटागारं तथा दत्वा नगराधिपतिर्भवेत् ॥११॥

कूटागारं मञ्चगृहम्। अर्चिताय वासुदेवायार्चितं [10]यथाशक्तिनिर्मितं कूटागारं दद्यात्। ॐ अद्य [कूटागारदानफल][11]-प्राप्तिकामोऽहं भगवते हरये एतत् कूटागारं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।६१):—

दत्वा [12][तु देव]-कर्मार्थं [13]नवां वेदीं दृढां शुभाम्।
पार्थिवत्वमवाप्नोति वेदी हि पृथिवी यतः ॥१२॥

[14]वासुदेवाग्रतो [15]देवपूजोपकरणस्थापनार्थमुक्तरूपां वेदीमिष्टका-[16]दिभिर्निर्माया-[17][चिता—

1 I. O. ॰संप्रदान
2 A ददाति
3 I. O. महद्दयशमुपाश्नुते and A महद्दयश उपाश्नुते for the bracketed portion
4 A वासूदेवायार्चितं
5 I. O. ॰यशस:॰
6 A omits it
7 I. O. अर्चगौति, A घगुवे
8 I. O. अर्चितामद्दवाय for the bracketed portion
9 I. O. अर्चिता, A चिंता
10 A omits it
11 A कूटगारदानफल for the bracketed portion, I.O. omits it
12 A तद्देव for the bracketed portion
13 A नवा
14 A वासुदेवायतो
15 A देवपूजोपकरणं स्थापनार्थं मुक्तारूप, I. O. पूजोपकरणावस्थानानायुक्तरूपां
16 I. O. ॰दिवानिर्माया॰. A ॰दिति॰ निर्माय
17 A omits the bracketed portion

मर्चिताय] वासुदेवाय दद्यात्। ॐ अद्य पार्थिवत्वप्राप्तिकामोऽहं भगवते वासुदेवायैतां वेदीं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।८४ख-८५क):—

तोरणं [1]कारयेद् यस्तु [2]देवदेवालये नरः।
लोकेषु तस्य द्वाराणि भवन्ति [3]विवृतानि तु ॥१३॥

[4][लोकेषु विष्णुप्रभृतिलोकेषु।] अर्चिताय [5]वासुदेवायायतनप्राङ्गणे यथाशक्ति शिलादिनिर्मितं तोरणमर्चितं दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्त-तोरणदानफलप्राप्ति-कामोऽहं भगवते वासुदेवाय एतत्तोरणं ददानि। दक्षिणा पूर्ववत्।

तथा (Cf. ३।३४१।८६ख-८७क):—

[6]देवालयोपयोग्यानि शिल्पभाण्डानि यो नरः।
[7]दद्याद्वा वाद्यभाण्डानि गणेशत्वमवाप्नुयात् ॥१४॥

अर्चिताय वासुदेवाय देवालयोपयोगिशिल्पभाण्डानि [8]यथाशक्त्युपात्तानि दद्यात्। ॐ अद्य गणेशत्वप्राप्तिकामोऽहं भगवते वासुदेवाय एतानि शिल्पभाण्डानि ददानि। दक्षिणा पूर्ववत्। [9]वाद्यभाण्डदाने वाक्ये शिल्पपदस्थाने वाद्यपदनिवेशो विशेषः।

यः कुम्भं देवकर्मार्थं नरो दद्यान्नवं[10] शुभम्।
वारुणं लोकमाप्नोति सर्वपापैः प्रमुच्यते ॥१५॥ (Cf. ३।३४१।६२)

शुभमुत्कृष्टद्रव्यघटितं स्वरूपञ्च [11]देवार्चन-[12]जलाहरणाद्यर्थं यथाशक्ति सुवर्णादीना-मन्यतमद्रव्येण घटितं नवं स्वरूपं कुम्भमर्चितमर्चिताय वासुदेवाय एतं कुम्भं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।६३):—

चतुरः कलसान् दद्याद् यस्तु [13]देवगृहे नरः।
चतुःसमुद्रवलयां स भुङ्क्ते च वसुन्धराम् ॥१६॥

1 A कारय
2 A देवादेवालयो
3 A विवृतानिव, I. O. विवृतामिता
4 A omits the bracketed portion
5 I. O. वासुदेवायतनप्राङ्गण
6 I. O. देवालयोपयोग्यानि
7 A दद्याद्य
8 A omits
9 A वाद्य०
10 I. O. नवः
11 I. O. omits देवार्चन
12 A जलाहरणाद्यर्थं
13 A देवगृहे, I. O. देवगृहे

यथाशक्ति सुवर्णादीनामन्यतमेन घटितं कलसचतुष्टयमर्चिताय वासुदेवाय दद्यात्। ॐ अद्य चतुःसमुद्रवलयवसुन्धराराज्यप्राप्तिकामोऽहं भगवते वासुदेवाय [1]एतांश्चतुरः कलसान् ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।६५क, Cf. ३।३६८।६ख):—

[2][वारिधानीं तथा] दत्त्वा वारुणं लोकमाप्नुयात्।

वारिधानीति [3]वासनेति प्रसिद्धा। यथाशक्ति सुवर्णादीनामन्यतमेन निर्मितां वारिधानीमर्चितामर्चिताय वासुदेवाय दद्यात्। ॐ अद्य वारुणलोकप्राप्तिकामोऽहं भगवते [4]वासुदेवायैतां वारिधानीं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।६५ख):—

कमण्डलुप्रदानेन गोदानफलमाप्नुयात् ॥१७॥

अर्चिताय वासुदेवाय यथाशक्ति [5]सुवर्णादीनामन्यतमेन निर्मितमर्चितं कमण्डलुं दद्यात्। ॐ अद्य गोदानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतं कमण्डलुं ददानि। दक्षिणा पूर्ववत्।

मात्रान्तु परिचर्य्यार्थं[6] निवेद्य विधिवत्तथा।

सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ॥१८॥ (३।३४१।७२)

[7]मात्रा [8]देवोपचारसामग्री। अर्चिताय वासुदेवाय पूजाभोजनाद्युपचारसामग्रीमर्चितां दद्यात्। ॐ अद्य सर्वकामसमृद्ध-यज्ञफलप्राप्तिकामोऽहं भगवते वासुदेवाय परिचर्य्यार्थमेतां मात्रां ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१२६ख-१२७क):—

माल्याधारन्तथा दत्त्वा धूपाधारन्तथैव च।

गन्धाधारं तथा पात्रं कामानां पात्रतां व्रजेत् ॥१९॥

माल्याधारः[9] उल्लेक[10] इति प्रसिद्धः। धूपाधारो धूपकद्रव्याधारः[11]। [12]गन्धाधारः

1 A एतान् चतुरः
2 I. O. वारिधानान्तथा for the bracketed portion
3 A वासनीति
4 A वासुदेवा एतां
5 A सुवर्णादीना only
6 I. O. परिचर्यार्थं
7 A मात्रां
8 I. O. देवोपदानसामग्री, A देवोपदानसामग्री माधारं दत्वा
9 I. O. माल्याधारो
10 A उल्लेक
11 I. O. omits द्रव्याधारः
12 I. O. गन्धाधारो

[1]सिध्म इति प्रसिद्धः । अर्चिताय वासुदेवायार्चितमभिमतद्रव्यविरचितं माल्याधारं दद्यात् । विष्णुधर्मोत्तरोक्तवासुदेवसम्प्रदानक-माल्याधारदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतं माल्याधारं ददानि । दक्षिणा पूर्ववत् । धूपाधारगन्धाधारयोर्वाक्ये माल्याधारपदस्थाने धूपाधारपदस्य गन्धाधारपदस्य च निवेशो विशेषः ।

तथा (३।३४१।१२७ख-१२८क) :—

समुद्रजाणि [2]पात्राणि दत्त्वा वै [3][तैजसानि च] ।
पात्रं भवति कामानां विद्यानाञ्च धनस्य च ॥२०॥

समुद्रजानि शुक्तिशङ्खपात्राणि तैजसानि [4]सुवर्णरजतादिनिर्मितानि । अर्चितानि शुक्तिशङ्खादीनामन्यतमानि पात्राणि दद्यात् । विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानक-[5]समुद्रजपात्र-[6]दानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतानि पात्राणि ददानि । दक्षिणा पूर्ववत् । [7]तैजसपात्रदानवाक्ये समुद्रजपदस्थाने तैजसपदनिवेशो विशेषः ।

[8]पतद्ग्रहप्रदानेन [9]सर्वपापं व्यपोहति ।

[10][पतद्ग्रहः पातग्रह] इति प्रसिद्धः । अर्चिताय वासुदेवायार्चितं[11] [12]पतद्ग्रहं दद्यात् । ॐ अद्य [13]सर्वपापक्षयकामोऽहं भगवते वासुदेवाय एतं [14]पतद्ग्रहं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।७१क) :—

दर्पणस्य प्रदानेन [15]बहुदर्पणवान् भवेत् ॥२१॥

अर्चिताय वासुदेवायार्चितं दर्पणं दद्यात् । [16]ॐ अद्यादि-[17]बहुदर्पणत्वप्राप्ति कामोऽहं भगवते वासुदेवायैतं दर्पणं ददानि । दक्षिणा पूर्ववत् ।

---

1 A सिध
2 I. O. द्रव्याणि
3 A तैजसानि च and I. O. तैजसानिच for the bracketed portion
4 I. O. सुवर्णरजतनिर्मितानि
5 A समुद्र for समुद्रज
6 A दान and I. O. फल for दानफल
7 I. O. तैजसपात्रदाने वाक्ये, A तैजसपात्रदानवाक्ये
8 I. O. पतद्ग्रह०
9 I. O. सर्वं पापं
10 I. O. पतद्ग्रहः प्रतिग्रह for the bracketed portion
11 I. O. and A ०र्चित
12 I. O. पतद्ग्रहं
13 A omits सर्व
14 I. O. [पतद्ग्रहं and A एतत् पतद्ग्रहं for पतद्ग्रहं
15 A बहुदर्पणवा, I. O. and V. D. दर्पवान्रूपवान्
16 A omits it
17 I. O. दर्पवत्वरूपवत्व for बहुदर्पणत्व, A omits बहु

तथा (३।३४१।६६क) :—

उशीरकूर्चकं[1] दत्त्वा सर्वपापैः प्रमुच्यते ।

उशीरकूर्चकं[2] देवाङ्गमलादिशोधनार्थं वीरणमूल-[3]कूर्चिकाम् [4][अर्चिताय वासुदेवायार्चितां वारणमूलकूर्चिकां[5]] दद्यात् । ॐ अद्य [6]सर्वपापविमुक्तिकामोऽहं भगवते वासुदेवायैताम् उशीर-[7]कूर्चिकां ददानि । दक्षिणा पूर्ववत् ।

दत्त्वा [8]गोबालकं विप्राः [9][सर्वान् तापान्] व्यपोहति ॥२२॥ (३।३४१।६६ख)

गोबालक-[10]प्रकरणात् [11]गोबालककृतकूर्चम् । अर्चिताय वासुदेवायार्चितं [12]गोबालकं दद्यात् । ॐ अद्य सर्व-[13]तापोपशमप्राप्तिकामोऽहं भगवते वासुदेवायैतं गोबालकं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।६७क) :—

दत्त्वा चामरजं कूर्चं श्रियमाप्नोत्यनुत्तमाम्[14] ॥२३॥

चामरजं चमरीमृगरोमभवम्[15] । अर्चिताय वासुदेवाय अर्चितं चमरीमृगरोमजं कूर्चं दद्यात् । ॐ अद्यानुत्तमश्रीप्राप्तिकामोऽहं भगवते वासुदेवायैतच्चामरं कूर्चं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।६७ख—६८क) :—

आसनानां प्रदानेन [16][स्थानं सर्वत्र विन्दति ।
पादपीठप्रदानेन] तथैव च नरोत्तमाः ॥२४॥

नरोत्तमा इति सम्बोधनम् । अर्चिताय वासुदेवायार्चितं[17] यथाशक्त्युपात्तमासनत्रयं दद्यात् । ॐ अद्य विष्णुधर्मोत्तरोक्त-विष्णुसम्प्रदानकासनदानफलप्राप्तिकामोऽहं भगवते

1 A ०इषुकं, I. O. ०दूर्वकं
2 A ०कुशुकं, I. O. दूर्वकं
3 I. O. ०कुञ्चिकां
4 A omits the bracketed portion
5 I. O. ०कुञ्चिकां
6 I. O. सर्व्वमुक्तिकामोऽहं
7 I. O. ०दूर्वकं
8 V. D. गोपालकान
9 A सर्व्वतापान, I. O. सर्वान् तापान् and V. D. सर्व्वपापान् for the bracketed portion
10 I. O. ०प्रकारणात्
11 I. O. गोबालकृतं दूर्वम
12 I. O. गोबालदूर्वकं
13 A ०तापोपमप्राप्तिकामो हं
14 A ०त्तमं
15 A ०रोमजं
16 A omits the bracketed portion
17 A वासुदेवाय only

वासुदेवायैतान्यासनानि ददानि । दक्षिणा पूर्ववत् । पादपीठप्रदाने तु वाक्ये आसनपदस्थाने पादपीठपदनिवेशो विशेषः ।

तथा (३।३४१।८५ख) :—

शयनासनदानेन स्थितिं विन्दति शाश्वतीम् ।

अर्चिताय वासुदेवाय यथाशक्ति[1][खट्वादिरूपां शय्यामासनसहितामर्चितां] दद्यात् । ॐ अद्य[2] विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानक-शयनासनदानफलप्राप्तिकामोऽहं भगवते वासुदेवायै-तच्छयनासनं ददानि । दक्षिणा पूर्ववत् ।

[3][तथा (३।३४१।८६क) :—

उत्तरच्छददानेन सर्वान् कामानवाप्नुयात् ॥२५॥

उत्तरच्छदः शय्याया आच्छादनवस्त्रम् । अर्चिताय वासुदेवायार्चितमुत्तरच्छदम् ॐ अद्यामुकप्राप्तिकामोऽहं भगवते वासुदेवाय एतमुत्तरच्छदं ददानि । दक्षिणा पूर्ववत् ।]

तथा (३।३४१।१८१) : —

नीलीरक्तं विना रक्तं शेषरक्तैर्द्विजोत्तमाः ।

दत्त्वा भवति धर्मात्मा सर्वव्याधि-[4]विवर्जितः ॥२६॥

अर्चिताय वासुदेवाय [5]नीलीरागव्यतिरिक्त-यथेच्छरागद्रव्यरञ्जितं वस्त्रमर्चितं दद्यात् । [6]ॐ अद्य सर्वव्याधिविवर्जितत्वप्राप्तिकामोऽहं भगवते वासुदेवाय [7]एतद्रक्तं [8][वस्त्रं ददानि दक्षिणा पूर्ववत् ।

तथा (३।३४१।१८२क) :—

दुकूलकप्रदानेन वह्निष्टोमफलं लभेत् ॥२७॥

अर्चिताय वासुदेवाय दुकूलवस्त्रं दद्यात् । ॐ अद्याग्निष्टोमफलप्राप्तिकामोऽहं भगवते। वासुदेवाय एतद्]-दुकूलवस्त्रं ददानि । दक्षिणा पूर्ववत् ।

1 A खट्वादिकं शय्यासनमर्चितं for the bracketed portion
2 I. O. omits it
3 A omits the bracketed portion
4 I. O. ॰विवार्जितः
5 I. O. नीलीवर्जितरक्तरागद्रव्यव्यतिरिक्त॰
6 A omits it
7 I. O. एतद् only
8 A omits the bracketed portion

तथा (३।३४१।१८२ख-१८३क) :—

कौशेयानि च वस्त्राणि सुमृदूनि[1] लघूनि च ।
यः प्रयच्छति देवाय सोऽश्वमेधफलं लभेत् ॥२८॥

कौशेयानि [2]कोशकारकृमितन्तुमयानि । अर्चिताय वासुदेवायार्चितानि कौशेयवस्त्राणि उत्कृष्टानि दद्यात् । ॐ अद्याश्वमेधफलप्राप्तिकामोऽहं भगवते वासुदेवायैतानि कौशेयवस्त्राणि ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।१८३ख-१८४क) :—

सलोमानि च वस्त्राणि यः प्रयच्छति धर्मवित् ।
कृतानि [3]वरवर्णानि [4]सोऽश्वमेधफलं लभेत् ॥२९॥

सलोमानि [5]तूलपटीरूपाणि वरवर्णानि×× । अर्चिताय वासुदेवायार्चिताः शोभन-वर्णास्तूलपटीर्दद्यात् । ॐ अद्याश्वमेधफलप्राप्तिकामोऽहं भगवते वासुदेवायैतानि वस्त्राणि ददानि । दक्षिणा पूर्ववत् ।

तथा (Cf. ३।३४१।१८५ख-१८६क) :—

[6][नानाभङ्गिविचित्राणि सूच्यादिनिर्मितानि च ।
[7]वीरजानि [8]सुसूत्राणि राजसूयफलं लभेत् ॥३०॥]

[9][नानाभङ्गि[10]-विचित्राणि सूच्यादिनिर्मितानि[11] सूच्यादिकर्मणा निर्मितानि वीरजानि वल्कलजानि [12]सुसूत्राणि] [दत्त्वेति शेषः][13] । ब्राह्मणवासोदानप्रकरणे त्रयाणामेषां पृथक्त्वेन दानश्रुतेर्नात्रापि[14] [स्वतः ब्राह्मणाय][15] दानम् । अर्चिताय वासुदेवायार्चितानि नवानि विचित्रवस्त्राणि दद्यात् । ॐ[16] अद्य राजसूयफलप्राप्तिकामोऽहं भगवते वासुदेवायैतानि वासांसि ददानि । दक्षिणा पूर्ववत् । एवं [17]वीरज-[18]सुसूत्रयोरपि दानवाक्यम् ।

1 A मृदूनि च
2 I. O. कोषकार॰
3 A वर्णानि
4 A शोभमेधफल
5 A दुकूलपाटीरूपाणि
6 I. O. omits the bracketed portion
7 A वीजानि
8 A सुत्राणि
9 A omits the bracketed portion
10 I. O. नानाभङ्गि॰
11 I. O. omits it
12 I. O. omits it
13 I. O. omits the b. p.
14 I. O. ॰श्रुतेनात्रापि
15 I. O. reads the bracketed portion as स्वतब्राह्मणेन
16 A omits it
17 I. O. [illegible]
18 A सुसूत्रयोरपि, I. O. सुसूत्रयोरपि

तथा (३।३४१।२००ख-२०१क) :—

अनुक्तान्यापि विप्रेन्द्रा[1] वासांस्याभरणानि च ।
[2]दत्त्वैवं देवदेवाय वह्निष्टोमफलं लभेत् ॥३१॥

अनुक्तवस्त्राण्युक्त-[3][विपरीतानि नानाजातीयानि] धर्मनेत्रादीनि । अनुक्ताभरणानि हारादीनि । अर्चिताय [4]वासुदेवायार्चितं [5]धर्मादीनामन्यतमं वस्त्रं दद्यात् । [6]ॐ अद्याग्निष्टोमफलप्राप्तिकामोऽहं भगवते वासुदेवाय [7]एतदमुकवस्त्रं ददानि । दक्षिणा पूर्ववत् । आभरणदाने[8] एतदमुकाभरणमिति वाक्ये विशेषः ।

तथा (३।३४१।१८७ख, Cf. ३।३११।१०क) :—

यज्ञोपवीतदानेन [9]ब्रह्मदानफलं लभेत् ।

अर्चिताय वासुदेवायार्चितं यज्ञोपवीतं दद्यात् । ॐ अद्य ब्रह्मदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतद्यज्ञोपवीतं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।१८८ख) :—

दत्त्वा प्रतिसरान् मुख्यान्न भूतैरभि-[10]भूयते ॥३२॥

प्रतिसरः [11]पट्टादि-विरचितं सूत्रम् । मुख्यत्वञ्च [12]तस्योत्कृष्टत्वम् । अर्चिताय वासुदेवायार्चितं नानावर्णकादि-[13]विचित्रितम् [14]प्रशस्तं प्रतिसरं दद्यात् । ॐ अद्य विष्णुधर्मोत्तरोक्त-प्रतिसरदानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतं [15]प्रतिसरं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।१४ख) :—

रूप्यदो रूपमाप्नोति विशेषाद्भुवि दुर्लभम् ॥३३॥

अर्चिताय वासुदेवायार्चितं यथेच्छपरिमाणं रजतं दद्यात् । ॐ [16]अद्य दुर्लभरूप-

1 A विप्रेन्द्र
2 I. O. and A दत्त्वैवं
3 I. O. विपरीतजातीयानि for the bracketed portion
4 A omits वासु
5 I. O. धर्मादीनामन्यतमं
6 A omits it
7 A एतदमुकवस्त्र
8 A adds वस्त्र after this
9 A ब्राह्मण for ब्रह्म
10 I. O. ०दुयते
11 I. O. पट्टीदि०
12 I. O. भाग्योत्कृष्टत्वं
13 A ०विरचितं
14 A omits it
15 I. O. प्रतिसरं
16 I. O. अद्येति

प्राप्तिकामोऽहं भगवते वासुदेवायैतद्रूप्यं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।७५क) :—

नरः सुवर्णदानेन सुर्वान् कामानुपाश्नुते।

अर्चिताय वासुदेवायार्चितं [1]यथेच्छपरिमाणं सुवर्णं दद्यात्। [2]ॐ अद्यामुकप्राप्ति-कामोऽहं भगवते वासुदेवायैतत् सुवर्णं ददानि। दक्षिणा पूर्ववत्।

[3]तथा (Cf. ३।३४१।७५ख) :—

[4][रत्नं दत्त्वा च] लोकेषु प्रामाण्यमुपगच्छति ॥३४॥

प्रामाण्यं [5]सर्वार्चितत्वम्। [6]अर्चिताय वासुदेवाय परिभाषोक्तरत्नानामन्यतममर्चितं रत्नं दद्यात्। [7]ॐ अद्य [8]लोकप्रामाण्यप्राप्तिकामोऽहं भगवते वासुदेवाय एतद्रत्नं ददानि। दक्षिणा पूर्ववत्।

[9][तथा (३।३४१।१९९ख-२००क) :—

मुकुटस्य] प्रदानेन [10]मूर्द्धन्यो भूतले भवेत्।

चतुःसमुद्रवलयां [11]प्रशास्ति च वसुन्धराम् ॥३५॥

मूर्द्धन्यः सर्वमान्यः। अर्चिताय वासुदेवाय यथाशक्तिघटितमर्चितं मुकुटं दद्यात्। [12]ॐ अद्य मूर्द्धन्यतासहित-सकलवसुन्धराधिपत्यप्राप्तिकामोऽहं भगवते वासुदेवायैतन्मुकुटं ददानि। दक्षिणा पूर्ववत्।

[13][तथा (३।३४१।१९९क) :—

मूर्द्धाभरणदानेन राजसूयफलं लभेत्।

मूर्द्धाभरणं किरीटादि। अर्चिताय वासुदेवायर्चितं मूर्द्धाभरणं दद्यात्। ॐ अद्य राजसूयफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतं मूर्द्धाभरणं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१८८क) :—

कर्णपूरप्रदानेन श्रुतिं विन्दति सर्वतः ॥३६॥

1 A यथे for यथेच्छ
2 A omits it
3 A omits it
4 A रत्नं दत्वा सु and I. O. रत्नदानेन for the bracketed portion
5 A सर्वार्च्चितं, I. O. सर्वार्चितवर-रत्नं
6 A अर्चितं
7 Both I. O. and A omit it
8 A लोके
9 A reads the bracketed portion as सुकुटस्य
10 I. O. मूर्द्धन्या
11 A प्रशस्ति, I. O. प्रशस्ति
12 A omits it
13 A omits the bracketed portion

[1]श्रुतिं सर्वशास्त्रश्रवणम्। अर्चिताय वासुदेवायार्चितं कर्णपूरं दद्यात्। ॐ अद्य [2][सर्वशास्त्रश्रवण]-फलप्राप्तिकामोऽहं भगवते वासुदेवा-[3]यैतं कर्णपूरं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१६८):—

कर्णाभरणदानेन भवेच्छ्रुतिधरो नरः[4]।
अश्वमेधमवाप्नोति सौभाग्यञ्चैव विन्दति ॥३७॥

अर्चिताय वासुदेयार्चितं कर्णाभरणं दद्यात्। [5]ॐ विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानक-कर्णाभरणदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतत कर्णाभरणं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१६६ख-१६७):—

ग्रैवेयकाणि दत्त्वा च सर्वशास्त्रार्थविद् भवेत्।
नार्य्यश्च वशगास्तस्य भवन्ति द्विजपुङ्गवाः।
श्रियमाप्नोति [6]परमां [7]राजसूयञ्च विन्दति ॥३८॥

ग्रैवेयकं कण्ठाभरणम्। अर्चिताय वासुदेवाय [8][कण्ठाभरणान्यर्चितानि दद्यात]। ॐ अद्य विष्णुधर्मोत्तरोक्त-वासुदेव सम्प्रदानक-[9][ग्रैवेयकदानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतानि] ग्रैवेयकाणि ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१६६क):—

[10]केयूरदानाद्भवति शत्रुपक्षक्षयङ्करः[11] ॥३६॥

अर्चिताय वासुदेवायार्चितं यथाशक्तिनिर्मितं केयूरं दद्यात्। ॐ अद्य भगवते वासुदेवाय शत्रुपक्ष-[12]क्षयङ्करत्वप्राप्तिकामोऽहम् एतत केयूरं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१६५क):—

हस्ताङ्गुलीय-[13]दानेन [14]परं सौभाग्यमाप्नुयात्।

---

1 I. O. श्रुति
2 I. O. श्रुतिसर्व्वशास्त्रश्रवण and A' राजसूय for the bracketed portion
3 A °यैतत्
4 A भवेत
5 A' omits it
6 A विपुलं
7 A वाजपेयञ्च
8 A reads the bracketed portion as कण्ठाभरणं ददानि
9 I. O. omits the bracketed portion
10 A केयूरदानाद्भवति
11 A °क्षयङ्करः
12 A °क्षयकामत्व°
13 A दान for दानेन
14 I. O. दत्वा

हस्ताङ्गुलीयं हस्ताङ्गुलि-[1]परिधानयोग्यमङ्गुरिका-[2]दि। अर्चितामङ्गुरीं [3]दद्यात्। ॐ अद्य परमसौभाग्यप्राप्तिकामोऽहं भगवते वासुदेवायैतद्धस्ताङ्गुरीयकं ददानि। दक्षिणा पूर्ववत्।

तथैवाङ्गददानेन राजा भवति भूतले ॥४०॥ (३।३४१।१६५ख)

अर्चिताय वासुदेवायार्चितमङ्गदं [4]दद्यात्। ॐ[5] अद्य भूतलराज्यप्राप्तिकामोऽहं भगवते वासुदेवायैतदङ्गदं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१६४):—

श्रोणीसूत्रप्रदानेन महीं सागरमेखलाम्।
प्रशास्ति निहतामित्रो नात्र कार्य्या विचारणा ॥४१॥

श्रोणीसूत्रं काञ्चीदाम। अर्चिताय वासुदेवायार्चितं श्रोणीसूत्रं दद्यात्। [6]ॐ [7]अद्यामित्रहनन-[8][पूर्वक-सागरपर्य्यन्तमहीशासन]-प्राप्तिकामोऽहं भगवते वासुदेवाय इदं श्रोणीसूत्रं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१६३ख):—

पादाभरणदानेन महीं सर्वत्र विन्दति।

पादाभरणं नूपुरम्। अर्चिताय वासुदेवाय यथाशक्ति नूपुरमर्चितं दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्त-नूपुरदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतदाभरणं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१६३क):—

पादाङ्गुरीयदानेन गुह्यका-[9]धिपतिर्भवेत् ॥४२॥

[10][पादाङ्गुरीयं विष्णुधर्मोत्तरोक्त]-चरणाङ्गुलिनिधानयोग्या-[11]ङ्गुरिकाम्। अर्चिताय वासुदेवायार्चितं पादाङ्गुरीयं दद्यात्। [12]ॐ अद्य [13]गुह्यकाधिपतित्वप्राप्तिकामोऽहं भगवते वासुदेवाय एतत् पादाङ्गुरीयं ददानि। दक्षिणा पूर्ववत्।

1 I. O. ०याविधान० for परिधान
2 A ०मुद्रिकादि
3 A ददानि
4 A ददानि
5 A omits it
6 A omits it
7 A अद्य ...मित्रहनन, I. O. अद्या- मित्रहनन
8 A reads the bracketed portion as सागरपर्यन्तं महीसागर
9 Both I. O. and A ०द्दिपतिर्भवेत्
10 A omits the bracketed portion
11 A ०ङ्गुलिका
12 A omits it
13 A गुह्यकाद्दिपतित्व०

तथा (३।३४१।१२४) :—

उपानत्संप्रदानेन विमानमधिरोहति ।

यथेष्टं तेन लोकेषु विचरत्यमरप्रभः[1] ॥४३॥

अर्चिताय वासुदेवायार्चित-[2]मुपानद्युगं चर्ममयं तूलमयं वा [3]दद्यात् । [4]ॐ विष्णु-धर्मोत्तरोक्त-वासुदेवसम्प्रदानकोपानद्दानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतदुपानद्युगं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।६८ख) :—

गोदानफल-[5]माप्नोति तथा पाद्यप्रदो नरः ॥४४॥

पाद्यं पादप्रक्षालनार्थं जलम् । अर्चिताय वासुदेवायार्चितं पाद्यं दद्यात् । ॐ अद्य गोदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय [6]एतत् पाद्यं ददानि । [7][दक्षिणा पूर्ववत् ।]

तथा (३।३४१।७०क) :—

नरस्त्वाचमनीयस्य दाता भवति निर्मलः ।

अर्चिताय वासुदेवायार्चितमाचमनार्थं वारि दद्यात् । ॐ अद्य निर्मलत्वप्राप्ति-कामोऽहं भगवते वासुदेवाय एतदाचमनीयं ददानि । दक्षिणा पूर्ववत् ।

तथा (Cf. ३।३४१।७०ख) :—

सुखलेपप्रदानेन परं रूपमवाप्नुयात् ॥४५॥

सुखलेपः [8]सुखहेतुः [9]शीते कुङ्कुमलेपः ग्रीष्मे चन्दनलेपः । अर्चिताय वासुदेवायार्चितं सुगन्धिमनु-[10]लेपं दद्यात् । ॐ अद्योत्कृष्टरूपप्राप्तिकामोऽहं भगवते वासुदेवाय [11][एतं सुखलेपं] ददानि । दक्षिणा पूर्ववत् ।

[12]तथा (३।३४१।१३१) :—

गन्धतैलानि दिव्यानि सुगन्धानि शुचीनि च ।

केशवाय नरो दत्त्वा गन्धर्वैः सह मोदते ॥४६॥

1 A ०प्रभुः
2 उपानद्द्युगं
3 A दक्षिणा पूर्व्ववत् । तथा उपानद्-प्रदानेन । for दद्यात्
4 I. O. omits it
5 A प्राप्नोति for माप्नोति
6 A एतदुपागत
7 A omits the bracketed portion
8 A सुखादेतुः
9 A शीत
10 A ०लेपनं
11 A एतत् सुखलेपनं for the bracketed portion
12 A omits it

दिव्यान्युत्कृष्टानि शुचीनि अपनीतकेशादीनि। अर्चिताय [1]वासुदेवाय उत्कृष्टं सुगन्धि-[2]तिलस्थानकत्रयमर्चितं दद्यात्। ॐ अद्य भगवते वासुदेवाय विष्णुधर्मोत्तरोक्त-सुगन्धितैलदानफलप्राप्तिकामोऽहम् एतानि [3]गन्धतैलादीनि ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१२१ख-१२२क):—

राजा भवति लोकेऽस्मिन् छत्रं दत्त्वा द्विजोत्तमाः।
नाप्नोति [4]रिपुजं दुःखं संग्रामे [5]रिपुजिद्भवेत् ॥४७॥

द्विजोत्तमा इति सम्बोधनम्। अर्चिताय वासुदेवायार्चितं छत्रं दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्त-[6]वासुदेवसम्प्रदानक-छत्रदानफलप्राप्तिकामोऽहं भगवते [7]वासुदेवायैतच्छत्रं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।१२३):—

तथा चामरदानेन श्रीमान् भवति भूतले।
मुच्यते च तथा पापैः स्वर्गलोकञ्च गच्छति ॥४८॥

अर्चिताय वासुदेवायार्चितं चामरं दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानकचामरदानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतच्चामरं ददानि। दक्षिणा पूर्ववत्।

लोकेषु ध्वजभूतः स्याद् विष्णोर्दत्त्वा तथा ध्वजम्।
शक्रलोकमवाप्नोति बहुवर्षगणान्नरः ॥४९॥ (३।३४१।६६)

ध्वजश्चामरदर्पणपताकाद्यन्वित उच्छ्रितो दण्डः चित्रदण्ड[8] इति प्रसिद्धः। अर्चिताय वासुदेवायार्चितं यथाशक्ति ध्वजमुपकल्पितं दद्यात्। अद्य प्रचुराब्दगणावच्छिन्नशक्र-लोकप्राप्तिकामोऽहं भगवते वासुदेवाय एतं[9] ध्वजं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।५७-५८):—

पताकाञ्च शुभां[10] दत्त्वा तथा केशववेश्मनि।
वायुलोकमवाप्नोति [11]बहून्यब्दशतानि च ॥५०॥

1 A omits it
2 A तिलकन for तिलस्थानक
3 A गन्धतैलानि
4 A विप्रजं
5 A विनिर्जद
6 I. O. omits वासुदेव
7 I. O. वासुदेवाय एतत्तावत्छत्रं
8 A omits it
9 A एत
10 A शुभां, I. O. शुभाम्
11 I. O. बहून्यब्दगणानि च, A ब्दशतानि तु

दोधूयते [1]यथा सा च वायुना केशवालये ।
[2]तथास्य [3][सकलं देहात्] पापं विधूयते [4]सदा ॥५१॥
[5]यथा यथा च सा शोभां करोति [6]त्रिदशालये ।
तथा तथा स [7][यशसा महता भुवि राजते] ।५२॥

अर्चिताय वासुदेवाय यथाशक्ति नेत्रादिविचित्रा-[8][मर्चितां पताकां] दद्यात् । ॐ अद्य विष्णुधर्मोत्तरोक्तपताकादानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतां पताकां ददानि । दक्षिणा पूर्ववत् । ततो देवालयोपरि पताकामारोपयेत् ।

तथा (३।३४१।५६) :—

पताकां ये प्रयच्छन्ति [9]कूटागारे मनोहराम् ।
सन्त्यज्य सकलं पापं वायुलोकं व्रजन्ति ते ॥५३॥

कूटागारं [10]मञ्चगृहम् । [11]अर्चितवासुदेवायतना-[12][ग्रे खगाद्यनुकृतां] मञ्चगृहे स्थापयितुं यथाशक्ति [13]स्वरूपामर्चितां पताकां दद्यात् । [14]ॐ अद्य भगवते [15]वासुदेवाय सकलपापत्याग[16]-पूर्वकवायुलोकप्राप्तिकामोऽहमेतां पताकां [17]ददानि । दक्षिणा [18]पूर्ववत् । ततस्तां कूटागारोपरि दद्यात् ।

[19]युक्तं पीतपताकाभिर्निवेद्य गरुडध्वजम् ।
केशवाय द्विजश्रेष्ठाः शक्रलोके महीयते ॥५४॥ (३।३४१।८०ख-८१क)

---

1 A तथा
2 I. O. तथान्य
3 A सकलादेवा for the b. p.
4 Both I. O. and A यथा
5 I. O. omits it
6 I. O. त्रिशालये
7 A देहस्य निःपापो भुवि जायते for the bracketed portion
8 A मर्चितां पताकां for the bracketed portion
9 I. O. देवागारे
10 A मञ्चगेहं
11 Both I. O. and A अर्चिताय
12 I. O. reads the bracketed portion as स्याग्रे खगात् यनुकृता
13 A स्वरूपमर्चितं
14 A omits it
15 I. O. वासुदेवा
16 A ०त्याग०
17 A omits it
18 I. O. पूर्व
19 A युक्त

अर्चिताय वासुदेवाय यथाशक्तिविरचितगरुडयुक्तं[1] विस्तीर्णपीतपताकात्रयान्वितमर्चितं ध्वजं[2] प्राङ्गणस्थं दद्यात्। ॐ अद्य सोत्कर्षशक्रलोकप्राप्तिकामोऽहं भगवते वासुदेवाय एतं पीतपताकायुक्तं गरुडध्वजं ददानि। दक्षिणा पूर्ववत्।

[3]तथा (३।३४१।८१ख-८२क):—

युक्तं नीलपताकाभिस्तालं[4] दत्त्वा द्विजोत्तमाः।
[5]याम्याल्लोकात् परिभ्रष्टो विरोग-[6]स्त्वभिजायते ॥५५॥

द्विजोत्तमा इति सम्बोधनम्। अर्चिताय वासुदेवाय [7]तदग्रप्राङ्गणे यथाशक्तिविरचितं तालवृक्षाकारं [8][विस्तीर्णं नीलपताका]-त्रयमर्चितं दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्ततालध्वजदानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतं नीलपताकायुक्तं तालं ददानि। दक्षिणा पूर्ववत्।

[9]तथा (३।३४१।८२ख-८३क):—

[10]युक्तं श्वेतपताकाभिर्मकरं यः प्रयच्छति।
राजा भवति लोकेऽस्मिन् भुक्त्वा लोकान् प्रचेतसः ॥५६॥

[11]ध्वजप्रकरणान्मकरयुक्तं ध्वजम्। अर्चिताय [12][वासुदेवाय तदग्रप्राङ्गणे] यथाशक्तिविरचितं [13]विस्तीर्णश्वेतपताकात्रयान्वितं मकरयुक्तं ध्वजमर्चितं दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्तमकरदानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतं[14] श्वेतपताकायुक्तं मकरं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।८३ख-८४क):—

युक्तं [15]रक्तपताकाभिर्दत्त्वा [16]ऋष्यमनुत्तमम्।
अलकां समवाप्नोति [17]तथा पापक्षयान्नरः ॥५७॥

1 A ॰ध्वजं for ॰युक्तं
2 A omits it
3 A यथा
4 A ॰णानं for ॰त्तालं
5 A याम्य
6 A ॰स्त्वतिमातियमे
7 I. O. देवायप्राङ्गणे, A प्राङ्गणे
8 I. O. reads the bracketed portion as विस्तीर्णमीलपताका
9 A यथा
10 I. O. युक्त
11 A मकरं and I. O. मकरवं for ध्वज
12 I. O. वासुदेवाय तदायाङ्गणे and A वासुदेवायातनाय प्राङ्गणे for the bracketed portion
13 A विस्तीर्णं श्वेतपताकात्रयान्वितं and I. O. विस्तीर्णाश्वेतपताका-त्रयार्चितं
14 A वासुदेवायैतत्
15 A omits रक्त
16 I. O. ऋक्ष॰ and A ऋक्ष॰ for ऋष्य॰
17 A यथा

[1]अर्घ्यो हरिणः। अर्चिताय वासुदेवाय [2]तदग्राङ्गणे यथाशक्तिविरचितं[3] हरिणयुक्त-ध्वजं[4] रक्तपताकात्रयान्वितमर्चितं दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्त-[5]अर्घ्यदानफलप्राप्ति-कामोऽहं भगवते [6]वासुदेवाय [7]अर्घ्ययुक्त-पताकायुक्त-[8]ध्वजं ददानि। दक्षिणा पूर्ववत्।

[9]तथा (३।३४१।११७क) :—

शिविकां ये प्रयच्छन्ति ते प्रयान्त्यमरावतीम्।

शिविका चतुर्दोला। अर्चिताय वासुदेवायार्चितां[10] शिविकां दद्यात्। ॐ अद्या-मरावतीप्राप्तिकामोऽहं भगवते [11]वासुदेवायैतां शिविकां ददानि। दक्षिणा पूर्ववत्।

अश्वदाः सूर्य्यलोकस्था राजन्ते दिवि सूर्य्यवत् ॥५८॥ (३।३४१।११७ख)

अर्चिताय वासुदेवायार्चितमश्वं दद्यात्। विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानकाश्व-दान-[12]फलप्राप्तिकामोऽहं भगवते वासुदेवायैतमश्वं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।११८) :—

करीन्द्रदाना-[13]च्छक्रस्य तथा [14]लोकाच्च्युतो नरः।

राजा भवति धर्मात्मा पृथिव्यां पृथिवीपतिः ॥५६॥

अर्चिताय वासुदेवायार्चितं गजं दद्यात्। ॐ विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानक-करीन्द्रदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतं करीन्द्रं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।७६क) :—

गवां लोकमवाप्नोति धेनुं दत्त्वा [15]पयस्विनीम् ।।६०॥

अर्चिताय वासुदेवाया[16]-र्चितां बहुक्षीरां धेनुं दद्यात्। ॐ अद्य गोलोकप्राप्तिकामोऽहं भगवते वासुदेवाय एतां धेनुं ददानि। दक्षिणा पूर्ववत्।

तथा :—

दधिक्षीरघृतार्थाय वासुदेवाय पूर्ववत्।

दत्त्वा गां मधुपर्काय [17]महत्फलमवाप्नुयात् ॥६१॥

1 A सख्यो
2 A ध्वजग्राङ्गणे
3 I. O. विरचित
4 A ०ध्वज
5 A ०सख्यदान०
6 A वासुकाय
7 A [illegible]
8 I. O. वध्य for ध्वज
9 A यथा
19 A वासुदेवायार्चित
11 A एतां
12 A omits फल
13 A ०च्छुक्रस्य
14 I. O. लोकाच्युतो
15 I. O. यशस्विनीं
16 A वासुदेवाय
17 A [illegible]०

[1]मधुपर्कायेति मधुपर्कदानार्थमर्चिताय वासुदेवायार्चितां बहुदुग्धां गां दद्यात्। [2][(ॐ अद्य महाफलप्राप्तिकामोऽहं भगवते वासुदेवायार्चितां धेनुं ददानि)[3]। दक्षिणा पूर्ववत्।

तथा (Cf. ३।३४१।७६ख) :—

अनड्वाहं तथा दत्त्वा दशधेनुफलं लभेत्।

भगवते वासुदेवायार्चितमनड्वाहं दद्यात्। [4](ॐ अद्य दशधेनुदानफलप्राप्तिकामोऽहं भगवते वासुदेवायैतमनड्वाहं ददानि।) दक्षिणा पूर्ववत्।

तथा :—

वृषदो वासुदेवाय त्वपवर्गमवाप्नुयात् ॥६२॥

भगवते वासुदेवायार्चितं वृषं दद्यात्। [5](ॐ अद्यापवर्गप्राप्तिकामोऽहं भगवते वासुदेवायैतं वृषं ददानि।)] दक्षिणा पूर्ववत्।

तथा (३।३४१।७७) :—

अजाविमहिषोष्ट्राणां दानमश्वतरस्य च।

सहस्रगुणितं दानं पूर्वप्रोक्तं प्रकीर्त्तितम् ॥६३॥

अत्र पूर्वप्रोक्तं सहस्रगुणितमिति विष्णुधर्मोत्तरीयब्राह्मणसम्प्रदानकाजाविदानेषु यत् फलं तदेव विष्णुसम्प्रदानक-[6]तत्तदुक्तपशुदाने सहस्रगुणितं भवतीति बोद्धव्यम्।

तद्यथा (Cf. ३।३०६।६१ख-६२क) :—

वारुणं लोकमाप्नोति दत्त्वा [7]वस्तं नरोत्तमः।

[8]अविप्रदानेन तथा [एवं लोकं समश्नुते][9] ॥६४॥

[10]वस्तश्छागः।

A मधुपर्कायेति. I. O. adds देवायेति after this

I. O. reads the following only for the bracketed portion:—ॐ अद्यापवर्गप्राप्तिकामोऽहं भगवते वासुदेवायार्चितं वृषं दद्यात्। ॐ अद्य...ददानि (the bracketed portion with the numeral 4)

A omits the bracketed portion here but reads it without ॐ below in lieu of the bracketed portion with the numeral 4

A omits the bracketed portion here but reads it without अद्य below in lieu of the bracketed portion with the numeral 5

A omits the bracketed portion

6 A तदुक्त०

7 Both I. O. and A वत्सं

8 A अविदानेन

9 A reads the bracketed portion as स एव लोकमाप्नुयात्

10 A omits it

तथा (३।३०६।६१क) :—

महिषस्य प्रदानेन याम्यलोके महीयते ॥६५॥

तथा (३।३१२।५ख-६क) :—

उष्ट्रं वा [1][गर्दभं वापि] खरं वा [2]यः प्रयच्छति ।

अलकायां समासाद्य यक्षेन्द्रैः सह मोदते ॥६६॥

खरोऽश्वतरः । अर्चिताय वासुदेवायार्चितं छागं दद्यात् । ॐ अद्य विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानकाजदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतमजं ददानि । दक्षिणा पूर्ववत् । [3]अश्व्यादिदानवाक्ये अजपदस्थाने तत्तत्पदनिवेशो विशेषः ।

तथा (३।३४१।७८) :—

आरण्यमृगजातीनां तथा [4][दानाच्च पक्षिणाम्] ।

अग्निष्टोममवाप्नोति सुभगश्च तथा भवेत् ॥६७॥

अर्चिताय वासुदेवाय हरिणशूकर-[5][शशकादीन् यथेच्छं] दद्यात् । [6]ॐ [7]अद्य विष्णुधर्मोत्तरोक्त-वासुदेवसम्प्रदानकारण्यमृगदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतानारण्यमृगान् ददानि[8] । दक्षिणा पूर्ववत् । [9]पक्षिदानवाक्ये आरण्य-[10]मृगपदस्थाने पक्षिपदनिवेशो विशेषः ।

तथा (३।३४१।११६) :—

दासं दत्त्वा [11]सुखी लोके नाकभ्रष्टो हि जायते ।

दासीं दत्त्वा तथा [12]विप्रा नात्र कार्य्या विचारणा ॥६८॥

अर्चितं [13]दासं दद्यात् । ॐ [14]अद्य विष्णुधर्मोत्तरोक्तवासुदेवसम्प्रदानकदासदान[15]-फलप्राप्तिकामोऽहं भगवते वासुदेवाय दासं [16]ददानि । दक्षिणा पूर्ववत् । दासीदाने तु वाक्ये दासपदस्थाने दासीपदनिवेशो विशेषः ।

1 A गर्दभमवापि for the bracketed portion
2 A च
3 I. O. अश्वादिदाने वाक्ये
4 A देवाश्च पक्षिणां and I. O. दानाद्ध पक्षिणा
5 A reads the bracketed portion as शशकादीना यच्छेथेच्छं
6 A omits it
7 Both I.O. and A अद्यादि for अद्य
8 A ददाति
9 I. O. पक्षिदाने वाक्ये
10 I. O. omits मृग
11 I. O. सुखे
12 A विप्रान्नात्र
13 A दानं
14 A अद्यादि
15 I. O. omits दान
16 A दद्यात्

तथा (३।३४१।१२०) :—

गणिकां ये प्रयच्छन्ति नृत्यगीतविशारदाम् ।
सर्वदुःखविनिर्मुक्तास्ते [1]प्रयान्त्यमरावतीम् ॥६९॥

अर्चिताय वासुदेवाय नृत्यगीतकुशलामर्चितां[2] वेश्यां दद्यात् । ॐ अद्य विष्णुधर्मोत्तरोक्त-[वासुदेव-[3]सम्प्रदानक-गणिकादानफलप्राप्तिकामोऽहं भगवते][4] वासुदेवाय एतां गणिकां ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।२१ख) :—

[5]नृत्यं दत्त्वा तथाप्नोति [6]रुद्रलोकमसंशयम् ।

[7]नृत्यं सङ्कल्प्य [8]वासुदेवाग्रे कारयेत् । [9]ॐ रुद्रलोकप्राप्तिकामोऽहं भगवते वासुदेवाय [10]नृत्यं दास्ये ।

तथा (३।३४१।२२ख) :—

प्रेक्षणीयप्रदानेन शक्रलोके महीयते ॥७०॥

प्रेक्षणीयं [11]स्त्रोलास्यम् । वासुदेवाग्रे प्रेक्षणीयं सङ्कल्प्य कारयेत् । ॐ [सोत्कर्ष-शक्रलोक][12]-प्राप्तिकामोऽहं भगवते वासुदेवाय प्रेक्षणीयं दास्ये ।

तथा (३।३४१।१८ख) :—

दत्त्वा च गीतं धर्मज्ञा गन्धर्वैः सह [13]मोदते ।

गीतं सङ्कल्प्य यथाशक्ति वासुदेवाग्रे कारयेत् । ॐ [14]अद्य विष्णुधर्मोत्तरोक्तवासुदेव-सम्प्रदानक-गीतदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय गीतं दास्ये ।

तथा :—

प्रेक्षणीयोपयोग्यानि दत्त्वात्यन्तं सुखी भवेत् ॥७१॥

---

1 Corrected from V. D. I. O. यान्त्यमरावतीं, A प्रयच्छ न्तेऽमरावतीं
2 A ०र्चितं
3 I. O. संप्रदानफल for सम्प्रदानक
4 A omits the bracketed portion
5 Both I. O. and A भव्यं
6 A रुद्रलोकं न संशयः
7 A भव्यं, I. O. भव्य
8 A वासुदेवाय
9 A omits it
10 Both I. O. and A भृत्यं
11 A स्त्रीदास्यं
12 I. O. सोत्कर्षस्वर्गलोक and A शक्रलोक for the bracketed portion
13 A मोदते
14 Both I. O. and A omit it

प्रेक्षणीयोपयोग्यानि मृदङ्ग-कांस्यताल-[1]घर्घरोकश्चकादीनि। [2]अर्चिताय वासुदेवायार्चितानि [3]प्रेक्षणीयोपयोग्यद्रव्याणि दद्यात्। [4][ॐ अद्यात्यन्त]-सुखप्राप्तिकामोऽहं भगवते वासुदेवाय एतानि [5]प्रेक्षणीयोपयोग्यानि ददानि। दक्षिणा पूर्ववत्।

[6]तथा (३।३४१।१६ख, २०ख) :—

वाद्यं दत्त्वा तथा विप्राः शक्रलोके महीयते।
वाद्यानामपि देवस्य तन्त्रीवाद्यं सदा प्रियम् ॥७२॥

वाद्यं सङ्कल्प्य वासुदेवाग्रे कारयेत्। ॐ सोत्कर्षशक्रलोकप्राप्तिकामोऽहं भगवते वासुदेवाय वाद्यं दास्ये। तन्त्रीवाद्यदाने तु[7] [8]फलाधिक्यम्।

[9]तथा (३।३४१।१२१क) :—

दुन्दुभिं ये प्रयच्छन्ति कीर्त्तिमन्तो भवन्ति ते ॥७३॥

[10]दुन्दुभिः भेरीति प्रसिद्धं वाद्यभाण्डम्। अर्चिताय वासुदेवायार्चितं दुन्दुभिं ददानि। दक्षिणा पूर्ववत्।

तथा (३।३४१।८८ख-८६क) :—

दत्त्वा धान्यानि बीजानि शस्यानि विविधानि च।
रूपकाणि च तान्येव प्राप्नोत्ययुतशः पुनः ॥७४॥

धान्यानि कलमादीनि बीजानि शाककलमादीनि[11] शस्यानि धान्येतराणि यवादीनि। [12]शस्यानां पृथग्ग्रहणं फलभूयस्त्वार्थम्। रूपकाणि चकम्वा इति प्रसिद्धानि पश्चिमदेशे। अर्चिताय वासुदेवायार्चितानि धान्यानि दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्त-वासुदेव-सम्प्रदानक-धान्यदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय शतानि धान्यानि ददानि। दक्षिणा पूर्ववत्। बीजादिदानवाक्ये तु धान्यपदस्थाने तत्तत्पदनिवेशो विशेषः।

1 A घनादीनि
2 A अर्चिता
3 A प्रेक्षयोपयोग्यद्रव्याणि
4 I. O. ॐ अद्याद्यन्त and A आद्यन्त for the b. p.
5 A प्रेक्षणीयो॰
6 I. O. omits it
7 Both I. O. and A वाक्यं after this
8 A फलवाक्यं
9 A omits it
10 A दुन्दुभिं
11 I. O. [illegible]
12 I. O. omits it

तथा (३।३४१।८६ख-६०क) :—

दत्त्वा शाकानि रम्याणि विशोकस्त्वभिजायते ।
दत्त्वा च व्यञ्जनार्थाय तथोपकरणानि च ॥७५॥

रम्याणि शाद्वलानि कीटादि-[1]विरहितानि स्वादूनि वा । व्यञ्जनोपकरणानि घृतशर्करा-सैन्धवादोनि। अर्चिताय वासुदेवायार्चितानि शाकानि दद्यात् । ॐ अद्य विशोकत्व-प्राप्तिकामोऽहं भगवते वासुदेवायैतानि रम्याणि शाकानि ददानि। दक्षिणा पूर्ववत्। व्यञ्जनोपकरणदाने तु एतानि व्यञ्जनोपकरणानीति विशेषः ।

तथा (३।३४१।६०ख) :—

पुष्पवृक्षं तथा दत्त्वा ग्रामस्याधिपतिर्भवेत् ॥७६॥

[2]अर्चिताय वासुदेवायार्चितं पुष्पवृक्षं दद्यात् । ॐ अद्य ग्रामाधिपत्यप्राप्तिकामोऽहं भगवते वासुदेवायैतं पुष्पवृक्षं ददानि । दक्षिणा पूर्ववत् ।

तथा (३।३४१।१८६ख, Cf. ३।३११।२५क) :—

[3]कङ्कतस्य प्रदानेन विरोगस्त्वभिजायते ।

[4]कङ्कतः काङ्करीति प्रसिद्धः । अर्चिताय वासुदेवायार्चितं [5]कङ्कतं दद्यात् । ॐ अद्य विष्णुधर्मोत्तरोक्त-[6]कङ्कतदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय [7]एतं कङ्कतं ददानि। दक्षिणा पूर्ववत् ।

तथा (३।३४१।१८६क) :—

[कूर्चप्रसाधनं दत्त्वा सुखमत्यन्तमश्नुते ॥७७॥][8]

कूर्चप्रसाधनं[9] [10]श्मश्रुप्रसाधनार्थं द्रव्यम् । अर्चिताय वासुदेवायार्चितं कूर्चप्रसाधनं दद्यात् । ॐ अद्यात्यन्तसुखप्राप्तिकामोऽहं भगवते वासुदेवाय एतत् कूर्चप्रसाधनं ददानि । दक्षिणा पूर्ववत् ।

1 I. O. चैव for वि
2 I. O. अद्य पुष्पवृक्षं just before this
3 I. O. केङ्कतस्य
4 I. O. omits it
5 I. O. केङ्कतं
6 I. O. केङ्कत
7 I. O. एवं
8 Supplied from V. D. I. O. omits it.
9 I. O. कूर्चप्रसाधन
10 I. O. श्मश्रु॰

तथा :—

विचित्रणीयं यत्किञ्चिद्दत्त्वात्यन्तं सुखी भवेत् ।

अर्चिताय वासुदेवायार्चितमाश्चर्य्यकरं किञ्चित् प्रतिमादिशिल्पं दद्यात् । ॐ अद्यात्यन्तसुखप्राप्तिकामोऽहं भगवते वासुदेवाय एतदाश्चर्य्यकरं ददानि । दक्षिणा पूर्ववत् ।

तथा :—

दीपवृक्षं ततो दत्त्वा शत्रुभिर्नाभि-[1]भूयते ।७८॥

अर्चिताय वासुदेवायाग्रतो यथेच्छमिष्टकादिभिर्दीपवृक्षं कृत्वा दद्यात् । ॐ अद्य विष्णुधर्मोत्तरोक्त-केशवायतन-दीपवृक्षदानफलप्राप्तिकामोऽहं केशवाय दीपवृक्षं ददानि । दक्षिणा पूर्ववत् ।

तथा :—

दीपमालां प्रयच्छन्ति ये नराः शार्ङ्गिणो गृहे ।
भवन्ति ते चन्द्रसमाः स्वर्गमासाद्य मानवाः ॥७९॥

शार्ङ्गिणो गृहे [2][वासुदेवायतने । अर्चिताय विष्णवेऽर्चितां दीपमालां यथाशक्त्या दद्यात् ।] ॐ अद्य विष्णुधर्मोत्तरोक्त-शार्ङ्गिगृह-दीपमालादानफलप्राप्तिकामोऽहं भगवते वासुदेवाय दीपमालां ददानि । दक्षिणा पूर्ववत् ।

तथा :—

दीपागारं[3] नरः कृत्वा कूटागारनिभं[4] शुभम् ।
केशवालयमासाद्य [नाके भवति][5] शक्रवत् ॥८०॥

दीपागारं वंशादिघटितम् ।

देवकुलाद्यायतनं[6] दीपयुक्तं यथोज्ज्वलम्[7] ।
[8]तथा नित्योज्ज्वले लोके नाकभ्रष्टो हि जायते ॥८१॥
सदीपे तु यथादेशे चक्षूंषि फलवन्ति च ।
तथा दीपस्य दातारो भवन्ति सफलेक्षणाः ॥८२॥

---

1 I. O. ०दूयते

2 I. O. reads the bracketed portion in a topsy-turvy manner as follows :—विष्णवे दीपमालां यथाशक्त्या दीपान् । अर्चिताय विष्णवेऽर्चितां दीपमालां वासुदेवायतने दद्यात् ।

3 I. O. दीपागारे

4 I. O. कूटागारनितं

5 I. O. नाके भति स for the bracketed portion

6 I. O. देवकुलाद्याकारं

7 I. O. यथोज्वल:

8 I. O. सदा दीपदातापि पाद्दत just before this

द्दीपागारं सङ्कल्प्य केशवायतने दद्यात्। ॐ [1]अद्य विष्णुधर्मोत्तरोक्त-[2]केशवालय-दीपागारदानफलप्राप्तिकामोऽहं केशवालये दीपागारं दास्ये। दक्षिणा पूर्ववत्।

एकादशीं द्वादशीञ्च प्रतिपक्षन्तु यो नरः।
दीपं ददाति कृष्णाय तस्य पुण्यफलं शृणु ॥८३॥
सुवर्णमणियुक्ताढ्यं मनोज्ञमतिशोभनम्।
[3]दीपमालोज्ज्वलं दिव्यं विमानमधिरोहति ॥८४॥

[प्रतिपक्षं पक्षं पक्षं[4] कृष्णपक्षे शुक्लपक्षे चेत्यर्थः। शुक्लैकादशीद्वादशीषु समस्तामेकादशीं[5] समस्ताश्च द्वादशीं[6] व्याप्य कृष्णायार्चितं दीपं दद्यात्।][7] ॐ अद्य विष्णुधर्मोत्तरोक्त-प्रतिपक्षैकादशीविहित-दीपदानफलप्राप्तिकामोऽहं भगवते कृष्णाय दीपं ददानि। दक्षिणा पूर्ववत्। एवं द्वादश्यां दानवाक्ये एकादशीपदस्थाने द्वादशीपदनिवेशो विशेषः।

तथा :—

प्रज्वाल्य देवदेवस्य कर्पूरेण प्रदीपकम्।
अश्वमेधमवाप्नोति कुलञ्चैव समुद्धरेत् ॥८५॥

देवदेवस्य विष्णोः प्रकरणात्। अर्चिताय विष्णवे कर्पूरेण दीपमर्चितं दद्यात्। अद्य विष्णुधर्मोत्तरोक्त-कर्पूरदीपदानफलप्राप्तिकामोऽहं भगवते वासुदेवाय एतं कर्पूरकं दीपं ददानि। दक्षिणा पूर्ववत्।

तथा :—

पट्टसूत्रोद्भवां वर्तिं[8] गन्धतैलेन दीपकम्।
विरोगो[9] सुभगश्चैव दत्त्वा भवति मानवः ॥८६॥

देवदेवस्य सम्बध्यते। अर्चिताय वासुदेवाय पट्टसूत्रोद्भवां वर्तिमर्चितां दद्यात्। ॐ अद्य विष्णुधर्मोत्तरोक्त-पट्टसूत्रोद्भवां वर्तिं भगवते वासुदेवायैतां ददानि। दक्षिणा पूर्ववत्।

1 I. O. omits it
2 I. O. केशवालयदीपागारे॰
3 I. O. दीपमालाज्वलं
4 I. O. प्रति after this
5 I. O. ॰दशी
6 I. O. द्वादशी
7 I. O. reads the first sentence of the bracketed portion viz. प्रतिपक्षं…चेत्यर्थः after पुण्यफलं शृणु (v. 83 above) and also reads almost the second sentence of the bracketed portion viz शुक्ल…दद्यात् just after it, besides reading the latter here.
8 I. O. वर्त्तिं
9 I. O. विरोग

तथा :—

महावर्तिः सदा देया भूमिपाल महाफला[1] ।
कृष्णपक्षे विशेषेण तत्रापि च विशेषतः ।
अमावास्या च निर्दिष्टा द्वादशी च महाफला[2] ॥८७॥
आश्वयुज्यामतीतायां कृष्णपक्षस्तु यो भवेत् ।
अमावास्या तदा पुण्या द्वादशी वा विशेषतः ॥८८॥
देवस्य दक्षिणे देशे देया तैलतुला [3]सदा ॥८९॥
[4]पलाष्टकयुता राजन् [5]वर्तिं तत्र तु दापयेत् ।
[6]महारजनरक्तेन समग्रेण तु वाससा ॥९०॥

[7]पलाष्टकयुता तैलतुला [8]अष्टोत्तरशतं तैलपलानीत्यर्थः । [9]समग्रेणाखण्डितेन ।

वामपार्श्वे च देवस्य देया घृततुला नृप ।
पलाष्टकयुता शुक्लां [10][वर्तिं तत्र तु] दापयेत् ।
वाससा तु समग्रेण सोपवासो जितेन्द्रियः ॥९१॥
महावर्तिद्वयमिदं सकृद्दत्त्वा महामते ।
स्वर्गलोकं चिरं भुक्त्वा जायते भूतले यदा ।
तदा भवति लक्ष्मीवान् रूपद्रविणसंयुतः ॥९२॥
राष्ट्रे च जायते यस्मिन् देशे वा नगरे तथा ।
कुले च राजशार्दूल तत्र स्याद्दीपवत्[11] प्रभो ॥९३॥
अत्युज्ज्वलश्च भवति युद्धेषु कलहेषु च ।
ख्यातिर्याति यथालोके सज्जनानाञ्च सद्गुणैः ॥९४॥
एकामप्यथ यो दद्यादभीष्टामनयोर्द्वयोः ।
मानुष्ये सर्वमाप्नोति स्वर्गलोकञ्च गच्छति ।
स्वर्गे तथात्वमाप्नोति भोगकालञ्च यादव[12] ॥९५॥

---

1 I. O. महाफला:
2 I. O. महाफलं
3 I. O. तिलरलशतं
4 I. O फलाष्टकयुतां
5 I. O. वर्ति
6 I. O. महाराजनरक्तेन
7 I. O. फलाष्टकयुता
8 I. O. अष्टोत्तरं शतं
9 I. O. समग्रेणाखण्डितेन
10 I. O. reads the bracketed portion as वर्त्तिं तु तत्र
11 I. O. स्याद्दीपवत्
12 I. O. यादवा

सामान्यस्य तु दीपस्य राजन् दानं महाफलम् ।
किं पुनर्महतो यस्य फलस्यान्तं न विद्यते ॥९६॥
दीपदानं परं [1]पुण्यमन्यदेवेष्वपि ध्रुवम् ।
किं पुनर्देवदेवस्य अनन्तस्य महात्मनः ॥९७॥

[2][अश्वयुक्-पौर्णमास्यां तु अतीतायां] कार्त्तिककृष्णद्वादश्यमावास्ययोरन्यतरदिनात् पूर्वेतरदिने प्रातः कृतनित्यो घटिकाधिकप्रहरत्रये हविष्यं भुक्त्वाऽऽचम्य शुचौ देश उपविश्य पादौ प्रक्षाल्याचम्य उदङ्मुखो प्राङ्मुखो वा कृताञ्जलिः ॐ सूर्यसोमयमकालपञ्चमहाभूतानि विष्णुधर्मोत्तरोक्तदानकर्म कर्तुं श्वो मयोपवासः कर्त्तव्य इति निवेद्य सङ्कल्पं कुर्यात् । विष्णुधर्मोत्तरोक्तमहावर्त्तिदानं[3] कर्तुं श्वोऽहमुपवासं करिष्ये । ततो नियमेन सुप्त्वा परदिन उपोष्यापरदिने कृतस्नानादिः विष्णुधर्मोत्तरोक्त-महावर्त्तिदानादिकर्माहं करिष्य इति सङ्कल्प्य वासुदेवप्रतिमाया दक्षिणया दिशा[4] अष्टोत्तरपलशततैलपूर्णपात्रमखण्डिताहतमहारजन[5]-रक्तवस्त्रवर्त्तियुत-[6][मुक्तप्रतिमाया वामया दिशा चा]-[7]ष्टोत्तरपलशतघृतपूर्णपात्रं शुक्लसमवासोवर्त्तियुतमेतन्महावर्त्तिद्वयं ददानि । दक्षिणा पूर्ववत् । अत्र [8]धान्याद्यपेक्षितं द्रव्यं विष्णवे देयम् ।

तथा च विष्णवे दानानुवृत्तौ विष्णुधर्मोत्तरे :—

यत् किञ्चिद्देवदेवाय दद्याद् भक्तिसमन्वितः ।
तदेवाक्षयमाप्नोति विष्णुलोकञ्च गच्छति ॥९८॥

इति महाराजाधिराज-निःशङ्क-शङ्कर-श्रीमद्बल्लालसेनदेवविरचिते
श्रीदानसागरे वासुदेवसम्प्रदानकदानावर्त्तः ।

धर्मस्याभ्युदयाय नास्तिकपदोच्छेदाय जातः कलौ ।
श्रीकान्तोऽपि सरस्वतीपरिवृढः प्रत्यक्षनारायणः ॥९९॥
पादाम्भोजनिषण्णविश्ववसुधासाम्राज्यलक्ष्मीयुतः ।
श्रीबल्लालनरेश्वरो विजयते सद्वृत्तचिन्तामणिः ॥१००॥

1 I. O. पुण्यं मन्यदेवेष्वपि
2 I. O. पौर्णमास्यै तु for the bracketed portion
3 I. O. ॰दान
4 I. O. omits it
5 I. O. रजनव॰ for महारजन॰
6 I. O. omits the bracketed portion
7 I. O. तैलाष्टोत्तरपलशतं for अष्टोत्तरपलशत
8 I. O. धान्याद्यपेक्षित

ब्रह्मपुराण—वराहपुराण—अग्निपुराण—भविष्यपुराण—मत्स्यपुराण—वामनपुराण—वायुपुराण—मार्कण्डेयपुराण—विष्णुपुराण—शिवपुराण—स्कन्दपुराण—पद्मपुराण—कूर्मपुराण—शाम्बपुराण—कालीपुराण—देवीपुराण—नन्दिपुराण—आदित्यपुराण—नरसिंहपुराण—लिङ्गपुराण—महाभारत—श्रीभागवत—श्रीरामायण—विष्णुधर्मोत्तर—छन्दोगपरिशिष्ट—लघुहारीत—बौधायन—शाट्यायन—मनु—याज्ञवल्क्य—देवल—पैठीनसि—कात्यायन—शातातप—दानव्यास—दक्ष—वशिष्ठ—बृहस्पति—यम—हारीत—पुलस्त्य—जाबाल—अङ्गिरस—आपस्तम्ब—महाव्यास—लघुव्यासाः। एतेषां ग्रन्थानां मतमालोच्य श्रीवल्लालसेनदेवेन दानसागरः कृतः।

इति दानसागरः समाप्तः।

अथ वङ्गदेशीयराज्ञामनुक्रमेण नामानि। अथ प्रथमं हेमन्तसेनः ततो विजयसेनः ततो बल्लालसेनः तेन दानसागरः कृत इति। अस्य गुरुः अनिरुद्धः। अत्र सम्वत्सरादिसमयविशेषपरिचयाय दानसागरनिर्माणवर्षस्यैव सम्वत्-सरसङ्ख्याप्रतिपादनाय लिख्यते। निखिलभूपचक्रतिलक-श्रीमद्बल्लालसेनदेवेन पूर्णे[1] शशिनवदशमित-(१०९१)-शकवर्षे दानसागरो रचितः। श्रीहरिः।

1 I. O. पूर्वे